रामाभ्युदयम्

सम्पादिका
डाक्टर् पि. विशालाक्षी

पौरस्त्यहस्तलिखितग्रन्थशाला
केरलसर्वकलाशाला
कार्यवट्टम्, तिरुवनन्तपुरम्

रामाभ्युदयम्

रामाभ्युदयम्

सम्पादिका
डाक्टर् पि. विशालाक्षी

पौरस्त्यहस्तलिखितग्रन्थशाला
केरलसर्वकलाशाला
कार्यवट्टम्, तिरुवनन्तपुरम्
२००३

अनन्तशयनसंस्कृतग्रन्थावली ग्रन्थाङ्कः - २६७

रामाभ्युदयम्

डाक्टर् पि. विशालाक्षी

Trivandrum Sanskrit Series - 267

RĀMĀBHYUDAYAM

Editor

Dr. P. VISALAKSHY

Published by Dr. P. Visalakshy, Reader-in-charge
Oriental Research Institute and Manuscripts Library
for the University of Kerala, Thiruvananthapuram
First published January 2003.

Price Rs. 300/-

Printed at SB Press (P) Limited, Thiruvananthapuram - 695001

PREFACE

'Rāmābhyudayam', a Kāvya work in Sanskrit language narrating the story of Rāmāyaṇa is published under Trivandrum Sanskrit Series as publication No. 267. Due to the limitations in the number of pages, Śloka index is not included here. In addition to the importance of Rāmābhyudayam as a poetic work, the significance of the present publication is much more when considering the fact that there is no other manuscript of this work known to exist anywhere else.

I am grateful to Dr. K. Vijayan, Former Director, ORI & MSS. Library for the advice and valuable suggestions during the preparation of this work.

I express my sincere thanks to Smt. P. Bindu Mol for helping me in the preparation of the fair copy of the press matter. I also acknowledge Smt. Radha, Manuscript Assistant of this Department for helping me in proof corrections. S.B. Press, Thiruvanathapuram deserves special thanks for undertaking the printing work and for the neat execution of this book.

P. VISALAKSHY

ORI & MSS. Library
Karyavattom
January 2003

INTRODUCTION

Rāmābhyudayam modelled as a Mahākāvya depicts the story of Rāmāyaṇa commencing from the *avatāra* of Śrīrāma and concludes with his *Paṭṭābhiṣeka.* The work is divided into twenty four sargas consisting of 2471 verses. Based on the present information, only one copy of this work is survived and that too in a transcript form which is kept in Oriental Research Institute and Manuscripts Library, Thiruvananthapuram (T.208). The source of the manuscript is not mentioned in the available transcript. The transcript is in a dilapidated condition. The colophon given at the end of each sarga except VIII, XVII and XXIII reads -

viṣṇoḥ śrīnarasimhavigrahabhṛto bhāvormisetau kṛtau

śrīrāmābhyudaye........................

From this it can be interpreted that a person called Narasimha might be the author of this work. From the reading -

"tadidam rāmacandrasya caritam tatprasādataḥ
ucyate tena viduṣā narasimhamahībhujā

(I-64)

it becomes clear that king Narasimha is the author of *Rāmābhyudayam*. The date of the work is not given anywhere in the text. Since the work *Rāmābhyudayam* is mentioned as *Kāvyatilaka,* one has to assume that king Narasimha is a well known poet during his time. But no other work written by him is obtained or even heard. Simi-

larly no reference on *Rāmābhyudayam* or on other literary contributions of this author is found in the works of other authors so as to get further information. But there is another dramatic work by the same name *Rāmābhyudayam* written by Yaśovarman which does not have any connection with the present work. No specific statements are seen in *Rāmābhyudayam* on matters like the date of the work, date of the author, his kingdom and the territories under his reign. Also there is no mentioning of his contemporaries.

It is given in the work that his family deity is Lord Narasimha through the reading *'nṛharim kuladaivatam'* (I-46). The poet's father is king Guṇḍaya. He is called as Guṇḍayabhūpati (I-34,37) and also as Guṇḍayamahīpati (I-43). The fact that Narasimha is the son of Guṇḍaya can be understood from the verse -

tathā guṇḍayabhūbartuḥ tanayo'bhūt tataḥ phalāt
nānāguṇagaṇastasyām narasimha iti śrutaḥ

(I-52)

Guṇḍadeva was born in the family of Mallideva, Saṅgideva and Maṅgadhaḥ. It is clear from the verse -

tadanvayo samabhavamścatvāro dharaṇībhujaḥ
guṇḍadevo mallidevaḥ Saṅgidevaśca maṅgadhaḥ
guṇḍadevo nṛpasteṣu guṇapauruṣabhūṣaṇaḥ

(I-14)

From the above verse it is clear that Guṇḍaya was the most famous among them. He was also known as Guṇḍa. In several places in *Rāmābhyudayam*, Guṇḍaya is mentioned as *gaṇḍa Guṇḍaya*. It is stated in the work that king Guṇḍaya did not have a child for a very long period. Since he was an ardent devotee of Lord

Narasimha, he along with his wife MIlāmbā took severe penance for getting a heir to his throne and the child was born by the blessings of Lord Narasimha.

mallāmbikā mahābhāgā tasyāsīt sahacāriṇī
devī daśarathasyeva kausalyā kulabhūṣaṇam

(I-42)

iti cintāparo dhyātvā nṛharim kuladaivatam
sa tayā sahacāriṇyā tapo'kuruta duścaram

Thus the child was born and he was named as Narasimha.

tapasā tena santuṣṭastasya svapne puro'bhavat
ahobalanṛsimhastamabravīdadbhutam vacaḥ
śauryagāmbhīryasaundaryadhairyaudāryādibhūṣaṇah
tavāstu tanayo vatsa sarvorvīcakranāyakaḥ

(I-48)

In sargas V, VI and VIII it is mentioned that the work is written by Ḍiṇḍimasārvabhauma -
ḍiṇḍimasārvabhaumakṛtau rāmābhyudaye..........

From this a doubt arises whether Ḍiṇḍimasārvabhauma and Narasimha are two different persons and the work is of a combined authorship. The lines in sarga V -

Śoṇādrīndram kavīndram śravaṇakaṭuraṭaḍiṇḍimam sārvabhaumam
prāsūtāmbābhirāmā navanava kavitābhājanam rājanāthāt

creates a doubt whether this sarga is fully authored by Śoṇādrinātha, the son of Rājanātha and Abhirāma who used to qualify himself as Ḍiṇḍimasārvabhauma. Though the name Śoṇādrinātha is not given in sargas 6 and 8,

since it is mentioned as *"diṇḍimasārvabhauma kṛtau"* these two sargas also might be suspected to be written by him. In this context it may be noted that a poet named Rājanātha who was a close associate and dependent of king Narasimha and the author of *Sāluvābhyudayam* was also known as Ḍiṇḍimasārvabhauma. In sargas 10,11 and 12 mentioning of both Narasimha and Ḍiṇḍima - sārvabhauma are found. It might be possible that Ḍiṇḍimasārvabhauma might be a title used by more than one poet and it might have been used by King Narasimha also. Śoṇādrinātha is yet another name for Aruṇagirinātha. In Sanskrit literature there exists four authors by the name Aruṇagirinātha. Two of them are the proteges of Vijayanagara kings, the third one the protege of a Godavarma of Vaṭakkumkūr and the fourth one is the commentator of *Raghuvamśa* and *Kumārasaṁbhava*. Aruṇagirinātha I, a protege of Vijayanagara King Devarāya II (AD1422 to 1448) was well known as Ḍiṇḍimasārvabhauma. Aruṇagirinātha II, a protege of Vijayanagara King Krishnadevaraya (AD 1509 - 1530) was also one among the Ḍiṇḍima poets.

The last two lines of verse 75 in sarga V clearly indicate that this verse is an interpolation *(prakṣiptam)*. If it is written by the author himself then there is no possibility of mentioning that the composition of *Rāmābhyudayam* is earlier to that of *Mahānāṭaka* (The work referred may be *Mahānāṭakasudhānidhi*, a *Rāmayaṇa campūkāvya of* Immaḍi Devarāya*)* i.e. when one writes a book, a reference to a subsequent work not in existence is highly improbable. Hence no part of *Rāmābhyudayam* is the work of Aruṇagirinātha and the whole text is of king Narasimha.

In this respect the information available from *Sāluvābhyudayam*, a work by Rājanātha is very valuable. *Sāluvābhyudayam* a historical *Kāvya* depicts the glory of the Sāluva king Narasimha, the son of Guṇḍa III. A brief family history of Saluvas is given in this work (I-42).

In *Rāmābhyudayam* also reference is found on the members of Sāluva dynasty.

guṇḍadevo mādirājo vīrāhobalagautamau
maṅgisāluva sāvitrimaṅgidevau tadātmajau (I-21).
teṣām madhye sāluvādimaṅgidevo mahābhujaḥ
....(I-22).

The story regarding the birth of Narasimha due to the penance of Guṇḍa III with his wife Mallāmbā praying Lord Narasimha is seen in both *Sāluvābhyudayam* and *Rāmābhyudayam* (*Sāluvābhyudayam*, sarga II; *Rāmābhyudayam* I-42,46). These facts conclusively prove that the author of *Rāmābhyudayam is* Sāluva king Narasimha, son of Guṇḍaya III. Narasimha is considered as the founder of Sāluva dynasty. This is clearly mentioned in *Jaimini Bhāratamu* of Pīna Vīrabhadra. *Rāmābhyudayam* might have been written only after *Sāluvābhyuayam* and that might be the reason for not mentioning this work in *Sāluvābhyudayam* by Rājanātha. Since the period of king Narasimha was between AD 1456-1486, *Rāmābhyudayam* might have been written during this period.

From the literary angle this work deserves a prominent place. There are a good numer of verses which exhibit the poetic talents of the author (egs. X-83, XVI-12, XXIV - 78,101). This work exhibits the proficiency of the author for the usage of *śabdālaṅkāras* especially *yamakas.* A whole sarga (Sarga XIX) is devoted to

yamakas under which thirteen varieties of yamakas are illustrated. The mentioning of rivers like *Godāvarī, Kāverī, Pampā* and *Dakṣiṇaniḷā* (egs. X-12,47,48; XV-52; XXIV-97,98) and the trees like panasa, kapittha, *nāḷikera* and *śaubha* (egs. XV- 89, XVI - 30) points towards the fact that the author has a close acquaintance with southern regions of India. Some of the usages found in this work are peculiar to South Indian authors of Sanskrit works. eg. *dhārāḷa* in the sense of plenty (VI - 124, X - 2, 24, XIII- 103) *veḷā* in the sense of time (X-2, 49) and *maṇī* in the sense of bell (VIII-34). A few non-Pāṇinian usages can be seen in this work. The author uses the word *viśrāma* in the sense of *viśrama* (XII - 96, XXIV - 100) like Kālidāsa (*Śākuntalam* II - 6) Bhavabhūti (*Uttararāmacarita* I-39) and Murāri (*Anargharāghava* I -10). However the word *viśrama* is also used in this work in the same sense. (VIII- 18). Free variation between 'v' and 'b' is found in may instances in *Rāmābhudayam* eg. *barāṅgī* instead of *varāṅgī* (XIII - 30) *vālihṛdayam* instead of *bālihṛdayam* (X-67). Similarly Maṇḍodarī is regualrly written as Mandodarī. (eg. XVII - 62, XX - 16).

From the above said facts it is clear that *Rāmābhyudayam* is a valuable work from the literary, linguistic and historical angles. This work, so far hidden in the folios of manuscript, is now brought to light before the scholarly world.

श्री

।। रामाभ्युदयम् ।।

प्रथमः सर्गः

दन्ताग्रदलितोन्मत्तदन्तावलमुखासुरम् ।
सन्तापं मामकं भिन्द्याद् दन्तावलमुखं महः ।। १

शंभोः श्रीचरणाम्भोजद्वन्द्वमन्तरुपास्महे ।
प्रायः पुलकितं देव्याः पाणिसंवाहनोत्सवात् ।। २

कल्याणं कुरुतान्नित्यं करिराजमुखं महः ।
अनादियूनोः शिवयोर्यदानन्दैककन्दलम् ।। ३

नालीकाक्षमलीकाक्षं नागेशयमगेशयम् ।
विपुङ्गवध्वजं धाम पुङ्गवध्वजमाश्रये ।। ४

रथः पत्त्ररथो माला वनमालाङ्गजोऽङ्गजः ।
निलयो वारिनिलयो यस्य दिश्यात् स वः श्रियम् ।। ५

अस्ति क्षीरार्णवः शौरेरन्तःपुर निदानभूः ।
अवतंसोदयोद्यानमपर्णागृहमेधिनः ।। ६

जीवातुहेतुर्देवानां जन्मभूः सुरयोषिताम् ।
अमराधिपवृक्षाणामङ्कुरार्पणपालिका ।। ७

ततो नीलोत्पलसुहृच्चक्षुः सव्येतरं हरेः।
चन्द्रोऽजनि निजालोकसन्तोषितचराचरः ।। ८

विमुक्तालिरसोल्लासं विमुखी यत्कराश्रयात् ।
मुग्धेव पद्मनयनं मुकुलीकुरुतेऽब्जिनी ।। ९

ततोऽजनि सुधीर्बोधसुधारसपयोनिधिः ।
न लक्ष्यते यस्य गतिरनन्तपदसीमनि ।। १०

ऐलिः पुरुरवास्तस्मादजनिष्टदिग्जयी ।
वशीकृतोर्वशी येन शौर्यसौन्दर्यशालिना ।। ११

सद्वंशमुक्तामणयः सद्वृत्ताश्चारुतेजसः ।
नराधिपतयोऽभूवन् नानागुणगणान्विताः ।। १२

तदन्वये समभवंश्चत्वारो धरणीभुजः ।
गुण्डदेवो मल्लिदेवः सङ्गिदेवश्च मङ्गधः ।। १३

गुण्डदेवो नृपस्तेषु गुणपौरुषभूषणः ।
अशेषामशिषत् शेषनिर्विशेषभुजो भुवम् ।। १४

आसीत् कल्याणनगरमावासस्तस्य भूपतेः ।
ध्रुवं यद्विजिता मेरुशृङ्गं प्राप्तामरावती ।। १५

यत्कान्तामुखसौन्दर्यदर्शनात् सत्रपः शशी ।
प्रवत्स्यतीव पातालं परिधाम्भसि बिम्बितः ।। १६

प्रासादगोपुरागारैर्यत्र रुद्धरथे रवौ ।
दीर्धिकाचक्रनामानो दौर्ध्यादहमामहं (वयः? यवः) ।। १७

सङ्घृष्टं निशि सौधेषु यत्र स्त्रीणां मुखेन्दुभिः ।
विवेक्तुमिन्दुं शक्नोति मुहूर्तं न विधुन्तुदः ।। १८

अनल्पदर्पसञ्जातकण्डूनिर्भरदोस्तटः ।
नगराद् गुण्डदेवोऽपि निरगाद् दिग्जिगीषया ।। १९

रायदुर्गं गतस्तत्र निरर्गलमदग्रहम् ।
निगृह्य शबराग्रण्यमग्रहीष्ट तदास्पदम् ।। २०

गुण्डदेवो मादिराजो वीराहोबलगौतमौ ।
(मङ्गि?) सालुवसावित्रीमङ्गदेवौ तदात्मजौ ।। २१

तेषां मध्ये सालुवादिमङ्गिदेवौ महाभुजः ।
अभौक्षीत् वसुधां सर्वामसपत्नामसौ कृती ।। २२

सौहार्दात् कम्पराजस्य चम्बुराया भयार्पकः ।
अगाज्जिगीषुस्तदरीनगस्त्ययुवतीं दिशम्।। २३

महनीयापदानस्य मधुरापुरवासिनः ।
तस्यासी दक्षिणसुरत्राणेन समरो महान्।। २४

धनुर्ज्यासं श्रयोदञ्चदच्छभल्लच्छटान्विते ।
अफल्गुवल्गनोदग्रखड्गिवर्गनिरर्गले।। २५

गन्धवाहोल्लसत्पत्रबृन्दस्यन्दनदन्तुरे ।
अखर्वगर्वदुर्वागतिगन्धर्वबन्धुरे।। २६

अवर्ण्ये तद्रणारण्ये पततां भूभृतामसौ ।
पक्षं क्षिपन् क्षणात् साक्षात्सालुवाध्यक्षतां व्यधात्।। २७

स्वयं ततोमङ्गिदेवः सुचिरं रचिताहवः ।
तद्विषोऽपातयच्छित्वा साकं भुवनपीडया।। २८

स निखाय जयस्तम्भं ताम्रपर्णीतटे ततः ।
शृङ्गं निराकारगिरां श्रीरङ्गमगमन्नृपः।। २९

प्रदक्षिणं वितन्वाना प्रायो वीचिकराहृतैः ।
अर्चयन्तीव कमलैरच्युतं यत्र सह्यजा।। ३०

सह्यजायां ततः स्नातः सालग्रामसहस्रदः ।
साकं षोडश दानानि तत्राऽकार्षीत् स सालुवः।। ३१

सुवृत्तान् शुचिभावाढ्यान् सुदृग् यः सुगुणोत्तरान् ।
अष्टाग्रहारानदिशदष्टदिग्विजयी नृपः।। ३२

अनेकसालग्रामादिदानाद् द्विजवरान् परम् ।
नातर्पयद् द्विजवरारूढं च पुरुषं परम्।। ३३

पुत्रेषु तस्य बहुषु भुवनश्रुतकीर्तिषु ।
क्षमामपालयत् कृत्स्नां ख्यातो गुण्डयभूपतिः ।। ३४

साहित्यसारसादित्यः सङ्गीतामृतचन्द्रमाः ।
यश्चतुर्दशविद्यानां निषद्योति निगद्यते।। ३५

पद्मानुत्कण्ठकान् वक्षः शौरेश्च मणिशार्करम् ।
अपहायेन्दिरावात्सीदंसे तस्यातिमांसले ।। ३६

अखण्डमहसस्तस्मादभूद् गुण्डयभूपतिः ।
अकुण्ठशक्तिः श्रीकण्ठान्नीलकण्ठ रथो यथा ।। ३७

गुणमण्डनकोदण्डसंडीना यच्छिलीमुखाः ।
चण्डारिहृत्पुण्डरीकमण्डलेष्वाभितोऽपतन् ।। ३८

पुण्डरीकोल्लसच्छायोत्कण्ठी दण्डधरा(ङ्ग)भूः ।
यो राजमण्डलमहोलुण्टाकश्चण्डभानुवत् ।। ३९

अखण्डभूमण्डलभृदहीनभुजमण्डलः ।
परवेतण्डखण्डी यश्चण्डीपतिरिवापरः ।। ४०

नाधिकोऽस्य यदीशानो न समो दर्प (णो?को) न चेत् ।
न प्रत्यनन्तरोऽप्यासीद् यदि नेता दिवौकसाम् ।। ४१

मल्लाम्बिका महाभागा तस्यासीत् सहचारिणी ।
देवी दशरथस्येव कौसल्या कुलभूषणम् ।। ४२

ततः कदाचिदेकान्ते स गुण्डयमहीपतिः ।
चिन्तामनन्तामतनोत् सन्तानाप्तिविलम्बनात् ।। ४३

अतर्पिताग्नि सवनमलक्षितपतं नभः ।
अनुद्गतेन्दुमम्भोधिमपुत्रं मां प्रचक्षते ।। ४४

अन्त्यादृणाद् विमुक्तोऽयं यदि राज्यं सुखाय मे ।
सुखोदर्कमिदं कर्तुं सुप्रसन्नो हरिः प्रभुः ।। ४५

इति चिन्तापरो ध्यात्वा नृहरिं कुलदैवतम् ।
स तया सहचारिण्या तपोऽकुरुत दुश्चरम् ।। ४६

तपसा तेन सन्तुष्टस्तस्य स्वप्ने पुरोऽभवत् ।
अहोबलनृसिंहस्तमब्रवीदद्भुतं वचः ।। ४७

शौर्यगाम्भीर्यसौन्दर्य धैर्यौदार्यादिभूषणः ।
तवास्तु तनयो वत्स सर्वोर्वीचक्रनायकः ।। ४८

इत्युदीर्य वचोभक्त्या हर्षितस्याऽस्य भूपतेः ।
अहोबलनृसिंहोऽयमधितान्तर्दयानिधिः ।। ४९

अथ स्वप्नावसानेऽसावानन्दामृततुन्दिलः ।
हरिप्रासादमाचष्ट देव्या दर्शितकौतुकः ।। ५०

तथा गुण्डयभूभर्तुस्तनयोऽभूत् ततः फलात् ।
नानागुणगणस्तस्यां नरसिंह इति श्रुतः ।। ५१

धन्विनो दानशौण्डस्य शास्त्राणां पारदृश्वनः ।
भूम्ना यस्य चिरादासीद् भुवि धर्मः प्रतिष्ठितः ।। ५२

तरङ्गसदृशोत्तुङ्गतुरङ्गमखुराङ्किताः ।
यस्य दिग्विजयक्रीडां शंसन्ति कुलभूभृतः ।। ५३

दिवाभीतायितं द्वेष्यैर्यत् प्रतापे प्रसर्पति ।
दिनाधिपेन नगरे दिवादीपायितं परम् ।। ५४

यस्य दुर्गाणि जलधिर्दण्डका हाटकाद्रयः ।
अर्थिभ्यो दातुमानीतरत्नेभस्वर्णराशयः ।। ५५

द्वितीयगणना यस्य दुर्लभा तस्य वागपि ।
द्विर्भावद्वेषिणी जाता (त्?) कार्यं भेद्यं न कारणात् ।। ५६

यत् षोडशमहादानवारिणाघनिवारिणा ।
विर्वासिताभून्मेदिन्यां कलिसन्तापविक्रिया ।। ५७

प्रतापाग्निपरिप्लुष्ट प्रत्यर्थिपुरभस्मना ।
सुत्रामसंपदो यस्य शोधितः कीर्तिदर्पणः ।। ५८

कल्याणकाञ्चीकटकशालिनीं करदायिनीम् ।
सकुन्तलां सचोलाङ्गां योऽभुङ्क्तक्षमां सपुण्ड्रकाम् ।। ५९

न हैमा गिरयः सर्वे न द्विपाः सक (ला) मृगाः ।
नार्थिनो निखिला यस्य स्थूललक्षस्य दत्तये ।। ६०

न वाञ्छिताधरं दानं न न्यूनं कोटितोऽपि तत् ।
नापात्रगामि तद् यस्य (ब) भूवा (क्) ब्रह्मविन्न तत् ।। ६२

न चोरः कोऽप्यभूत् तस्मिन्नक्षतां रक्षति क्षितिम् ।
यद्येको नवनीतस्य सोऽपि द्वापर एव हि ।। ६२

दिशस्त्वया जिताः सर्वाः सीमायां स्थापितं जगत् ।
काव्ये दर्शय सामर्थ्यमित्यसौ कथितो बुधैः ।। ६३

तदिदं रामचन्द्रस्य चरितं तत्प्रसादतः ।
उच्यते तेन विदुषा नरसिंहमहीभुजा ।। ६४

प्राचेतसोऽस्तु विजयी फलिता यस्य भारती ।
रामचन्द्रकथाज्योत्स्नारा कर्ण्या सूक्तिरेखया ।। ६५

कवयः प्रभविष्यन्ति कलौ केचिन्निरङ्कुशाः ।
इतिहासं व्यधाद् व्यासो भगवान् भारतच्छलात् ।। ६६

कथं वा कालिदासस्य कविता वर्ण्यते मया ।
काली स्वमुखकर्पूरवीटिकामोदवेदिनी ।। ६७

सत्यं बाणेन बाणीति सरस्वत्यवतारिता ।
ख्याता भगीरथेनेव गङ्गा भागीरथीत्यभूत् ।। ६८

अर्थातिशयमात्मीयं वोढुं भारविभारती ।
सहते सुकुमारापि लतेव पृथुलं फलम् ।। ६९

सतां दृढतरज्ञानद्वारोद्घाटनकुञ्चिका ।
अमोघाजनि माघस्य कृतिः कृष्णस्य कीर्तनात् ।। ७०

सद्गुणालङ्क्रियां प्राप्य सान्द्रभारतसोदयाम् ।
अवन्तिसुन्दरीं तां तज्ज्ञातारो रसिकोत्तमाः ।। ७१

सुरभिः सुमनोहारी भावितो भवभूतिना ।
मालतीमाधवोल्लासो महते विस्मयाय नः ।। ७२

विचित्रवर्णविन्यासैर्विशदैर्वाक् सुधारसैः ।
रामायणं नवीकृत्य राजते राजशेखरः ।। ७३

यशोधनाय हर्षाय कृतनामाङ्गनाटकः ।
धनकोटित्रयं लेभे धावकः कविधावकः ।। ७४

मुरारेर्लक्षणप्राया मुखरीकुर्वते कवीन् ।
शाणोल्लिखितवैडूर्यसच्छात्राः शब्दवृत्तयः ।। ७५

प्रौढाः प्रवरसेनस्य सारस्वतरसोर्मयः ।
अपि सेतुं निबन्धिन्यः प्लावयत्यखिलं जगत् ।। ७६

यत् शृङ्गारप्रकाशेन रसाद्वैतमदर्शयत् ।
स एव भोजः साहित्यसाम्राज्यानुभवे कृती ।। ७७

सिद्धयो व्यवहाराणां श्रृङ्गारामृतचन्द्रिकाः ।
साहित्यतरुमञ्जर्यः शालिवाहनसूक्तयः ।। ७८

गद्यपद्यप्रबन्धानां पङ्क्तयाष्टादशनाटकैः ।
साङ्गं प्राकृतकाव्याभ्यां साहित्यं शारदा व्ययात् ।। ७९

तेषां काव्यानुरोधेन प्रोढा वाणी भवेन्मम ।
चन्द्रसङ्गेन सरसेवामोदेन कुमुद्वती ।। ८०

कोऽप्यर्थं वाचमपरे रीतिमेके रसं परे ।
ध्वनिमन्ये विदुः प्राणान् काव्यस्य सकलं वयम् ।। ८१

कविसिंहेषु गर्जत्सु कटकेषु महीभृताम् ।
कुर्वन्त्यमङ्गलान् शब्दान् क्वचित् कुकविवञ्चकाः ।। ८२

अविज्ञायकलाः काव्यमाबध्नन्ति कवीश्वराः ।
पाषण्डेष्वेव किं लोके प्रकाशन्ते न वैदिकाः ।। ८३

शब्दानुशासनच्छन्दस्तर्कशिल्पकलादिभिः ।
साहित्यं सपरिष्कारं साम्राज्यमधितिष्ठ तु ।। ८४

कोटिशः कटकाः सन्तः कियन्तः क्षितिभृत्सभे ।
कारस्करा हि बहवः कानने न तु चन्दनाः ।। ८५

परप्रबन्धशब्दार्थपरिमोषणपातकी ।
न दण्ड्यः किं कविणो नरपालैर्विवेकिभिः ।। ८६

असूयारोपपापांशावाशङ्क्य नृपसंसदि ।
कविचोरा न सूच्यन्ते सद्भिः साहित्यपारगैः ।। ८७

अस्ति त्रैलोक्यनयनं तेजस्त्रैकाल्यकारणम् ।
त्रिमूर्तिसमवेतं यच्चिन्मयं ब्रह्म भाव्यते ।। ८८

मघोनः सह (श?जं) स्त्रष्टुरादिसृष्टिप्रवर्तकम् ।
मुरारेर्दक्षिणं चक्षुर्मूर्त्यन्तरमुमापतेः ।। ८९

पयोधरमुखात् तृष्णाप्रशान्त्यै समयोचितम् ।
प्रस्नुवन्ति पयोधारां प्रजाभ्यो यद्गवां गणाः ।। ९०

विहारभवनं लक्ष्म्या वेधसः सूतिकागृहम् ।
प्रबोधं प्रापितं (ता?) येन प्रसन्नेन नलिन्यपि ।। ९१

मर्त्यलोकं करेणाग्रमण्डले परिपूरितैः ।
अमर्त्यलोकमिन्दौ यदमृतैर्भावयत्यलम् ।। ९२

हृदयोपहितच्छायं यत्सायं मुक्तमम्बरात् ।
मुखलक्ष्मीकरं प्राहुर्मुकुरं त्रिदिवौकसाम् ।। ९३

हंसमात्मेश्वरं प्राप्य संज्ञामनुमजीजनत् ।
येन वर्णक्रमकृता सुवृत्ता जगती कृता ।। ९४

सगरो नाम संजज्ञे तत्कुले सत्कुलाग्रणीः ।
यशोदुन्दुभिरुद्दामनिस्वनो यस्य सागरः ।। ९५

ततो दुष्करदृष्टान्तः सुतोऽस्याभूद् भगीरथः ।
पूर्णं कीर्त्याथ जाह्नव्या पूर्वखातमपूरि यः ।। ९६

प्रभावाद् यस्य पाताले निपत्य सुरनिम्नगा ।
ऊर्ध्वमारोपयामास लोकमासेदुषः पितॄन् ।। ९७

दिलीपो नाम तद्वंशदीपो द्वीपानपालयत् ।
अष्टादश प्रतिष्ठाप्य धर्ममेकधनुर्धरः ।। ९८

एकोनशतया (योग? गोऽय) मिष्ट (मि? वि) श्वजितं रघुम् ।
अलब्धलब्धवर्णानामग्र्यो नन्दिन्यनुग्रहात् ।। ९९

सर्वस्य दातुर्मृत्पात्रशेषं यस्यावबोधयत् ।
यशो भूम्नास्य भूचक्रं मत्प्रमाणमिति ध्रुवम् ।। १००

यतो हि राघवाभिख्यां रघुवंशमहीश्वराः ।
श्लाघ्यामैक्ष्वाककाकुत्स्थशब्दाभ्यामपि बिभ्रति ।। १०१

तस्मादुचितशब्दोऽभूदजः सत्यापराजिताम् ।
परितो मुखरां वाचं परिष्कुर्वन् मुखस्थिताम् ।। १०२

नामेक्षणाभ्यां हरिणी नाकस्त्री या तयापि यः ।
नाम्ना मुखेन च क्षेण्यामिन्दुमत्या स्वयं वृतः ।। १०३

वैदर्भी प्राप्य सद्रीतिं माधुर्यादिगुणोत्तराम् ।
गान्धर्वशास्त्रयुक्त्या यः परान् सौख्यान्यमीलयत् ।। १०४

तन्नन्दनः प्रजानन्दं चक्रे दशरथो रथी ।
दैत्यखण्डनशौण्डीर्यः साह्यकृत्वा मरुत्वतः ।। १०५

सुकलः सुनृतालापः सुमेरोः सुरताग्रणीः ।
नदीष्णः सर्वविद्यानां नर्महर्म्यो जयश्रियः ।। १०६

सुत्रामसमराजय्यं यत्रातन्वति धन्वनि ।
अमुक्तेन्द्रायुधं व्योम नभस्तन्न सकृज्जहौ ।। १०७

उदग्रशुण्डारमुन्मनाः सागराम्भ सः... ।
वशेवाभूद् भुजस्तंभबन्धाद् यस्य वसुन्धरा ।। १०८

अपि सेवागतः शश्वदपि वंशक्रमागतान् ।
पथ्यार्पणाकृतज्ञोऽभूद् दण्डयन्नपराधिनः ।। १०९

त्रेकालिकीं नयदृशां ददर्श स्वपरक्रियाम् ।
अन्येषामपरिज्ञेयवृत्तिर्विधिरिव स्वयम् ।। ११०

सातपत्रे पुनर्यत्र सातपत्रा द्विषोऽभवन् ।
सुखानुभाविनि प्रायः सुखानुभाविनश्च ते ।। १११

द्विजेषु सामदानं च सम...ञ्च वैरिषु ।
आत्यन्तिकं प्रयुज्यासौ प्राप हस्तस्थितं फलम् ।। ११२

यथार्थस्यायतौ क्षिप्तौ न कालस्पर्शने तथा ।
स चेत् पर्वादियोगेन कामेऽस्य जितकाशिनः ।। ११३

नाधिकोऽस्य यदीशानो न तुल्यो दर्पणेन चेत् ।
न प्रत्यनन्तरोऽप्यासीद् यदि नेता दिवौकसाम्।। ११४

........द्वितीयगणा यस्य दुर्लभा तस्य वागपि ।
द्विभावद्वेषिणी जज्ञे कार्यं भेद्यं न कारणात्।। ११५

वाशिता पाशकाकृष्टिं नास्मिन्नाधोरणे यदि ।
नारवेटशक्तिः सैन्ये न सुराः स्थावरौ यदि।। ११६

प्रणायस्तस्य नालीके धन्विनः प्रियवादिनः ।
इन्दीवराणां सोऽप्यासीदिति नोत्सिषिचे मनः।। ११७

न पापतमसो हर्तुं प्रतापं पृथिवीपतिः ।
परं सवित्रा व्योमाब्धौ प्रवालस्तबकाधिकम्।। ११८

दुर्गाण्यस्य किलोदन्यः दण्डका हाटकाद्रयः ।
अर्थिभ्यो दातुमानीतरत्नेभस्वर्णराशयः।। ११९

जज्ञे जनपदस्तस्य जगदैश्वर्यजन्मभूः ।
आगुर्यदुत्तरारंभं कोसलं कुशलैरपि।। १२०

स्निग्धपत्रश्रियो यत्र पुष्परागाञ्चिताम्बराः ।
मित्रस्यापि गतेर्विघ्नं बालरामा वितन्वते।। १२१

साख्यो यत्र साख्यो लाङ्गलेषु तरङ्गिता ।
तन्वन्त्यैश्वर्यसाम्राज्यपट्टबन्धविडम्बनाम्।। १२२

शारदा कालिमा यत्र शालेषु च चकासति ।
मित्रेण वज्रिणा राज्ञो मेरुचूर्णा श्चार्पिताः।। १२३

न कल्पानन्तरो दाता न धन्यो धनदाधमः ।
नाब्धेर्यत्रासमो धीरो न द्वितीयः कृती गुरोः।। १२४

मृगाङ्को मित्रमसेति यत्र कृष्णमृगाद् ध्रुवम् ।
ईक्षणोरुत्पलारुण्यं स्थापयन्ति वने वने।। १२५

गर्जन्ति यद्व्रजोत्सुष्टा गौरीरमणकेतवः ।
कन्दान् महन्तो धर्मस्य जङ्गमा इव पुङ्गवः।। १२६

धूमो यत्र निशातीता त्रिदशादुत्थितः क्रतोः ।
स्वशून्यमिति किं रुन्धे स्वर्गवेलाकमहान ..... ।। १२७

यत्रैकेषु समारोप्य समान्हन्तीति किल हालिताः ।
म्रद्नन्तीक्षूंस्तदा यस्या द्वितीयः सागरो यथा।। १२८

अत्रासेः शुचिर्वृत्तान्तैः सप्ततन्तुनिबन्धिभिः ।
अत्राग्रहारैराश्चर्य भूयते श्रुतिभूषणैः।। १२९

यत्र दुर्भिक्षतां हन्तुं तटाकधनुरन्तरा ।
मुच्यन्ते सारणी बाणाः पूर्वं ज्याकृष्यते यतः।। १३०

श्वेतद्वीपश्रियं धत्ते शुचिभिर्यः सरोवरैः ।
अवतीर्णैर्हरेः पूर्वमशैरि पयोनिधेः।। १३१

विष्णोः प्राङ्मनसः पश्चादिति नेत्रा तथार्णवात् ।
ततः स्त्रीणां मुखाज्जातः शतशो यत्र चन्द्रमाः।। १३२

परार्ध सुरभिप्रायाः श्रीरोदन्यप्रसूतयः ।
लक्ष्मीं द्रष्टुमिवावृत्तादुहते यत्र धेनवः।। १३३

यत्सुरालयनिर्माणटङ्ककुट्टनटङ्क्रियाः ।
कुर्वन्ति कलुषक्ष्वेलक्षमध्वंसध्वनिभ्रमम्।। १३४

सुद्राभिषेकमुग्धार्द्रैस्तुलसीगन्धतुन्दिलैः ।
यज्ञधूमभरैर्यत्र श्रुतिरुच्छसितानलैः।। १३५

यवाश्वार्कखुरक्षुण्ण नारिकेरफलाम्बुभिः ।
विस्मारिताब्धिप्रणया वर्षन्ति स्तनयित्नवः।। १३६

अपश्यन्तो हारालापेऽप्यद्भुतं यत्र दृश्यते ।
तपस्यतो हरस्यान्तः सन्ततं पश्यतो हरेः।। १३७

सीमासु यो विवृणुते सीतोन्मेषं यथोचितम् ।
धार्तराष्ट्रकुलक्षोभं धत्ते वापीषु तत् कथम्।। १३८

यत्र सर्वेष्वमत्राणि सौवर्णान्येव भुञ्जताम् ।
प्रसवान्ततया प्रायः कम्पते कदलीवनम्।। १३९

फलेष्वारामचूतानां पाकपाण्डुषु मेलितम् ।
इन्द्रमावृण्वते यत्र भ्रान्त्यारुणपिपीलिकाम्।। १४०

कौमुदीष्वेव निर्बन्धाद् राज्ञो बलिसमर्पणम् ।
यत्र साराज्यनिर्धूतस्वाराज्येन कदाचन।। १४१

अमार्गणमधन्वानमस्ति त्रिंशमखेटनम् ।
अप्यावसन्ति स्थविरोपचापासिखेटिनः।। १४२

कीर्तिमानपि निष्पङ्कः सुधन्योऽपि सुधामयः ।
सनीतिरप्यनीतिर्यः सयमोऽप्ययमाश्रयः।। १४३

उदग्रकेतूत्पाते यः स्वर्भानुग्रहणेऽपि यः ।
न राजोपल्लवं धत्ते न सूर्यालोकमस्यति।। १४४

जनकभवने तस्मिन् निःसीमभूषणभूषिता ।
वसति सततं लक्ष्मीर्भागे चमत्कृतसौहृदा।। १४५

कृतशुभगतिस्तत्रासते न कृतार्थता ।
समयसुभगं वाहित्येनाभिवर्षति वासवः।। १४६

इत्युद्दामवरप्रसादकलिता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डशुण्डयनिधेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गोऽयमादिर्गतः।। १४७

द्वितीयः सर्गः

ततः श्रियं ताण्डवरङ्गशालां भूकाश्यपो भारतवर्ष भूषाम्।
रघुः प्रवीरः कुलराजधानीमावासयामास पुरीमयोध्याम्।। १

विभाव्यते या विभवानुभावैः सौभाग्यलक्ष्मीरिव भोगवत्याः।
वस्वोकधारावमनस्थलीव स्वर्गस्य साम्राज्य सुखासिकेव।। २

काञ्चीव यस्याः कलयत्यभिख्यां ककुत्स्थवंश्योऽवभृथोपयुक्त्या।
सरित् प्रसूता शशिनः सुधेव कासाररत्नात् कलहंसधाम्नः ।। ३

सत्राहराणां सरयूपकण्ठे राजन्ति यूपा यदधीश्वराणाम्।
पुण्यप्ररोहाः पुलका धरण्याः पुरातनानां वचसामुपघ्नः।। ४

संपत्सरस्या इव कूलबन्धः ताटङ्कमुर्व्या इव रत्नसालः।
अन्तश्चराणां द्विरदाम्बुदानां यस्याः परिक्षिप्त इवेन्द्रचापः।। ५

इक्ष्वाकुवंशस्य स एव मूलमितीव पर्यन्तचरं पतङ्गम्।
आरामपुष्पैरभिषिञ्चतीव वातावतीर्णैः प्रतिवत्सरं या।। ६

यत्राम्बरोत्तम्भनहेमवप्रपर्यन्तपूर्णात् परिघाच्छलेन।
आवृत्य हेमाचलमम्बुराशिः प्रायेण विन्ध्यप्रणयान्निरुन्धे।। ७

वीथीषु यस्यां तमसावृतासु विनिर्गतानामभिसारिकाणाम्।
रागः प्रदीपो रजनीव यस्याः पादौ दृशौ पञ्चशरः सहायः।। ८

वातायनाद् यस्य पलायमाना वलाहका भान्त्यचिरप्रभाभिः।
चोरा इवाहृत्य सुलोचनानां कान्तिं शरीरात् कनकाभिरामाम्।। ९

यत्रोच्चकैर्गारुडमण्डपानामंशुप्रवाहेष्वविभावनीयान् ।
मञ्जुस्वनाभिर्मणिकिङ्किणीभिर्मार्ताण्डरथ्यां मरुतो विदन्ति ।। १०

सौधाङ्गणाद् यत्र निशात्ययेषु शुद्धान्तवृद्धा मणिशोभिनीभिः ।
उत्सारयत्यूर्मिमरुद्विकीर्णां व्योमापगाहेमसरोजधूलिम् ।। ११

माणिक्कचन्द्रोपलमण्डपानि पुष्यन्ति यस्यां दिवि पुंष्पवत्ताम् ।
आद्यः पुमानक्षियुगं निमील्य पयोनिधौ किं परया शयीत ।। १२

क्रीडापगा यत्र कुमारिकाणां हिमाम्भसो हेमसरोजकोशाः ।
कल्हारवत्यो नवपद्मरागैः कर्पूरधूलीपुलिना वदन्ते ।। १३

अभ्रं लिहेष्वन्यतमाय मानं सौधेषु सान्द्राम्बुदगर्जितेषु ।
आधोरणो यत्र विलेप्तुमीष्टे महेन्द्रनागं मदसौरभेण ।। १४

यद्गोपुरेष्वर्करथाश्वपादैः सञ्चारितं सागरगर्भपङ्कम् ।
प्रक्षालयन्तो पवनावधूता स्रोतस्तुषाराः सुरलोकसिन्धोः ।। १५

श्रृङ्गरघण्डाद्वयदर्शनीयं माणिक्यमुद्यन्मुखपद्मशोभम् ।
यत्रोल्लसद्विभ्रम भग्नमास्ते .... तदत्यप्रतिमानरूपाः ।। १६

क्वचित् प्रसूनैः क्वचन प्रवालैः कुत्रापि यत्रालिकुलैरुपेता ।
उद्यानभूः सत्वरजस्तमोभिरुन्मेषिणीव प्रकृतिः समिन्धे ।। १७

अरोहबिम्बादवतारिणीभिः काञ्चीकलापद्युतिकन्दलीभिः ।
यत्राङ्गनानां क्रियतेऽन्तरीयं पट्टांशुकप्रावरणं प्रयासम् ।। १८

प्रभिन्ननागा सकविप्रकाण्डा हरिप्रचार्या कमलाभिरामा ।
वासद्वया....पुण्डरीका राजद्विषां यद् विपणिर्व्यनक्ति ।। १९

श्यामासु यत्सौघशशाङ्ककान्तपूरेण सिद्धाध्वनि पूर्यमाणे ।
विवृण्वते केवलमारवेण व्योमापगा............ ।। २०

उत्तंसिकात्तेन्दुनभोनदीकैरुद्यत्सुवर्णांशुजटैः शिरोभिः ।
सपद्मरागेन्द्रमणिप्रकाशाः शम्भोस्तुलां बिभ्रति यत्र सौधाः ।। २१

........................णन प्रकीर्णविद्युद्वलयाः पयोदाः।
उद्धान्तरोषाग्निकणा इवोच्चैर्गर्जन्ति यत्रोपगृहीतचापाः।। २२

सुधा पुराणी विरसेति शङ्के सुभ्रूजनास्वादिमनिर्भरा..........।
....यातया मन्यमृतान्तराणि वर्षन्ति यस्यां वचसां विलासैः।। २३

जनैः समूढात्मभिरप्यमूढैः लक्ष्मीश्वरैरप्यजनार्दनैर्या।
दानोत्तरैरप्यपदानशीलैर्भात्यद्वितीयैरपि सद्वितीयैः।। २४

वनप्रथायत्र वराङ्गनानां वाचा सुधास्यन्दमुचात्रगन्धाः।
प्रत्यग्रकङ्केलिनवप्रवालमध्यस्रजो वह्निमुचा विशन्ति।। २५

आरुह्य चन्द्रोपलचन्द्र... चन्द्राननाश्चन्द्रमरीचिसान्द्राः।
विवृण्वते यत्र विपाण्डुरत्वं कान्तस्य विश्लेषमृतेऽपि कान्ताः।। २६

यस्यां युवानो रमणीः समीक्ष्य प्रभोर्मिलेषु स्फटिकाङ्कणेषु।
मग्ना इति .... सुजास्तरीतुं ताभिः परं सस्मितमाद्रियन्ते।। २७

सौधस्पृशं यत्र चकोरनेत्राः शशाङ्करेखां स्मरचापयन्ति।
आबध्य मौर्वीमणियष्टिमौर्व्या सन्धाय कर्णोत्पलबाणमन्तः।। २८

प्रवालमण्याभरणः सबालचन्द्रोदयाश्चञ्चलनीलवेण्यः।
यस्यां समुक्तावलधारमण्यो विभान्ति वेला इव मन्मथाब्धेः।। २९

रत्नांशुगर्भा स्मरयन्ति रथ्या यस्यां गजैर्गर्जितसापराधान्।
आकृष्य मेघादवतारितानामिन्द्रायुधानामिव रोहितानाम्।। ३०

रत्नातपार्ता इव यत्र हर्म्य रक्ताः पताकारसनः प्रसार्य।
वर्षागमे वारिदकर्करीभ्यः पयः पिबन्त्यभ्रमणिप्रपायाम्।। ३१

निशासु नीलध्वजवैजयन्तीं शलाकया शौरिदृशः सुधांशोः।
ययार्पितं कज्जलमेव भाक्तमृगः शशो वेति वृथा वितर्कः।। ३२

क्वचित् प्रवालैः क्वचिदिन्द्रनीलैः विनिर्मिता यत्र विभा (ति? न्ति) हर्म्यः।
अहस्त्रियामन्वितपार्श्वभूमे राक्षिप्य लक्ष्मीममराचलस्य।। ३३

उद्यानकर्पूरलतारजोभिरुद्गत्वरैरूष्मलमर्कबिम्बम्।
या लक्ष्यते दक्षिणमक्षिताभ्रं प्रसादयन्तीव हरेः प्रभाते।। ३४

उद्दण्डमुक्ताव्यजनोपकण्ठे ध्वजाग्रलग्नं तुहिनांशुबिम्बम्।
हर्म्येण यस्यां हरिणार्भकेण विन्दन्ति राकासु परं मृगाक्ष्यः।। ३५

प्रसेदुषी यत्परिघांयुगर्भछायागतव्योमतया व्यनक्ति।
गाम्भीर्यगर्वग्रहमन्युनेव निगीर्य निःशेषमपां निधानम्।। ३६

राज्यागमस्य प्रणवं विधीयं वप्रं विदुस्तद्वय ...मनामः।
कामात् समारतसममस्तलोक संपन्मृगीस्थावरकूटयन्त्रम्।। ३७

आपातिनीनामधनप्रभाणां प्रवाह एव प्रमदाजनानाम्।
पुष्णाति यत्र स्तनकुम्भशोभां कोलाहलं कुङ्कुमपङ्कलेपः।। ३८

अनङ्गतां प्राप्य यदङ्गनानामादाय रोमावलिखड्गरेखाम्।
मध्येः परं मारणकर्मकारी कन्दर्पशौर्यं कविलोकवादः।। ३९

आक्षिप्यचेलामयथाप्रलापामामीलिताक्षीमलसामवस्थाम्।
मदोपदेशादिव मानवत्यः पुष्णान्ति यस्यां पुरुषायितेषु।। ४०

नेतुर्मुखैर्यत्र नितम्बिनीनां साद्दश्यमाकृष्टसरोजशोभैः।
पूषा पुनः पूरण भावनानि कालं कियन्तं कलयेत् सुधांशोः।। ४१

स राजहंसाश्चलपुण्डरीकाः सपद्मरागाः सविलासभोगाः।
यद्वीथयो धैर्यजितस्य राज्ञो बन्दीकृता नार्य इवार्णवस्य।। ४२

मूर्च्छलमुक्ताफलहेमधाम्नि तारस्वनाद् दुन्दुभि सौधपङ्क्त्याम्।
सहर्षशोभाः समयेऽपि यस्यां चकोरचक्राह्वमयूरहंसाः।। ४३

मुग्धस्मितैर्यत्सुदृशां मुखाब्जैस्तुलां समारोपयितुं स्वबुध्या।
दिवारविन्दस्य ददातु लक्ष्मीं कुतो निशायां कुमुदापराधी।। ४४

प्रसाधनं पत्रपरं स्वभावः कार्ष्ण्याय कालाञ्चनमीक्षणानाम्।
कर्णावतंसाः सुद्दशां कटाक्षाः नीलोत्पलन्यासकलानिकाराः।। ४५

तारााणि पुष्पप्रकरेषु रत्नकुम्भेषु भानुर्द्युसरिद्ध्वजेषु।
मुखेषु चन्द्रः सुदृशां च यस्यां सौधोच्छ्रयाल्लक्षयितुं न शक्यम्।। ४६

प्रशासतः पङ्क्तिरथस्य तस्यां वसुन्धरां वासवतुल्यनाम्नः।
बभूव न क्वापि विपक्षशब्दो यद्यस्ति तर्केष्वटवीषु यद्वा।। ४७

स्थिरा गभीरा बलिनः प्रदीप्ताः सतामभीष्टा विभवः ससत्वाः।
प्रतापयन्तः सचिवान् बभूवुरमुष्य शंभोरिव मूर्तयेऽष्टौ।। ४८

भ्रूक्षेपलीलाप्रवणैर्मुखस्थैः शुचिप्रचारैः श्रुतिपारगैश्च ।
समन्त्रिभिः सर्वजगत्प्रवृत्ति ददर्श नेत्रैरिव पद्मजन्मा।। ४९

बभूव नो वन्दिजनः कदाचिद् यद्यन्तरात्र्यन्तविबोधनेषु।
जलाशयस्वीकृतजीवनत्वं वर्षोन्मुखेष्वेव वलाहकेषु।। ५०

संरक्ष तद्वादशमण्डलश्रीरालोकनिर्धूतमः प्रसङ्गाः।
वसुश्रियानन्दितचारुचक्रो वंशप्रभोर्वैभवमाससाद।। ५१

आज्ञापराद्धानपि भूमिभर्तुरालङ्घितं ......स्मृपदिष्टमार्गान्।
शुचीनरक्षन् स्वजनस्य सीम्नि दण्डं विवव्रुः सचिवा यथाहि।। ५२

श्रुत्याः प्रमाणं वचनं द्विजानां वाक्यं द्वितीयं वसुधाधिपस्य।
तच्छासनं मन्त्रिगणस्य जज्ञे तदीयमादिष्टमिव प्रजानाम्।। ५३

अलब्धभावा वदनप्रवृत्तिरवक्रभावादभुजङ्गसङ्गः।
अगोत्रभित्वादकृतर्षिमन्यु कृत्वा न दोषान् क्षिपति स्म राजा।। ५४

वसुन्धरान्दुन्यपदुःखसिन्धोरुत्तारयत्युत्तरकोसलेन्द्रे ।
परं वसूनां प्रथमोपभोगे नीवीनिबद्धा हरणभियोगः।। ५५

नोपप्लवं दर्शयति स्म लोक्ये न धाम चक्रभ्रमशाम्यदू (ष्म?)।
नाक्रन्दयन् नाथ इवायमानामात्मोदयेन क्षितिमण्डलानि।। ५६

उत्पादयामास पतिः प्रजानां प्ररोह्य एवाहिभयं प्रबुद्धः ।
नखप्रसार्यस्य ननु प्रमादात् परस्वपेक्षी परिहास्य एव।। ५७

वेदेषु धातेव पुमानिवाद्यो लोकेषु नेत्रेष्विव नीलकण्ठः ।
चक्रे पुमर्थेषु गतिं स दृष्टां स पार्थिवस्त्रीष्वपि सावधानः ।। ५८

करीन्द्रनीरन्ध्रमदाम्बुपाकः कतुक्कतिम्यत्कनकाङ्कुराणि (?) ।
अमुष्य वैदुष्यरसानुभूतिं चचक्षिरे साक्षरमन्दिराणि ।। ५९

कैकेय्युदग्रा सुमुखी सुमित्रा कल्याणिनी कोसलकन्यका च ।
लब्ध्वा पतिं रक्षितरूपशीलाः तं शक्तयस्तिस्र इव व्यराजन् ।। ६०

अकृत्रिमालापमृदुस्वराणां हंस्वानुसारिस्वपदक्रमाणाम् ।
धर्म श्रुतीनामिव पावनीनां योगेन तासां रुरुचे नरेशः ।। ६१

विश्वंभरां विक्रमभूषणेन निष्कण्ठकीकृत्य निजेन दोष्णा ।
अभुङ्क्त ताभिः प्रणयोत्तराणि वीरे रघूणां विषयान्तराणि ।। ६२

ततः कदाचित् तरुणीसखस्य शैत्यावलेपं शमयन्ननेहाः ।
पुष्पाकरः पूर्णमनोरथस्य सेवाकृते तस्य कलाविरासीत् ।। ६३

उदङ्कुराणां वकुलद्रुमाणां पत्रैः पुराणैः परितो विकीर्णैः ।
दिग् दक्षिणा पाण्डुमुखी तदानीं गर्भस्थितं गन्धवहं शशंस ।। ६४

शनैर्हिमे शाम्यति वञ्चुलानां पवोद्गता पल्लवकन्दलश्रीः ।
अङ्कूरिता सीदति चन्द्रधामन्यनूरुरागश्रियमन्वकार्षीत् ।। ६५

निशीथतत्स्थूलपटावकुण्ठमामध्यमह्नामजहान्न लोकः ।
आरभ्य माध्यन्दिनमानिशीथमवस्त वासांस्यतिकोमलानि ।। ६६

सीमन्तिनीसीत्करणोपदेष्टा प्रालेयवर्षी पवनः शशाम ।
अवातरन्मन्दमगस्त्यशैलादामोदवान् गन्धवहप्ररोहः ।। ६७

प्रालेयपांसून्यपसार्य कुन्दैः प्रकीर्णभूमिः प्रतिपादपाग्रम् ।
मन्दानिलः पल्लवदीपदानाच्चक्रे वसन्तागममण्डलानि ।। ६८

चूतप्ररोहास्वदनोन्मुखानां स्वधामुखीभि सरकन्दलीभिः।
उदञ्चितः किञ्चिदुपात्तरागं कण्ठोपकण्ठान् कलकण्ठयूनाम्।। ६९

अपास्य कालेयदलेन्धनेषु हसन्ति का हव्यवहेषु वाञ्छाम्।
निरस्तनीहारकणेषु लोको जातादरोऽभूज्जठरातपेषु।। ७०

सिषेविरे नूतनपुष्पशय्यां सौधेषु सायं सरसीरुहाक्ष्यः।
अन्तर्गवाक्षेष्वररीनिबद्धान् उद्घाट्य मन्दानिलकन्दलानि।। ७१

उत्कम्पिनीमुत्भटरोमहर्षामारब्धसीत्काररुतामवस्थाम्।
तुङ्गस्तनीनां तुहिनात्ययेषु पुंभावलीला पुनराबबन्ध।। ७२

अपास्तवृन्तश्लथपुष्पशुष्यदम्लासवां कुन्दलतां द्विरेफः।
आमोदगर्भप्रथमासवार्द्रामारा (म) माकन्दलतामयासीत्।। ७३

पुनः पुनः पुण्यजनेश्वराशां दिनेश्वरे याति जगत्प्रदीपे।
अन्वक्षमस्याविरभून्मनोभूरारुह्य मन्दानिलमात्तधन्वा।। ७४

मनस्विनीमानमतङ्गजानां रक्ताङ्कुशा रक्तपलाशकोशाः ।
प्रापुर्निवीताध्वगशोणितस्य दंष्ट्राश्रियं दर्पकराक्षसस्य।। ७५

आन्दोलिताश्चन्दनशैलवातैः आरामकङ्केलिलताप्रवालाः।
जिह्वा इव प्रोषितजीवितानि कामस्य रेजुः कवलीचिकीर्षो।। ७६

पलाशकोशैः प्रकटीबभूवे चिकीर्षिता प्रोषितचित्तलाभम्।
प्रताप्यमानाभिरिव स्मराग्नौ कालेन कालायसशङ्कुशाभिः।। ७७

सहस्रशः कार्यतया वहन्ति स्वरूपहान्या ननु कारणानाम्।
पादप्रहारादनघात् सुकेश्याः प्रादादशोकस्य किल प्रवालान्।। ७८

मैरेयगण्डूषमरालकेश्याः शङ्केनिपीतावकुलः कृतज्ञः ।
तमेव तत्कन्दलबान्धवानां पुष्यन् क्षणात् प्रादित षट्पदानाम्।। ७९

विमर्दिता निर्दयमानताङ्ग्या वीतोपमेन स्तनमण्डलेन।
कुरण्डवल्लीकपतेव गुच्छ व्याजाद् ददौ मूर्धनि तद्विपक्षान्।। ८०

उद्वीक्षणैरुत्पललोचनानामूरीकृतानां तिलकद्रुमाणाम्।
मायामयी प्रागभवत् प्रसूनं मालाधुना सैव बभूव सत्या।। ८१

सौरभ्यमाधुर्यरसप्रकर्षः सङ्गीतके स्यादिति सत्यमेतत्।
गीत्या सुकण्ठ्या मधुगन्धगर्भाः प्रादुर्बभूवुः प्रसवाः प्रवाले।। ८२

आमोदपुष्पाभरणाभिलाषी स केवलं चन्दनशैलवातः।
तादृक् प्रसूनं किल सिन्दुवारे तन्व्याः प्रदिष्टं मुखमारुतेन।। ८३

सत्यं स्वदन्तं सुदृशां गिरो यत् वनप्रियाणामपि पञ्चमेभ्यः।
पूर्वं ततस्तेष्वपि कर्णिकारस्ताभिः परं संभृतदोहलोऽभूत्।। ८४

त्रियम्बकस्त्रीणि पुराण्यधाक्षीत् कोदण्डकं मेरुमितीर्ष्ययेव।
मारः प्रफुल्लेन न मेरुणाभूत् निबद्धधन्वा त्रिजगज्जिगीषुः।। ८५

स्वपाणिना चूततरुं स्पृशन्त्या नखाङ्कुरे न्यासवशान्नताङ्ग्याः।
पुष्पोत्करैः पूर्वमभावि तस्मात् प्रादुर्बभूवे तदनु प्रवालैः।। ८६

रागः स्फुटोऽभूद् वदने रमण्याः प्राक् चम्पकस्य प्रसवेषु पश्चात्।
मधुव्रतानामथ शिञ्जितेषु यूनां ततञ्चेतसि रूढमूलः।। ८७

प्रदीपितं चम्पकदीपिकाभिः प्रधूपितं भृङ्गपरम्पराभिः।
वाचालितं कोकिलघण्टिकाभिः वनं सुराराधनमण्टपोऽभूत्।। ८८

अग्रप्रवालोल्लसदङ्कुरश्रीरारामचूतः स्फुटमाबभासे।
जेतुः पुरा बाण इवोज्जिहान : फलोल्लसत्पावकचन्द्ररेख :।। ८९

न केवलं वामदृशो बभूव डोलोत्सवः प्राणसमाङ्कभाजाम्।
रसालशाखास्वपि कोकिलानां रागस्पृशां मारुतकम्पितासु।। ९०

सपुण्ड्रकचमत्क्रियाः सरहसप्रियालापिनी-
मृदुश्वसनहारिणी विधृतकाञ्चनालङ्क्रियाः ।
सुगन्धिनवमालिकाः सुरभिमासलक्ष्मीरिव
स्वयं तनुमतीः प्रिया रमयति स्म रागी नृपः ।। ९१

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डशुण्डयनिधेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गो द्वितीयोऽगमत् ।। ९२

तृतीयः सर्गः

ततः स्मराद्वैतगुरौ वनश्रीरसायने पञ्चमरागरङ्गे।
विप्रोषितप्राणविरामशापे मरुच्छिशोर्वै जनने वसन्ते।। १

अन्वीतलीलश्चललक्ष्यवेधे हन्तुः पुराणामधिपः पृथिव्याः।
व्यायामकार्कश्यविशेषदोग्ध्रीं विहर्त्तुमैच्छन्मृगयां महेच्छः ।। २

पद्मेक्षणा वाशकपानकेलिः पराङ्मुखस्यापि च पार्थिवस्य ।
आखेटरोगोऽजनि हन्त यद्वा सतां हि दोषोऽप्यवधौ गुणः स्यात्।। ३

अथौषसं कर्म परार्ध्यकर्मा निर्माय संमानयता बुधानाम्।
आरुह्य पर्याश्रितमापवाह्यं वनं प्रतस्थे वलभित्सहायः।। ४

समस्तहिंस्रक्षतये तरूणां हरित्पलाशावरणोपहारम्।
वनश्रिया दत्तमिवातिरम्यं तत् कञ्चुकं श्यामलमाबभासे।। ५

विगाह्य ते वातमृगैर्मृगव्ये विपत्स्यती वा स्वविरोधिभिश्च।
इतीव कृत्वा हृदयेजहेषे वाहप्रभोर्वल्गितपूर्वकायः।। ६

स्मृत्वैव हव्यं (मम) रक्तपानं प्रलम्बयन्ते रसना प्रवालान्।
आवृत्य पूर्वा मृगशावबद्धां नाबद्धलाङ्गूलनिभां दधानः।। ७

गृहीतसत्त्वातिशया गजानां कर्णाञ्चलाकर्षण साहसेऽपि।
वनाय भूभृत्कटकावतीर्णाः कृशोदराः केसरिणामिवाशा।। ८

आवर्जितैः श्रोत्रपुटैरसहयैर्वेगानिलेनेव विकृष्यमाणा।
आघ्राय गन्धानभितो मृगाणां क्रोधादधावन् सरमा कुमाराः।। ९

कर्णान्तराबद्धवराटदाम्नां कक्ष्यानिबद्धाञ्चल वारिधीनाम्।
किमन्तरं श्रृङ्खलभूषणानां किरातकौलेयकमण्डलानाम्।। १०

सदीपकैण्यः सह कीलबद्धवितंसभारा विकटाः शकट्यः।
आकण्ठवग्राभरणं मृगाणामासूत्रयन्तं स्तनितैरधावन्।। ११

विडम्बने पक्षिमृगस्वराणां विमोहने गानविधौ विदग्धाः।
अंसापिन प्रतिसीरमन्ये संजज्ञिरे तेन समेतघण्टाः।। १२

उत्पात धूमोद्गमनैर्मृगाणां समुत्थितैस्तस्य चमूपरागैः ।
अदृश्यरूपां गतवत्यवस्थामत्याहितेनेव वनान्तभूमिः।। १३

आगमिनीं तच्छरवेधनानां प्रागेव शङ्के प्रतिबोधनाय।
श्रृङ्गप्रमाणादश्रवणान्तरेण हिंसा प्रजानां हृदयं विवेश।। १४

आगम्युदागम्युदपाद्यपातिन्यहार्यरोहिन्यशमिन्यशामि।
आरोह्यवारोह्य हृषि व्यषीदिन्यषन्त्यभिप्याशु वने निषादैः।। १५

तूर्यध्वनिस्तूर्णमुदञ्चितोऽस्य बभञ्ज गर्भं मृगगर्भिणीनाम् ।
पुनर्मृगव्याध यथा विधात्रा मृग्येत तिर्यक्परमाणुवर्गः।। १६

उत्सृज्य पूर्वस्थलमुत्पतद्भिः पतद्भिरन्यत्र विवर्तमानैः।
शनैर्विनाष्टपदभूमिकासु शरित्वमापेत गुडाक्षपातात्।। १७

श्वभिस्तथा श्रेणिरभूद् ग्रणीता वक्रक्रमाद् वञ्चयतां शशानाम्।
यया विशिष्येत शशस्त्रिलोक्या हिमत्विषो लाञ्छनमेकमेव।। १८

निरुद्धदिक्वं निनदेन मौर्व्याः कण्ठीरवस्वापकदर्थनेत।
कोदण्डमाबद्धशरं रधूणां कुलोद्वहः कुण्डलयाञ्चकार।। १९

निशभ्य चापस्वनितं नृपस्य त्रासान्मृगीभिः शरणार्थिनीभिः।
निर्वर्णनैरस्य विघूर्णमानैः नीलोत्पलोपायनमेव निन्ये।। २०

हिंस्रादयाला? शरलक्षधान्यानस्माक्षमाहार इदं किलेति।
अनक्षरं प्राहुरवाग्रतोऽस्मै कुशाङ्कुरग्रासमुखाः कुरङ्गाः।। २१

प्राप्तास्तदन्दः पुरिकावलोकात् पराजयोऽस्माकमितीव भीत्या।
कदम्बके ग्रस्ततृणे मृगाणां ककुस्थवीरः करुणामकार्षीत्।। २२

अस्मारयन्नैन्दुमतेयमादौ नाम्ना जनन्या जननान्तराख्याम्।
अक्ष्णा व्रतः कामिनमाकुलेन सुभ्रूकटाक्षं सुभगं हरिण्यः।। २३

मृगी स्तनोत्कण्ठिषु शावतेषु ग्रासाकुलांस्तानपि कृष्णसारान्।
सहायदेहं समवेक्ष्य तत्र प्रत्याहरत् पत्रिणमेकवीरः।। २४

इन्दीवराण्यक्षिभिरुद्वमन्तीष्वेणीषु राज्ञः स्वयमर्धचन्द्रः।
प्रायो जिहांसां प्रणयादहासी दहिंस्त्रकार्यस्य दयापदेशः।। २५

तच्चापनिर्घोषभयाकुलत्वात् पादैरमार्गप्रसृतैरलक्ष्यम्।
वराहयूथं वनगह्वरेषु निजस्थितैर्निश्वसितैर्ववव्रे।। २६

अग्रे तमाकर्ण्य विकृष्टचापमालोक्य वेगादवधावमानः।
शल्यः शलैः शौर्यरसप्रहर्षः प्ररूढरोमाञ्च इवावभासे।। २७

सीमन्तमन्तःपुरगर्भिणीनां उन्नेतुमेता उचितास्तवैव।
इतीव विद्धाङ्गविधूतलक्ष्म्याः शल्यैः शलल्याः पुरतोऽस्य मुक्ताः।। २८

येऽश्वा विडच्छिन्नशलास्तदस्त्रैर्ये विद्धगात्राः परितो पराहाः।
वितेनिरे किं निजविग्रहाणां परस्परं ते परिवर्तितानि।। २९

शिलीति नाम्नो रलयोरभेदात् सिद्धाय राज्ञा प्रतिकुप्यतेव।
मुक्तस्य बाणस्य फलेन शल्यशब्देर्षयाऽश्वा विडवेयिशङ्के।। ३०

जिहांसया सत्वरमीरितानां शल्यस्य यद् यद् विवरं शलानाम्।
स तत्र तत्राशु निधाय बाणं वीरक्रियाव्यत्ययमाततान।। ३१

स शृङ्गभङ्गं महिषस्य चक्रे शाङ्र्गाय शाङ्र्गायुधमानिनी यः।
ररक्ष शङ्के यमवाहनत्वात् प्राणेष्वमुं सूर्यकुलप्रदीपः।। ३२

अधूर्णदापाटलनेत्रमन्यमभिद्रुतं सत्रतमश्वचक्रम्।
विधाय विच्छिन्नविषाणवालं प्रादर्शयद् वाहकृतघ्नभावम्।। ३३

नीराजने काममभी हयानां बलिक्रियार्हा इति चण्डिकायाः।
नाखण्डयत् खण्डयिता खलानां काण्डैरकाण्डे महिषान् महीशः।। ३४

यत्पूर्वतोऽप्यस्त्रविलूनश्रृङ्गा स्तदस्यभूतं प्राद्रवदश्ववैरी ।
तं भीतिमत्तो तरुजास्य हेतुः किं भारलोपः किमपत्रपा वा।। ३५

तस्याग्रतश्चन्द्रकिणां चकाशे परम्परा व्योम्नि तिरः पतन्ती।
मृगव्यालीलाकरणाय वृष्णासङ्ग्रामबद्धास्त्रि.......... तार्पितेव।। ३६

व्यालद्विषत्संमुखवाहजात्य यो नीलकण्ठस्य बिभर्ति नाम।
स्थाने नृपस्तत्र महाजिघांसां न तु प्रियाकेशविरोधमैच्छत्।। ३७

अखण्डयद् गन्धकशृङ्गकाणां स खड्गिशब्दग्रहणक्रुधेव।
व्याजो बभूवास्य परं पितॄणां निवापपातीकरणाभिलाषः।। ३८

निसस्रुरग्रेऽस्य निरस्य गुञ्जांस्तापिञ्छगुच्छवयोऽच्छभल्लाः ।
तेनार्कवंश्येन सचेतनत्वात् तमाः कुमारा इव योद्धुकामाः।। ३९

स्याच्चेद् विवेकस्य गुणस्तिरश्चां ततश्च मान्याश्चमरा भवेयुः।
बालाश्च येषां विषयाश्च पार्श्वे बालाकवान्दोलनभाग्यलक्ष्म्याः।। ४०

स पुण्डरीकहृदयानुषक्तं कादम्बमुच्चैर्दलयन् वनान्ते।
प्रतापशीलः प्रथयांबभूव वंशोद्भवं सारसवल्लभस्य।। ४१

तस्यार्धचन्द्रः किल फुण्डरीकं संहृत्य सन्दर्शित पक्षपातः।
तत्राजहारोत्पलदालकानि व्यस्तानि वैरादिव गाढमन्तः।। ४२

यत्साम्प्रतं संभृतगोधनानां मार्गागतप्राणभृतां क्षमं यत्।
युक्तं यदात्माभिमुखोद्गतानां मृगद्विषां तद् विदधे स वीरः।। ४३

व्याध्रस्तदान्यप्रतिवर्णबीजविद्धस्तदस्त्रैर्व्यधयोत्पपात।
सालाग्रलग्नः स यथा सपक्षशूलाग्रमारूढ इव स्वयं स्यात्।। ४४

आकर्ण्य शब्दैकमथान्तरिक्षमाखेटसंरम्भममुक्तधैर्याः।
कण्ठीरवः स्वापरसान्निरीयुःकण्ठीरवाः पर्वतकन्धरेभ्यः।। ४५

एकैकशः केसरिणो गिरीणां दन्तानिवोत्पाट्य गुहामुखेभ्यः।
अखण्डभृत् क्षोणिभृदारव्ययेव कृताभ्यसूयः क्षितिलोकवज्री।। ४६

पत्युः प्रजानामपि पाञ्चमुख्यं विष्णोर्हरित्वं न वृथा किमेषाम्।
इति क्रुधा दण्डयति स्म राजा सिंहान्न सेनाभगजप्रमाथात्।। ४७

रराज कक्षोल्लसदर्धचन्द्रः शशप्लुताङ्का सह रत्नबिन्दुः।
बालेव भूतावनभूर्विसृष्टचित्राङ्गराग श्लथपत्रवल्ली ।। ४८

अनृक्षमुच्चित्रशिखण्डिपातं स्यन्दन्मृगान्त्रं हतसिंहराशि।
कुर्वन्ननन्तं गगने खगेन रक्तोत्पलोल्लासकरो रराज ।। ४९

असाध्य निद्रा तमसां हरीणां शिखावलानां शरदागमेन।
एवं नृपस्याजनि सैरिभाणां ....महामृगयोद्यमेन ।। ५०

स खड्गवल्गत्कदलीकमुद्यद्गन्धर्वदन्तिभ्रमदच्छभल्लम्।
रणं यथा खेटकरेण राज्ञा स सिंहनादं शमितं वनं तत् ।। ५१

न केशदन्तं नखमप्यमान्यं स्थानच्युतं यज्जगृहेऽस्य सैन्यम्।
बालं चमर्या हरिवञ्चितस्य नागस्य दन्तान्नगरं मृगारेः ।। ५२

भ्रान्तः सिषेवे वनदेवतानामालक्ष्यमाणोऽलकसौरभेण।
ककुत्स्थवीरस्तमसापगाम्भः कणोत्किरा काननमारुतेन ।। ५३

वियत्पथोल्लङ्घनविस्वलेषु पिपासयैव प्रथमेतराब्धिम्।
विवश्वतश्चेष्टविहङ्गमानेष्वस्या विशश्राम हयस्तदानीम् ।। ५४

रत्नैरिवाध्राय मृगारिमुक्तैरेजे दिनापातमहीव सन्ध्या।
निमीलितं तत् किल पद्मिनीभिराक्रन्दितं च द्विजमण्डलेन ।। ५५

विरम्य रम्यो मृगयाविहारात् परिस्तृतं पल्लवपूलिकाभिः।
सकायमानं समयानुकूलं पितायमानास्तरुणं विवेश ।। ५६

अदृष्टदीपौषधिराहरन्तु प्रदीपिका पल्लवतल्पशायी।
स यूथविभ्रष्टरटत्कुरङ्गस्तनन्ध्यां तत्र निशां निनाय ।। ५७

अथोषसि क्ष्मापतिरौपवाह्यमधिष्ठितः कष्टशरासयष्टिः
शार्दूलमुग्रं स समग्रधैर्य कपर्दिवन्निर्दयमुन्ममर्द ।। ५८

स (रौरवो) मार्गमथ प्रगृह्य प्रचोदिताश्वोऽनुचरैरदृश्यः।
अवाप सावापकरात्तचापस्तमालनीलं तमसोपकण्ठम् ।। ५९

कुम्भस्वने तज्जलपूरणोत्थे तद्वेधिहस्तध्वनिशङ्कयास्त्रम्।
तत्रास हन्ता तरवन्तु पश्चात् निशम्य तस्य व्यचिनोन्निनादम्।। ६०

पुत्रं मुनेरस्त्रफलेन विद्धं स्वयं च दुष्कर्मफलेन विद्धः।
उत्तानमस्या मदपूर्वकुम्भविस्रस्तगात्रं विवशं ददर्श।। ६१

हयाधिरूढेऽनुशयाधिरूढे स पृच्छतीहालपवाक् स्वपित्रोः।
शशंस वर्णं चरमं च यस्य स्वभावमान्ध्यं स्वपितुः स्थितिं च।। ६२

तदीरिते राज्ञि तमाशु नीत्वा निवेदिताराम नृशंसभावे।
तथा मुनिद्वन्द्वमिदं व्यलापीद्यथा विवर्तः करुणस्य भूयात्।। ६३

उत्खातशल्येन तदीरितेन निमीलिते तत्र नृपेण पुत्रे।
वृद्धान्धयोर्विह्वलयोः किमन्यच्चैतन्यमर्योऽपि दृशो विनेशुः।। ६४

सदारमस्यानुगमाय भर्त्रा स याचितां साग्निचितामसुष्मै ।
असन्ततिः सन्ततिहेतुमस्य शापं प्रसादं तममंस्त राजा।। ६५

प्ररूढतापातिशयोऽभिवृद्धेर्विवस्वतः कारणमातपः स्यात्।
आजन्मवन्ध्यस्य महीरुहस्य यथोपरागे मुसलप्रहारः।। ६६

तालस्य दाहोऽपि यथा तथास्य शापः कलानुग्रहणाय जज्ञे ।
प्रियं यथा त्र्यक्षतदुःखमाजौ तथायमित्येव स पुत्रशोकम्।। ६७

.... ।
धीरो गुणीकृत्य ननन्द यद्वा प्रमाणमेवानुभवो रसानाम्।। ६८

दंपत्योरनयोश्चितां ससुतयोः प्रज्वाल्य तत्पाथसि
स्नात्वारूढहयः पुनः स पृतनालक्ष्मीसमासेवितः ।
शापं मन्त्रजलेन तल्लमुदितं दीर्घापदे कण्ठक
क्षत्या कुण्डलितं च बिभ्रदगमत् साकेतमुत्केतनम्।। ६९

इत्युद्दामवरप्रसादकवितासिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयनिधेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतौ भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गस्तृतीयोऽगमत्।। ७०

चतुर्थः सर्गः

श्रीमतोऽथरघुवंशशेखरात् पार्थिवात् प्रणयिनोऽनभुञ्जत : ।
भूप्रयोजनममुष्य केवलं न त्वमुष्य सहधर्मिणी जन : ।। १

प्रापणीयमखिलं प्रपेदुषस्तस्य जातु धरणी शतक्रतो : ।
सन्ततेरनुपलम्भजन्मना चिन्तया पदमकारि चेतसि ।। २

त्रायते नरकल : पुमत : किलेत्यत्र पुत्रपदमुच्यते बुधै : ।
अप्यनरजरान्तरस्य ते पीतपुत्रविभवस्य का गति : ।। ३

काव्यमध्वनि तप : कृपाजडं व्योम नीरविपयोनिरम्बरम् ।
रूपमश्रुतमदक्षिणं क्रतुं गोत्रमप्यतनयं समं विदु : ।। ४

अव्यवस्थरुदितस्मिताङ्कुरानस्फुटाक्षरगिरस्तनन्धयान् ।
लालयन्ति कृतिनो ललन्तिकापद्मरागरविपाटलालकान् ।। ५

ज्योतिरावलिरिव ध्रुवो रतो वीतशेषफलवन्धनेव भूः ।
मत्परं बत मनो : कुलस्थितिव्यश्नुवीत विनिपातिनीं दशाम् ।। ६

कल्मषान्धतमस : क्षपामुखं क्षेमतामरसहैमसंहति : ।
वंशकन्दलाशिखावल : क्षमे पूज्यपूजनविधिव्यतिक्रम : ।। ७

नित्यमर्णवकृताघमर्षणो भूप्रदक्षिणविधिं प्रकल्पयन् ।
हन्त सन्ततिकृते कुलप्रभुर्भानुमानिह तपस्यतीव मे ।। ८

आपदामथ निवारणौषधादाधिराज्य फलकल्पवल्लय : ।
तत्र कल्पसमयेऽप्यभङ्गरादोलनं न दुहते द्विजाशिष : ।। ९

मां निवापसमये निशात्मजं वीक्ष्य वीक्ष्य पितरोऽप्युदश्रव : ।
हन्त जीवत इहैव मे दिशतन्त्यदुर्लभतयाश्रवं पयः ।। १०

अन्धतापसवचोऽपि चात्मभूकारणं मयि कदा फलिष्यति ।
ईप्सितार्थदमिहातिवर्तते मारवारणवनं च यौवनम् ।। ११

वासवादि सुरवैभवाकरौ वासुदेवनयनाधिवासितौ ।
प्रार्थितौ मम कदा प्रसीदतां पाटलौ गिरिशपादपल्लवौ ।। १२

आत्मजन्मसुखमन्तरात्मभू : पूरयेन्मम कदा पर पुमान् ।
यस्य गात्रनिकषे निधेरपां कन्यया कनकलेखया स्थितम् ।। १३

इत्थमात्मजविलम्बनव्यथाविह्वलीकृतमतिर्विशां पति : ।
वामदेवमपि काश्यपं गुरुं तं वसिष्ठमवदत् पुरोहितम् ।। १४

एत्य शान्तिमनवग्रहा ग्रहाह्लादयेयुरखिलाश्च केन वा ।
केन मे मखविधि : समाप्यते पुत्रहेतुरिति तं च तेऽब्रुवन् ।। १५

सख्यमाजनमेधिवान् मृगैर्ऋश्यश्रृङ्ग इति कोऽपि तापस : ।
आगतो यदि तत : समाप्यते कर्म चेदमुचितं विधास्यते ।। १६

आनयाशु गणिकामुखेन तं वेन्ति नैष विषयं मृगो यथा।
इत्थमात्मसचिवै : स मन्त्रित : तत्कृते मृगदृश : समादिशत् ।। १७

ता : समेत्य गणिका : समानयन्मोदकैश्च्छलनिवेदितैर्मुहु : ।
एणपोतमिव गीतिकामुकै : कर्णसौख्यकरणै : कथञ्चन ।। १८

गच्छतोऽस्य कृतिन : प्रभावत : तोरणं सुरधनु : श्रियार्पितम् ।
आतपा जलधरैरपाहृता स्वप्रयाणपटहायितैर्ध्रुवम् ।। १९

रोमपाद इति तत्समागमाज्जातहर्षहृषितो जनाधिप : ।
सत्कृतं तममुमात्मकन्यया शान्तया सगृहमेधिनं व्यधात् ।। २०

काञ्चनध्वजपटैस्तडित्वती कन्दलद्बहुलधूपकालिका ।
तोरणेन्द्र धनुरस्य पुर्यपि प्रावृषं व्यवृणुतागमान्मुने : ।। २१

उच्चतोरणमुदस्तकेतनं लास्यलालसविलासिनीजनम् ।
स्वावरोधसदनं स्वयं नृप : शान्तया सहितमेनमानयत् ।। २२

सुभ्रुवोऽस्य सुतजन्मकारणात् तोषमापुरधिकं तदागमात् ।
भाविहर्ष परिसूचनात् पुरो मारुतादिव मयूखमण्डली ।। २३

वाजिमेधमखसंविधित्सया मन्त्रिभि : समुचितं विचिन्त्य सः ।
पुत्रकामसवनं पुरोधसा कर्तुमैच्छदनुमोदित : कृती ।। २४

संनियुज्य मखसंविधित्सया मन्त्रिणो मनुकुलाब्धिचन्द्रमा : ।
स प्रविश्य सदनं सधर्मिणीस्तत्प्रशंसनरसैरपूरयत् ।। २५

ताश्च लब्धसुतदर्शना इव प्रीतिमिष्टकथनात् प्रपेदिरे ।
अन्तरात्मभिरनागतं फलं कथ्यते पुरत एव कर्मणाम् ।। २६

ऋश्यश्रृङ्ग मखऋत्विजां गणं लब्धवर्णतिलक : स लब्धवान् ।
आत्मनस्तनुममन्यतात्मजस्पर्शसौख्यपरिपूरितामिव ।। २७

पार्थिवोऽथ महिषीभिरन्वित : पावनीं मुनिपरम्परावृताम् ।
उत्तरेण सरयूमपासदत् क्रातवीं क्षितिशतक्रतुस्थलीम् ।। २८

तत्र चित्रविनिवेशनोज्वले संभृतोपकरणे समन्तत : ।
पुत्रकामपरिपूरणं प्रभोर्यज्ञमारभत याजकव्रज : ।। २९

इष्टकाभिरिह दृष्टिलोभने ताटकीभिरहिताटकीकृते ।
अग्रहीष्ट हरिविग्रहश्रियं धूमकेतुनवधूमकन्दली ।। ३०

कुण्डनाभिनवधूमकन्दलश्रेणिकं श्रुतिमनोहरस्वरम् ।
वेदिमध्यमुचिताङ्गविभ्रमं रूपमप्रथयत क्रतुक्रिया ।। ३१

तत्र नित्यमुपवाहिते गणे पाकशासनमुखे दिवौकसाम् ।
निष्फलं त्रिदिवसुभ्रुवामभुदङ्गकेषु हरिचन्दनार्पणम् ।। ३२

घ्राणमस्य हुतधूमकन्दली संप्रविश्यशुचिगन्धशालिनी ।
संहृतान्तर ममंस्तया ततो निःससार समुपोढनीलिमा ।। ३३

शङ्करश्चलशिखाजटोच्चयो नृत्यति स्म शिखिभिस्त्रिविग्रह : ।
अन्नकूटशतं .... अरस्य च प्रादुरास कलधौतपर्वत : ।। ३४

आदिधन्विह च मण्डले वहत्यञ्चितस्वरपदक्रमेह य : ।
व्रीलित : किल विसर्जितागत : प्रेरित : प्रविशति स्म पावकम् ।। ३५

हूयमानहविषो हुताशने स्तूयमाननवसोमवल्लय :।
गीयमाननिगमाज्जजृम्भिरे दीयमानमधुरान्धस : क्रिया : ।। ३६

व्यञ्जनक्रमविभक्ति चातुरी कर्मकारणगुणानुवन्धिनी।
उत्तमादिपुरुषागमोचिता व्याक्रियेव रुरुचे भुजिक्रिया ।। ३७

क्वाप्यभुज्य च क्रतोऽप्यपीयत क्वाप्यखाद्यत कुतोऽप्यचुष्यत ।
क्वाप्यलिह्यत कुतोऽप्यदश्यत क्वाप्यतृप्यत जनैर्मखालये ।। ३८

हव्यमप्यधिकमादधे परां माधुरीममृततोऽपि वारिधे : ।
देवता : किल दिवो भुवं गतास्तत्र सत्यपि तदाहरन्मुखे ।। ३९

चोदनाप्रकरणोचितस्वरन्यायनेमिनियमेन चेतसा ।
वाच्यतामननुबध्य तान्त्रिकाप्रोचुरर्थमनवस्थितिं च्युतिम् ।। ४०

बन्धनात् पशुपति : कथं पुन : प्रीतिमाप पशुबन्धहार्यपि।
सांप्रतं स यतिसोमभूषण : स्तूयमानमधिसोममाददे ।। ४१

स्तौति पूजयति शंसति क्षमे मूर्च्छति प्रतिदिशं श्रुतिध्वनौ।
तत्र संविदितमम्बरं परब्रह्मरूपमितिकर्मठैर्धृत : ।। ४२

तत्र सद्मनि विचित्रवृत्तिभि : प्रक्रियाभिरजहच्च्यमत्क्रिया : ।
केचिदिन्द्रभुजगेन्द्रचन्द्रमस्कन्दतत्र पृथिवीमवीवृधत् ।। ४३

तत्र केचन निरुक्तमूचिरे केऽपि शैस्तमुदतीरयन् क्रमम्।
कल्पमुल्बणमकल्पयन्मनस्तर्पणं निगमवागनूदितम् ।। ४४

वर्त्म तामरसवल्लभस्य वावैरवरीपरिणयं मखालये।
कालचक्रपरिवृत्तिसंविद : कारणं कतिचिदाचचक्षिरे ।। ४५

कर्कशै : क्वचन तर्ककन्दलै : सङ्गत क्वचन सूक्तिकोरकै : ।
अध्वरोऽन्वकृतनैललोहितीमट्टहासमधुरस्मिताननम् ।। ४६

व्योमविस्फुरित धूमजोद्यमे दिङ्मुखप्रवितत श्रुतिध्वनौ ।
उल्लसन्नमृतवर्षसंपदां नृत्यति स्म पवनालय : शिखी ।। ४७

तर्पितामरत चा तदालये हव्यभारमिव दातुमात्मना ।
उद्भटाभिरुददीप्तिहेतिभि : स प्रवर्ग्य समये हुताशनः ।। ४८

आत्तसोममजहन्मृगाजिनं हव्यवाहनकरं कपालिनम् ।
दर्शितश्रुतिपथं मखालयं दर्पकद्रणममंस्त तद्‌गण : ।। ४९

अङ्गरागफलपुष्पमालिका भूषणांशुकविशेषभूषिता : ।
तत्र सप्त मुनयश्चकाशिरे पावका इव हवि : प्रतर्पिता : ।। ५०

इत्थमध्वरवरे प्रसृत्वरे निर्जरा निशिचरेश्वरार्जिता : ।
शार्ङ्गिणं शतधृतिप्रयोजिता भोजिरे भिषजमातुरा इव ।। ५१

ते तदा कलशसिन्धुमासदन् शेषशाय्यपि तदा प्रबुद्धवान् ।
चोदितस्वविपदं तमिच्छुभिर्विष्टपै : स्त्रिभिरिवोदरस्थितै : ।। ५२

छन्दसां प्रथमकन्दमिन्दिरामन्दिराहुतमहाभुजान्तरम् ।
तत्परं पुरुषमम्बरौकस : चंपकाभसिचयं च चायिरे ।। ५३

अम्बुधप्रभमपां निधौ सुधाफेनपिण्डपरिपाण्डुरत्विषि ।
पुण्डरीकमिव गण्डमैन्दवलक्ष्ममण्डल इवोपलक्षितम् ।। ५४

चण्डभानुशशिमण्डले क्षणं कुण्डलीशफणमण्डलाश्रयम् ।
दर्शयन्तमव दीप्तितारक ब्रह्मकुण्डलिविहारवासिनम् ।। ५५

मूर्ध्नि रत्नमकुटं प्रभङ्मुखम् रुद्वहन्तमुपरुद्धदिङमुखम् ।
चक्षुषी शशिदिवाकराविति ज्योतिषामिव कलापमाश्रितम् ।। ५६

द्योतमानमलिकेनतारकब्रह्मवर्णवलयानुवादिना ।
उद्यतं य यत इवोच्चयद् द्विषां मन्महे मणिकिरीटकुण्डलम् ।। ५७

कूलमुद्वह कृपार्णवस्पृशा श्रुत्युपग्रहणविभ्रमाश्रिता।
आदिमस्य जनकस्य चातुरीमावहन्तमुभयेन चक्षुषोः।। ५८

इन्द्रनीलमणिविभ्रमोल्बणक्षीरसागरतरङ्गकेलिभि :।
भास्वरं त्रिविघवर्णभङ्गिभिः लौचनाञ्जनमरीचिवीचिभि : ।। ५९

पद्मरागमणिकुण्डलप्रभा पाटलीकृतकपोलमण्डलम् ।
अन्तरीक्षमिव सन्ध्यर्द्वयो : रञ्जितो भयविभागमंशुभि : ।। ६०

भास्वरं त्रिविधवर्णभङ्गिभि : काञ्चनाङ्गदमरीचिमञ्जरी ।
पुञ्जकञ्चुकिनि बाहुपञ्जरे .... ।। ६१

दर्शयन्तमिव सन्ततं श्रियो देहकान्तिमुपगूहलम्बिताम् ।
पङ्क्तिन्धरभयात्पतज्जगन्मण्डपोद्धरणमङ्गलश्रियम् ।। ६२

व्यञ्जयन्तमिव वासवोपलस्तंभडम्बरविडम्बिभिर्भुजै : ।
चक्षुषो घनकृपातरङ्गयोरन्तरोल्लसिततुङ्गनासिकाम् ।। ६३

भाविसागरविभागगोचरं भावयन्तमिव सेतुबन्धनम् ।
वीक्षणैरमृतवर्षशीतलैपावनैर्धवलनीलपाटलै : ।। ६४

कैरवोत्पलमहोत्पलाटवीं कल्पयन्तमिव सागराम्भसि ।
विभ्रदं विशदभास्वरप्रभं कम्बुचक्रयुगलं कराब्जयो : ।। ६५

ज्ञापयन्तमिव वामदक्षिणे कैरवाब्जसुहृदौ दृशाविति ।
दक्षिणेक्षणमुखादपोहितुं भास्विनीं स्वपरिभूतिमास्तरात् ।। ६६

प्राप्तया यदुनयैव पार्श्वतो नन्दकासिलतयाभिनन्दितम् ।
कम्बुमम्बुनिधिराजकन्यका कण्ठमित्रमधिपाणि विभ्रतम् ।। ६७

स्पर्धमानमधिनाभिपङ्कजं तस्थुषे द्रुहिणया न पत्रिणे ।
तुङ्गबाहुगरुडाश्मतोरणस्तम्भलम्बितुलसीदलस्त्रजि ।। ६८

इन्दिरारमणमण्डपान्तरे बिभ्रतं भृतमणिप्रदीपिके ।
नाभिपद्ममतिसृज्य वेधसे नन्दनाय सहजेन्दुसौहृदात् ।। ६९

आस्थितोत्पलवनान्तरामिव द्योतयन्तमुरसि स्थितां प्रियाम् ।
विग्रहाम्बुदविशेषसन्ध्यया नाभिपङ्कजनवातपश्रियम् ।। ७०

कौस्तुभस्य कलयन्तमर्चिषा कज्जलालितटधातुनिर्झरम् ।
नाभिरूढनलिनावतारिणामालयेव वनमालयालिनाम् ।। ७१

कौस्तुभद्युतिभरप्रदीपिका कज्जलालिसमयोपलक्षितम् ।
रेणुपुञ्जमिव नाभिपङ्कजान्मालितेन परितो निपातितम् ।। ७२

सेवनागतसुरालयप्रभामण्डलच्छविसमानमंशुकम् ।
पङ्कजावरणपद्मयावकस्यन्दबिन्दुनिभकौस्तुभाश्मना ।। ७३

उल्लसन्तमुरसोद्यदंशुमन्मेरुगारुडतटी पटीयसा ।
संबभूव हृदयाद् यत : शशी जातमात्रमिव तत्र भास्करम् ।। ७४

कौस्तुभं दधतमंशुकन्दलीसन्ध्यया कवचितं समग्रया ।
कौस्तुभारुणसरोजपार्श्वभूलीनभृङ्गतुलितेन लक्ष्मणा ।। ७५

साधनीय हृदयं श्रियस्तनस्यन्दितैणमदबिन्दुबन्धुना ।
रत्नसारघनरत्नकन्दली रञ्जितेन रमणीयमूरुणाम् ।। ७६

मर्दिताङ्गमधुकैटभोल्लसल्लोहितश्रियमिवानुबध्नता ।
अप्रमुक्तसलिलाम्बरापगावारिनिर्गमपदानुसारिभि : ।। ७७

स्यन्दमानसरसांशुवेणिका पक्ष्मलै : पदनखै : परिष्कृतम् ।
स्तूयमानमाधिनाभिपङ्कजं वेधसा विमलपक्ष्मलक्ष्मणा ।। ७८

ब्रह्मण : परमहंसयोगिनो व्यञ्जयन्तमिव सेव्यतां निजाम् ।
तं प्रणम्य चलकुण्डलास्ततो मूर्धभिर्मकुटबद्धसुन्दरै : ।। ७९

तुष्टुवु : फलितदृष्टय : सुरा विष्टरश्रवसमिष्टसिद्धिदम् ।
निर्मलाय निरुपाधिकोल्लसच्चित्प्रकाण्डपरिवाहसिन्धवे ।। ८०

तुभ्यमभ्युदयहेतवे सतां पद्मनाभ ! परमात्मने नम : ।
अप्रमेयमनपायमद्वयं ब्रह्म यद् भणितमम्बरात्मकम् ।। ८१

तत्वमेव किल नीलविग्रहश्चन्द्रसूर्यनयन : प्रतीयते ।
नामरूपमवलोककारणं नाभितामरसषट्पदस्तव ।। ८२

विश्वमङ्गलविलासलासिका वासुदेववरवार्णिनी च ते ।
बिभ्रतीयमुदरे जगत् तनुस्तावकी सकलमूलमातृका ।। ८३

पद्मनाभ ! परया कथं भवानुत्तरा प्रकृतिरित्युदीर्यते ।
स्वापधाम सुमनो महानसं मानसं सुरमहानसाकरम् ।। ८४

विश्वचक्रमुदरैकदेशगवादवागपि च बालजल्पितम् ।
द्यौ : शिर : शशिरवी दृशौ मरुच्छ्वास एव ककुभो भुजास्तव ।। ८५

भूपदं वयममी कथं स्तुमस्त्वां निजोदरगतस्त्रिविष्टपम् ।
अस्मदाहरणकारणद्वयीमर्णवस्य पतयालुमम्भसि ।। ८६

उत्क्षिपन्नुभयजन्मवासिनां प्रायशो वहसि सागरेशय : ।
निर्भरेण करुणामृतेन ते पूरितं वपुरिदं प्रकाशते ।। ८७

अन्यथा कथमिवाऽत्र लक्षिते नीलिमा विजितनीरदच्छवि : ।
विष्टपे विमलरूपवेदनावेद्यवेदकभिदाव्यपोहनात् ।। ८८

सात्विकं स्फुटयते मुमुक्षुतां वैभवं किमपि मायया विना ।
भूतलं व्यवहितं यथा निधिं देशिक : स्वयमविद्यया वृतम् ।। ८९

आत्मबोधमनुबोधको नृणां गीयसे गरुडवाहसूरिभि : ।
नीलमूर्तिरपि निर्मलो भवान् सायुधोऽपि शमबोधक : सताम् ।। ९०

ब्रह्मसूरपि विभाव्यते परब्रह्मयोनिररविन्दलोचन : ।
अंशुसंहतिरिवांशुमालिनो वीचिरोचिरिव वीचिमालिन : ।। ९१

उद्यते त्वदुपलीयते जगन्मण्डली मधुनिषूदन : स्वयम् ।
राजसे न सृजते गुणेन ते सात्त्विकेन वहते त्रिविष्टपम् ।। ९२

तामसेन हरते चतुश्चतुर्व्यूहविग्रहविहारिणे नम : ।
विष्टपे विकृतमुद्यताभवद्विग्रहे कतिचन व्रणा इव ।। ९३

शस्त्रपातचतुरेण शान्ततां प्रापिता : प्रतियुगान्तरं तया।
उद्यतं दनुजयुग्ममूरुणा केवलेन जलधाम्नि केशव ! ।। ९४

हन्तुरान्तरतमोहरस्य ते निद्रयापि निखिलं कृतार्थताम् ।
मायया सुगतमार्गरूपया वञ्चिता त्रिपुरगा यथा पुरा ।। ९५

जग्मुषस्त्रिपुरहन्तुरस्त्रतां प्रापिता : प्रतियुगान्तरं त्वया ।
भेजिरे तव मुखानि भस्मतां मूर्च्छिते नववागिभस्मताम् ।। ९६

पूर्णमासपयसो महार्णवात् दंष्ट्रया धरणिचक्रमुद्धृतम् ।
दण्डपूगगणनां दधेऽनघ दंष्ट्रया तव महावराहभू : ।। ९७

दन्तलक्ष्म सुखमेव लम्भिता पुंमृगा इव पुरा हिरण्यभाक् ।
श्रीर्नखक्षतिसुखं किलान्वभूत्वामणोरणुरिति श्रुति : स्वयम् ।। ९८

यद् गृणाति महतो महानिति तत् त्रिविक्रमपरम्परा त्वया ।
दर्शिता बलिविनिग्रहक्रमात् इत्यभिष्टुतवतो दिवौकस : ।। ९९

प्रत्यनन्ददरविन्दलोचन : अस्पृशन्त्यपि गुणांशमात्मनो ।
दैवतै : प्रणतवाक् प्रगृह्यते स्वागतं सुलभमेव व : शिवम् ।। १००

साधव : स्वयमिति प्रसेसुषे माधवाय विबुधाश्च चक्षिरे ।
राक्षसात्तमपरिक्षतोदयाम् ....।। १०१

शान्तसागरतरङ्गडम्बरस्तंभितश्वसनकल्पपन्नगम् ।
आननादमररक्षणोन्मुखी निःसृता भगवत : सरस्वती ।। १०२

तस्य वक्त्रमधिगम्य सा पुनः पुण्डरीकनिलया विभाव्यते ।
इत्यभूदुरसि पङ्कजालया जग्मुषी च नवमालिकान्तरम् ।। १०३

एतदत्र विदितं हि व : सुरा ! यत्स्वरूपमखिलं जगन्मयम् ।
अस्य पीडनकृतो मदानिव छेत्तुमस्मि चतुरो युगे युगे ।। १०४

तत् पुलस्त्यतनयादुपेयुषी कालदोषमनवेक्ष्य कामुकी ।
कैकसीखलमलब्धरावणं वासुकेषु (षमवाद्धि) वीचिका ।। १०५

भूयसोऽस्य तपसो वरार्पणात् पद्मयोनिरियता परिच्छदाम् ।
नाकरिष्यत यदि स्वयं जगन्नन्वधक्ष्यदथ राक्षसाधम : ।। १०६

किञ्च गर्वगरिमाप्यमुष्य यत् स्यादनन्तविपदन्तकारणम् ।
यत्तृणीकृतवरो मरुद्गणा याचते स्म स विधेरवध्यताम् ।। १०७

हन्त सन्तपति सन्ततं तप : कन्दलेन सपचेलिमेन वा ।
पश्यतात्र तपसां विभूतय : काममप्रतिहत : प्रवृत्तय :।। १०८

राक्षसे चनमिदं क्षतेऽपि वो येन दुश्चरतपश्चरोऽपि य : ।
वक्त्रपद्मविलदानवैभवाद् वामदेवचरणावतोषयेत् ।। १०९

अप्यनल्पमदविभ्रमद्भुजोत्सेधधौतकलधौतभूधर : ।
प्रापदापदि ससामसीमभूश्चन्द्रहासमपि चन्द्रशेखरात् ।। ११०

तत्सुतप्रणयिनश्चिरस्यभूकाश्यपं दशरथं कृतार्थयन् ।
रक्षसां क्षयकरो रणाङ्कणे योक्ष्य एव युगपत् पदावनि : ।। १११

तस्य निस्सृतमसृग्रसज्जगद् दुर्हृद : सुलभदौहृदव्यथाम् ।
गर्भिणीगरुडबन्धुसुन्दरी मण्डली पिबतु तुण्डकोटिभि : ।। ११२

वेणिबन्धनविमोचनोज्वलं स्वर्गवन्दिजनकैशिकं पुन : ।
कल्पवृक्षनवपुष्पदामभि : कौतुकेन कलयिष्यतामरा : ।। ११३

पारिजातकिलकोपकारिका पालिकास्वमृतपानगर्विता : ।
अप्सरोभिरनपाययौवना ५भोक्ष्यथ स्वपदभोगमञ्जसा ।। ११४

कञ्चन क्षणमिह प्रतीक्ष्यतां क्षेमकारिभिरमुष्य निग्रह : ।
तत्त्वबोधनिरतैर्यथा महाहोमडम्बरविलुम्पनक्रम : ।। ११५

तस्य दीप्रतरवामयौजसा द्वादशात्मन इति द्विसद्गण :।
तत्र रात्रिचरकालरात्रिजामुत्ससर्ज विपदन्धताव्यथाम् ।। ११६

पङ्क्तिकण्ठभयकम्पपातुकान् वामयोपकरणेन माधव : ।
उद्धरिन्निति सुपर्वयूथपां चक्षुष : सारणिरत्यवर्तत ।। ११७

इति वसुमतीं योक्तुं भाग्यश्रिया निजवल्लभा-
मवतरणतो रक्षः क्षोदक्षक्षमक्रममुद्यतम् ।
अनुययुरमी भागैर्लक्ष्मीश्वरं त्रिदशश्वरा :
कटकतटिनीस्रोत : पातै : समुद्रमिवाद्रय : ।। ११८

इत्युद्दामवरप्रसादकवितासिंहासनाऽध्यासिन :
क्षोणीमीसरगण्डशुण्डयनिधे : क्ष्माकण्ठकोत्खण्डिन : ।
विष्णो : श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौकृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गश्चतुर्थोऽगमत् ।। ११९

इति रामाभ्युदये चतुर्थ : सर्ग : ।

जग्मुषस्त्रिपुरहन्तुरस्त्रतां प्रापिता : प्रतियुगान्तरं त्वया ।
भेजिरे तव मुखानि भस्मतां मूर्च्छिते नववागिभस्मताम् ।। ९६

पूर्णमासपयसो महार्णवात् दंष्ट्रया धरणिचक्रमुद्धृतम् ।
दण्डपूगगणनां दधेऽनघ दंष्ट्रया तव महावराहभू : ।। ९७

दन्तलक्ष्म सुखमेव लम्भिता पुंमृगा इव पुरा हिरण्यभाक् ।
श्रीर्नखक्षतिसुखं किलान्वभूत्वामणोरणुरिति श्रुति : स्वयम् ।। ९८

यद् गृणाति महतो महानिति तत् त्रिविक्रमपरम्परा त्वया ।
दर्शिता बलिविनिग्रहक्रमात् इत्यभिष्टुतवतो दिवौकस : ।। ९९

प्रत्यनन्ददरविन्दलोचन : अस्पृशन्त्यपि गुणांशमात्मनो ।
दैवतै : प्रणतवाक् प्रगृह्यते स्वागतं सुलभमेव व : शिवम् ।। १००

साधव : स्वयमिति प्रसेसुषे माधवाय विबुधाश्च चक्षिरे ।
राक्षसात्तमपरिक्षतोदयाम् ....।। १०१

शान्तसागरतरङ्गडम्बरस्तंभितश्वसनकल्पपन्नगम् ।
आननादमररक्षणोन्मुखी निःसृता भगवत : सरस्वती ।। १०२

तस्य वक्त्रमधिगम्य सा पुनः पुण्डरीकनिलया विभाव्यते ।
इत्यभूदुरसि पङ्कजालया जग्मुषी च नवमालिकान्तरम् ।। १०३

एतदत्र विदितं हि व : सुरा ! यत्स्वरूपमखिलं जगन्मयम् ।
अस्य पीडनकृतो मदानिव छेत्तुमस्मि चतुरो युगे युगे ।। १०४

तत् पुलस्त्यतनयादुपेयुषी कालदोषमनवेक्ष्य कामुकी ।
कैकसीखलमलब्धरावणं वासुकेषु (षमवाद्धि) वीचिका ।। १०५

भूयसोऽस्य तपसो वरार्पणात् पद्मयोनिरियता परिच्छदाम् ।
नाकरिष्यत यदि स्वयं जगन्नन्वधक्ष्यदथ राक्षसाधम : ।। १०६

किञ्च गर्वगरिमाप्यमुष्य यत् स्यादनन्तविपदन्तकारणम् ।
यत्तृणीकृतवरो मरुद्गणा याचते स्म स विधेरवध्यताम् ।। १०७

हन्त सन्तपति सन्ततं तप : कन्दलेन सपचेलिमेन वा ।
पश्यतात्र तपसां विभूतय : काममप्रतिहत : प्रवृत्तय :।। १०८

राक्षसे चनमिदं क्षतेऽपि वो येन दुश्चरतपश्चरोऽपि य : ।
वक्त्रपद्मविलदानवैभवाद् वामदेवचरणावतोषयेत् ।। १०९

अप्यनल्पमदविभ्रमद्भुजोत्सेधधौतकलधौतभूधर : ।
प्रापदापदि ससामसीमभूश्चन्द्रहासमपि चन्द्रशेखरात् ।। ११०

तत्सुतप्रणयिनश्चिरस्यभूकाश्यपं दशरथं कृतार्थयन् ।
रक्षसां क्षयकरो रणाङ्कणे योक्ष्य एव युगपत् पदावनि : ।। १११

तस्य निस्सृतमसृग्रसज्जगद् दुर्हृद : सुलभदौहृदव्यथाम् ।
गर्भिणीगरुडबन्धुसुन्दरी मण्डली पिबतु तुण्डकोटिभि : ।। ११२

वेणिबन्धनविमोचनोज्वलं स्वर्गवन्दिजनकैशिकं पुन : ।
कल्पवृक्षनवपुष्पदामभि : कौतुकेन कलयिष्यतामरा : ।। ११३

पारिजातकिलकोपकारिका पालिकास्वमृतपानगर्विता : ।
अप्सरोभिरनपाययौवना ५भोक्ष्यथ स्वपदभोगमञ्जसा ।। ११४

कञ्चन क्षणमिह प्रतीक्ष्यतां क्षेमकारिभिरमुष्य निग्रह : ।
तत्त्वबोधनिरतैर्यथा महाहोमडम्बरविलुम्पनक्रम : ।। ११५

तस्य दीप्रतरवामयौजसा द्वादशात्मन इति द्विसद्गण :।
तत्र रात्रिचरकालरात्रिजामुत्ससर्ज विपदन्धताव्यथाम् ।। ११६

पङ्क्तिकण्ठभयकम्पपातुकान् वामयोपकरणेन माधव : ।
उद्धरिन्निति सुपर्वयूथपां चक्षुष : सारणिरत्यवर्तत ।। ११७

इति वसुमतीं योक्तुं भाग्यश्रिया निजवल्लभा-
मवतरणतो रक्षः क्षोदक्षक्षमक्रममुद्यतम् ।
अनुययुरमी भागैर्लक्ष्मीश्वरं त्रिदशश्वरा :
कटकतटिनीस्रोत : पातै : समुद्रमिवाद्रय : ।। ११८

इत्युद्दामवरप्रसादकवितासिंहासनाऽध्यासिन :
क्षोणीमीसरगण्डशुण्डयनिधे : क्ष्माकण्ठकोत्खण्डिन : ।
विष्णो : श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौकृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गश्चतुर्थोऽगमत् ।। ११९

इति रामाभ्युदये चतुर्थ : सर्ग : ।

पञ्चमः सर्गः

अथ तत्र हुताशनात् क्रियान्ते परिपूर्ण चरुणा सुवर्णपात्रम् ।
उदतिष्ठदुदस्य कोऽपि दोर्भ्या पुरुष : पुण्यमिवात्तदेहबन्धम् ।। १

शिरसा वचसाप्यकृत्रिमाणां प्रथमं प्रह्वतया प्रणीतमन्नम् ।
अवलोकितुमादिविष्णुतेज : सुलभं कीदृशमृत्त्विजां सुकर्म ।। २

प्रमना : सुमन : पथानुवर्ती प्रभुरम्भोरुहरागिणा करेण ।
अमलचरुमग्रहीत् तमस्मात् सवितेवोषसि सारमोषधीशात् ।। ३

स विभज्य चरुं हव्यतारित् कुशलं कौसलकेकयात्मजाभ्याम् ।
असितोत्पलिनी कुमुद्वतीभ्यां अमृतस्यन्दमिवाधिप : ... कनाम् ।। ४

अथ ते निजभाग भागदानादितरस्यै प्रियमन्ववर्तयेताम् ।
सरयूतटवेणिसंविभागे यमुनाजह्नुसते यथा समुद्रम् ।। ५

चरुरूपसरोरुहाक्षतेज : क्रमयोगात् क्षितिपालयोगिनीनाम् ।
स्फुटदौहृदलक्षणा बभूव प्रकटं कौसलकन्यका प्रकामम् ।। ६

जननाय जनार्दने प्रपन्ने जगदात्मन्यपहाय शेषशय्याम् ।
उदरं परमाणुरूपसाम्यं परिणन्तुं चकमे दिनक्रमेण ।। ७

उपरि स्फुटदुल्ललास नाभेर्हरिणाक्ष्या नव रोमराजिरस्या : ।
उदधेरुपरीव दृश्यमाना प्रतिमागर्भजुष : परस्य पुंस : ।। ८

अधिगर्भतया हरिस्तदानीं न परं स्वात्मनि नास्तिवादमोहम् ।
अपवारयति स्म सौगतानामपि मध्यं परिदृश्यमानमस्या :।। ९

परिपाण्डुतनुप्रकाशलक्ष्म्या प्रथमो गर्भगत : पुमानमुष्या : ।
समुपास्यत सान्द्रकेन लक्ष्म्या शयनागार समुद्रवेलयैव ।। १०

उदरं भृतगर्भमुत्पलाक्ष्या रुरुचे रोमलता पयोदलेखम् ।
प्रकटीभवति स्म तेन साक्षान्ननु तद् ब्रह्मपरं नभ : शरीरम् ।। ११

नवदुग्घतरङ्गदर्शनीयं नयनं नीलकनीनिकं तदीयम् ।
उदयादुपरि स्फुटं निवासीत्कलशाब्धि : कमलासखं दधान : ।। १२

श्वसितं गुरुगर्भखिन्नगात्र्या विपुलाक्ष्या व्यतिलङ्घ्यते स्म वेलाम् ।
अनुबद्धमिवादिमस्य पुंस : मणिपर्यङ्कभुजङ्गपूत्क्रियाभि : ।। १३

परिणाहि विपाण्डु नीलमग्रे कुचकुम्भद्वितयं कुशेशयाक्ष्या : ।
कलुषाम्बुदलेशमुद्रिताग्रां कलधौताचलकान्तिमाललम्बे ।। १४

प्रथमं गगनैकदेशभागं यदयासीदवलग्नमेतदीयम् ।
अथ तत्र पुनर्विवर्धमाने गगनं प्राप तदेकदेशभावम् ।। १५

स्तनकुम्भयुगं ततो जजृम्भे परिणद्धं क्षितिपालधर्मपत्न्या : ।
विजयेत तथा विवर्तमानं बलिहन्तुबलिनिग्रहावतारम् ।। १६

उदरं वटपत्रमुत्पलाक्ष्या : कवय : केचन कल्पयन्ति सत्यम् ।
अवरोपितधीरहीन्द्रतल्पादधिशिश्ये स्वयमर्भको यदाद्य : ।। १७

नवमम्बुधरं यथा नभश्रीस्मरेन्द्रोपलमाकरस्थलीव ।
अतसीव घनान्तपुष्पभारं हरिणाक्षी बिभरांबभूव गर्भम् ।। १८

कुचकुम्भयुगान्तराद् विमुञ्चद्विमुखी श्यामलचूचुकच्छलेन ।
सुतनोरसितोरगीव नाभी विवरादुल्लसति स्म रोमवल्ली ।। १९

मघवन्मणिमेचकेन धाम्ना महिषीगर्भभरेण गौरगात्री ।
तरुणोत्पलगर्भिता चकाशे सरसीवातशरत्प्रकाशलक्ष्मी :।। २०

अधिकुक्षिमधोक्षजं मृगाक्ष्या : धवलश्याममुखस्तनच्छलेन ।
मुकुलं मुखनीलमूकभृङ्गम् निजमासेवत नाभिपुण्डरीकम् ।। २१

प्रलयाय निजद्रुहां प्रविष्टे कुहनापोत्रिणि कुक्षिमायताक्ष्या : ।
नदराज इवोन्ननामनाभिर्वसुधेवोल्लसति स्म रोमवल्ली ।। २२

उदपश्यदिवोदरस्य शोभं कुचयुग्मं सुदृश : कुतूहलेन ।
इह रोमलतामधी यदासीत् पतिता चूचुकलोचनप्रभाली ।। २३

वसुधावचवैकदेशमात्रादुपयोगक्षमतामुपाश्रयन्ती ।
प्रविवेश तदाशयं भविष्यन्निजजामातृनिरीक्षणोत्सुकेव ।। २४

नलिनेक्षणसंश्रयस्य तस्यां नवरोमावलिनन्दक : प्रमाणम्।
अथवा भजमानमस्य चक्रं स्फुटगाधामपदिश्य नाभिमुद्राम् ।। २५

विरलं समभावि रूपलक्ष्मी व्यवधेत्येव विभूषणं मृगाक्ष्या : ।
अथवा कथमस्य दुर्वहत्वं जठरे येन जगन्मयो मुकुन्द : ।। २६

अमलं दधती प्रकाशमात्मन्यमृतस्निग्धदृगञ्चलप्रसादा ।
बहिरन्तरविस्फुटं बभार प्रकृतिं सत्त्वमयीं वरां वराङ्गी ।। २७

परमात्मनि पद्मनाभनाम्नि प्रविशत्याशयमाशये श्रुतीनाम् ।
समभावि तदात्मभावनाभिस्तरलाक्ष्या गुरुदौहृदव्यथाया : ।। २८

यदुवाच यदा कदापि मोहात् पतिरन्यप्रणयोचितं पुरस्तात् ।
विदितापि निषेधति स्म नैषा सुलभेर्ष्या स्वपदव्यवायबुद्ध्या ।। २९

अलसा मुखसौरभानुबन्धि भ्रमरोत्सार विभ्रमेऽपि राज्ञी ।
अपनेतुमियेषा वीरभावादखिलानां जगतां क्रियान्तरायात् ।। ३०

दलसङ्घटनक्रमेऽपि देवी दधती केलिसरोरुहस्य खेदम् ।
अधिरोप्य धनुर्विमोक्तुमैच्छच्छरजालं विजयाय शौर्यभाजाम् ।। ३१

सति केलिवनेऽपि चञ्चलाक्षी कलजत्कलकण्ठकामिनीके ।
उदकण्ठत दण्डकान् प्रवेष्टुं श्रवणारुन्तुदसिन्धुरप्रणादान् ।। ३२

अधिरूढमदेवगर्भभारा दलसाप्याङ्कणचङ्क्रमे मृगाक्षी ।
अतिलङ्ध्य विहर्तुमैच्छदब्धीनखिलायां तमन्तरीप भूमौ ।। ३३

परिवर्तितधी : फलप्रदाने सुमुखी पञ्जरवर्तिने शुकाय ।
शकलीकृतकण्ठकं प्रदातुं चकमेऽभीष्टफलं समाश्रितानाम् ।। ३४

असहा हिमकृत्रिमापगानामपि कर्पूरपरागबन्धनेषु ।
सकलाम्बुधिसेतुलीलां ... सहसा कर्तुमियेष सारसाक्षी ।। ३५

नलिनीष्वपि पद्मराग भङ्गे नरपालप्रमदानपारयन्ती ।
शतशो रिपुषण्डकण्ठकाण्डं शकलीकर्तुमनारतं चकाङ्क्षे ।। ३६

अवतंसशिरीषभारखिन्नाप्यबलायुद्धकलाद्भुतापदानै: ।
शिरसिस्पृहयां बभूव सिद्धैकलितां कल्पतरुप्रसूनवृष्टिम् ।। ३७

अथ केकयकन्यकाप्यभिख्यां दधती दौहृदलक्षणाभिरामाम् ।
प्रथमोपगमे प्रसूनगर्भा मधुमासी व्यललास माधवीव ।। ३८

वलमानचकोरमीनपाली स्मयमानेक्षणमाक्षिपन्मृगाक्ष्या: ।
सदनं वदनं शरच्छवीनां शशभृन्मण्डलपुण्डरीकशोभाम् ।। ३९

व्यपदिश्य विशाललोचनाया: सुषमां बालमृणालकाण्डगौरीम् ।
उदरस्थमुदन्वदात्मजाया: दचितं विष्णुपदी स्वयं सिषेवे ।। ४०

नवकन्दलरागनन्दनायां रुचिमालम्बत रोमराजिरस्या: ।
परिपाण्डुपयोधरेन्दुबिम्बद्वयमध्यादवपातिनी वरे वा ।। ४१

अवलम्ब्य सखीकरप्रवालं हरिणाक्षी कलहंसकामिनीनाम् ।
पदमाक्षिपति स्म मन्दमन्दं क्रममाणा कनकाङ्कुरस्थलीषु ।। ४२

असहापि विभूषणान्तराणां वहने सेयमुवाह वैष्णवांशम् ।
लघुनाप्यपरेण याति भङ्गं लतिकानां स्वफलेन भूयसापि ।। ४३

उदजृम्भि तथा तथा स्तनाभ्यामवलग्नं न यथा यथा तदस्या: ।
सह सहर्षपश्रधिकं यदिच्छेत् सुरशैलेन स कीदृश: स्वयं स्यात् ।। ४४

अथ वै जनने शुभे मुहूर्ते सुषुवे कौसलकन्यका कुमारम् ।
प्रतिभेव सुदुर्निरूपमर्थ प्रकृति: सत्वमिव प्रकाशरूपम् ।। ४५

उदयेन सुधानिधेरिवोर्वी नरलोकाधिपनन्दनस्य तेन ।
अपहाय निशाचरान्धकारानखिलं विश्वमलब्ध हर्षमुद्राम् ।। ४६

सममेव दिशो दश प्रसेदुर्जननारम्भदिने नरेन्द्रसूनो : ।
अतनुक्रममेव येन तासामभवत् पङ्क्तिमुखग्रहापपीडा ।। ४७

अपनीतरजस्कमाविरासीत् पवनस्तज्जनने प्रसूनवर्षी।
अवतीर्ण इवाच्युतावताराच्छनकैर्नन्दनवाटिका समीर : ।। ४८

प्रणनर्त हुताशन : शिखाभि : प्रतियज्वावसथं प्रदक्षिणाभि : ।
परमान्नमय : स गर्भभारात् प्रथमं प्रादुरभूत् पुमान् पुराण : ।। ४९

अपि शुष्कमहीरुहामभूवन् प्रसवा : पल्लवकन्दलाभिरामा : ।
अरसास्तरवोऽपि पुष्पभारात् प्रणतागां प्रमदा इव स्वजन्त : ।। ५०

इतरेतरमीरितैरदीव्यन् नवपिष्टातकरेणुभिर्नरेन्द्रा : ।
विबुधाधिपदन्तिनोऽपि मेरौ विदधु : काञ्चनधूलिलेखनानि ।। ५१

महता प्रमदोदयेन जज्ञे मुखैर्मङ्गलशङ्खतूर्यघोषै : ।
नवभावरसोत्तरैश्च नृत्तैर्नरलोक : सुरलोक इत्यभेद : ।। ५२

सुरसिन्धुरपि स्वयं प्रसन्ना प्रमदोद्यल्लहरीपरम्पराभूत् ।
तपनीयसरोजधूलिकेली तरलब्रह्मविमानहंसयूथ : ।। ५३

परिरब्धितरङ्गिणीप्रवाहा : प्रचलद्भिः प्रमदास्तरङ्गहस्तै : ।
मुखरा मकरालया : समन्तात् सुतजन्मोत्सवतूर्यतामगच्छत् ।। ५४

पुर एव विभाव्य भाविकन्या वरभावं वलभित्सहायसूनो : ।
त्रप एव कृतावकुण्ठनाभूद् वसुधा तत्र विकीर्णवर्णचूर्णै : ।। ५५

न तथा रसभावनन्दनीयं नटनं वा .. नतभ्रुवां तदानीम् ।
विकृतं वसुधासुधाशनानां हृदयं हर्षजुषां यथा जहार ।। ५६

अनिमेष करार्पितेक्षणानां अनुमेयाङ्घ्रिलयाङ्गदप्रणादै : ।
ललिता समलक्षिलास्यलीलादिवि विद्याधरदीर्घलोचनानाम् ।। ५७

उदपादि तदुद्भवोत्सवश्रीर्न परं मध्यमलोकनायकेन ।
अपि सातिशयं स्वराजधानीष्वमरेन्द्रप्रमुखैर्दिगन्तपालै : ।। ५८

न परं भुवि नीरदाः प्रसूनान्यमुचत् षं चरणोपवीणितानि ।
स्वयमेव दशाननावरोधप्रमदानामपि कुन्तला : प्रकीर्णा : ।। ५९

सुरकार्यसमुद्यतस्य सूनोरुदयादुत्तरकोसलादिराज : ।
तृणवद् द्वितयं तिरश्चकारद्रविणं पित्र्यमृणं च दानशौण्ड : ।। ६०

नयनामृतपारणं नरेन्द्रोमुखमालोक्य न नन्दनन्दनस्य ।
नलिनीप्रसवं नवावताराद्रविणीयं सरसीव राजहंस : ।। ६१

न यथा नयनोत्सवाय जज्ञे तनयस्याननसारसं नृपस्य ।
परिपूर्णमनोरथं प्रसन्नं वदनं तत्र यथा वनीपकानाम् ।। ६२

अजिताक्षदुरासदेन साक्षादमराणामहि तृप्तिकारणेन ।
तनयाननदर्शनात् तदानीं सधनेनैव धनत्रयाद् विमुक्तः ।। ६३

रमयद्भिरुपक्रमैस्त्रिलोकीं प्रभया श्यामलया पतिः प्रजानाम् ।
अपि राक्षसमर्दनापदानामकरोद् राममभिख्यया कुमारम् ।। ६४

प्रहतेति किमत्र चित्रमस्य प्रभदीप्तिररिष्टदीपिकानाम् ।
उददीपयदर्चिरुष्णधाम्न : सततं मण्डलमध्यमाश्रितो य : ।। ६५

द्रविणं सकलं पति : प्रजानां द्विजसात्कृत्य यश : परं स लेभे ।
अभिवृष्य वसुन्धरामशेषाममलत्वं परमश्नुते हि मेघ : ।। ६६

अथ केकयकन्यका द्वितीयं जनयामास सुतं जनार्दनांशम् ।
भरतत्वमभिख्यया प्रपेदे भरणादञ्चितरूपसम्पदां यः ।। ६७

अपरावपि यमावसूत राज्ञी मतिमन्तौ मगधाधिराजकन्या ।
इह लक्ष्मणमेकमाहुरन्यं भुवि शत्रुघ्नमभेदितार्थमेव ।। ६८

निगमागमयोर्निरूढमैक्यं प्रतिपन्नौ किल रामलक्ष्मणौ द्वौ ।
इतरयोरपि दस्रयोरजस्रं प्रणयित्वं च यतु : परस्परेण ।। ६९

सकलामपि शास्त्रसंविदं ते स्वयमेव प्रतिपेदिरेऽपदेशात् ।
विषय : क इवात्र विस्मयानां श्रुतिमूलस्य हरेरयं स्वभाव : ।। ७०

कमलप्रभवस्य काञ्चिपुर्यां करिशैले कमलेक्षण : पुरोऽभूत् ।
हयमेघफलोदयादयोध्या नगरे तस्य तु नन्दनो बभूव ।। ७१

प्रतिपद्य चिरात् पति : प्रजानां सुखसंस्पर्शसुखाभिषेकम् ।
अधिराजपदाभिषेकलक्ष्मीमनुभूतां किल नाममंस्त ।। ७२

आम्नायैरिव सप्ततन्तुरनघैरास्यैरिवांभोजभू :
पाशास्त्री मकरालयैरिव रथो रुद्रस्य वर्णैरिव ।
अङ्गैरात्मचमूसमुद्यम इवानेहेव राजा युगै -
र्लक्ष्मीमाप चतुर्भिरप्रतिहतामानन्दनैर्नन्दनै : ।। ७३

इत्युद्दामवरप्रसादकवितासिंहासनाऽध्यासिन :
क्षोणीमीसरगण्डगुण्डयनिधे : क्ष्माकण्ठकोत्खण्डिन : ।
विष्णो : श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गोऽगमत्पञ्चम : ।। ७४

शोणाद्रीन्द्रं कवीन्द्रं श्रवणकटुरड्डिण्डिमं सार्वभौमं
प्रासूताम्बाभिरामा नवनवकविताभाजनं राजनाथात् ।
तस्मै तस्मिन्नयाति क्रमविषयमहानाटकस्याग्रजाते
काव्ये सर्गो निसर्गोज्वलरसविलसत्पञ्चमोऽयं जगाम ।। ७५

इति डिण्डिमसार्वभौमकृतौ रामाभ्युदये पञ्चम : सर्ग : ।।

षष्ठः सर्गः

अथ मुनि : किल गाधिकुलध्वजोद्म
दशरथं परिपूर्णयश : श्रियम् ।
उपययौ सवितारमिवौषधी
सहचर : स वनाय कृतोद्यम : ।। १

अमुमुपग्रहणादथ कौशिक :
शिशुमयाचत राममकामन : ।
सवनविघ्नशमाय वृषध्वजं
गुहमिवासुरसंहृतये वृषा ।। २

अपि शिशुं सुतमस्य चिरार्चितं
कथमयाचत कौशिक इत्यलम् ।
प्रणव एव परं निगमोच्चयात्
प्रभवति प्रशमाय भवापदाम् ।। ३

स तनयं मुनये स्वयमर्थिने
वितरति स्म निरस्तविचारण : ।
अमृतभानुमिवाभिनवं पुरा
मनसिजद्विषते मकरालय : ।। ४

अनुगमाय मुनेरयमात्मजौ
पदनतौनयनाम्बुकणोत्किरै : ।
अभिषिषेच यथा करियूथपो
वमथुभि : कलभौ वलभित्सख : ।। ५

भवतवां भवने च वने स्वयं
गतिरसाविति तातकृताशिषौ ।
दमशमामिव योगमुभावृषिं
नवमिवानुगतौ विजयोदयौ ।। ६

तदनु यानमयानमभूत् तयो -
स्तदनुशासनत : कमलाक्षयो : ।
कमठशेषतया दधताविमौ
स्वमवनीव कृतज्ञतया दधौ ।। ७

स नृपतिश्चरणेन सलक्ष्मणौ
व्यजित राम इति प्रथितो वृधा ।
सकलमस्य हि सागरमेखला -
वलयमेकपदं बलिवञ्चने ।। ८

निपतिता नृपनन्दनयोस्तयो -
र्निगलिता निजरूपगणैरिव ।
नगरलोकदृषो न निवर्तना -
नलिनयोर्भ्रमरा इव लेभिरे ।। ९

तरलनीलशिखण्डकयोस्तयो :
सुलभशैशवदोहलयोरभूत् ।
उभय : सरणैर्गतमुद्धतं
कलभयोरिव काननचारिणो : ।। १०

मुनिकृतादुपदेशबलात् तयो-
र्मुदितयोरुभयो : सुषमा परा ।
कमलयोनिरिव पद्मनि सातपे
जलदमालिनि चन्द्रकिणोरिव ।। ११

मुनिमुखश्रुतपर्वकथासुधा -
रसनिमग्नधियौ रघुनन्दनौ ।
अगमतां न जनन्यूपलालन
स्मरणमध्वनि मुग्धमुखाम्बुजौ ।। १२

कलरुतैर्विहगा : कुसुमैर्घना -
रविरनुष्णतया तपसम्पदा ।
तमभजन्त सुवर्णरथं हरे :
स्वरजं कुलजं य यथोचितम् ।। १३

पथि रघूद्वहयोरुदपादयं
        मधुरतां पयस : कमलाकरा : ।
मथनतश्चकिता इव ते पुरा
        प्रमथितादधिक : किमपां निधे : ।। १४

इह सुकेतुसुता किल राक्षसी
        विहरतीति वने मुनिनोदिता ।
अपभयावधिरोपितशिञ्जिनी-
        मुखरितेष्वसनौ मुदितावुभौ ।। १५

क्वचन कूणितसृक्कणि कुर्वती
        कुणपसञ्चयमस्य गुहान्तरे ।
हृदि तदिष्वसध्वनितेन सा
        पतिहतेव चचाल पिशाचिका ।। १६

ददृशतुर्दिवि भुव्यपि तौ तम :
        पटलमादधतीं प्रभयात्मन : ।
घनघटाशनिघर्घरनिस्वनां
        प्रलयकालनिशामिव ताटकाम् ।। १७

नववसारसनिर्मितवर्णिकां
        रुधिरवर्षिनवाजिनवाससम् ।
मिहिरकोटिभयङ्करदंष्ट्रिका
        शकलितार्भकमुण्डकरण्डकाम् ।। १८

पुरुषशोणितपाणितपारणां
        घुमघुमायिततुन्दगुहान्तराम् ।
करतङ्गितकैशिकचामरां
        कलितचक्षुरलातविवर्तनीम् ।। १९

श्रवणशूर्पसमीरणताडन-
        त्रुटितनूतनतोयदमालिकाम् ।
कठिनपादविघट्टितकानना -
        स्थलचराचरसत्त्वपरम्पराम् ।। २०

मनुजगन्धमरुद्ग्रहणद्रुहा
घुरघुरायितभीषणघोणिकाम् ।
मटमटित्यवमोटितपार्श्वभू -
विटपिसाटविशङ्कटदोस्तटाम् ।। २१

प्रचलदार्द्र फणीन्द्रभुजान्तरां
कलुषकायकरालतमोभराम् ।
तनुमतीमिव सागरभीषण-
ध्वनिभरेण रसातलकन्दराम् ।। २२

युवतिगर्हविदं शरसोल्लस -
द्रुधिरचूषणविसृतरातनाम् ।
परिणतौ क्वचिदष्टमसप्तमौ
परिकरेण रसादपवृण्वतीम् ।। २३

अधिदयामवधूय वधूवधे
पुनरिमामिषुणा पुरुषादिनीम् ।
जहि जहीति मुनावनुशासति
स्वमनसीति चकार रघूद्वह : ।। २४

निर्यामति .... .यत् श्रुतिसंश्रये
तदनुशासनमेव विधिर्मम ।
इति जिघांसितमांसवराङ्गनो
धनुषि सोऽपि गुणे समधादिषुम् ।। २५

अपि शिलाकठिने क्षणदाचरी -
हृदयमम्भयिव प्रविभिद्य स : ।
अशुचिराक्षसशोणितमस्पृश -
न्निषुरमुष्य बहिर्द्रुतमद्रवत् ।। २६

झटिति सायककाटित ताटका
हृदयनिर्गलितक्षतजप्लव : ।
अभिनदन्तर एव दृशानना -
न्वयतटाकतटीमिव राघव : ।। २७

परिपदन्त्यविघूर्णिपरिभ्रम -
त्कपिलदृष्टिमरीचिकदम्बकम् ।
विजयिनं रघुवीरकिशोरकं
निशिचरीनियतं निराजयत् ।। २८

अवपतत्यवशं पिशिताशनी
वपुषि तद्वनभूमिरकम्पयत् ।
व्रणविकारविरोपणमप्यलं
वितनुते परितोऽपि हि वेदनाम् ।। २९

स लभते स्म चमत्कृतविक्रम :
सकलराक्षसवंशवनेन्धनम् ।
अयमसौ पथि गाधिनिधेर्मुने -
रनरणिस्पृहमस्त्रमयं मह : ।। ३०

तमुपगृह्य ततश्चलितं पथि
स्वविषयावधि लोचनशुक्तिभि : ।
मुकुलिताभिरधन्यधुराशये -
ष्वमृतवर्षमिवाशु महर्षय : ।। ३१

विकटरूपतयैव पुरादहद्
विषमदं मदनं च किलागसा ।
इति तदाश्रममेयुषि राघवे
मुनिगणोऽगणयन्मुदिताशय : ।। ३२

उपसरन्नुदकण्ठत राघव :
प्रथमजन्मपदं मुनिदर्शितम् ।
प्रकृतिसन्निधिरुत्सुकभावनां
प्रथयते पुरुषस्य हि केवलम् ।। ३३

मणिविडम्बिनि तस्य मनोहरे
महसि मग्नमना मुनिमण्डली ।
जपममुञ्चत होमममुञ्चत
व्रतममुञ्चत वेदममुञ्चत ।। ३४

ऋषिलनाम्नि पुरोधति सामवत्
तदितरौ निगमाविव राघवौ ।
अपगतामपविघ्नमखक्रिया
प्रकरणाय तदाश्रममाश्रमौ ।। ३५

मुनिवरेण ततः प्रकृतं क्रतुं
धृततनु : स ररक्ष रघूद्वह : ।
अमृतवैरिभयादमृतं यथा
वरणतामुपगम्य विभावसु : ।। ३६

अधिमखालयमापतितास्तत :
पृथुतरानवलोहितबिन्दव : ।
उदचलन्नथ वृश्चिकदष्टवद्
विरमतापति सत्वरमृत्विज : ।। ३७

अपि कथं क्रतुदूषणमित्यलं
दशरथ : प्रभव : कथितः क्रुधा ।
प्रलयकालघनध्वनिमुद्धतां
दिवि चमूमयमैक्षत रक्षसाम् ।। ३८

शरमुखेन निहत्य सहस्रशो
निशिचरा नभसो रघुनन्दन : ।
प्रशमनादसृज : कतिचिद् द्विजा
प्रसरणादुपशमदमानयन् ।। ३९

निशिचरेष्वितरेषु निरागस :
समजहर्षदसौ तदधीश्वरान् ।
कलभकुम्भकपालविपाटने
मृगकुलं गणयेन्न मृगाधिप : ।। ४०

परिवृढस्तमढौकत ताटका :
तनुभवस्तरसा तरसान्धसाम् ।
स च निराकुल एव सहस्रशो
विशिखवर्षमवर्षदमर्षित : ।। ४१

स तु सुकेतुसुतासु समीरण :
प्रथममस्य शरोरगदूषित : ।
समुपगृह्य सुतं द्रुतमद्रवत्
प्रणयत : पवनास्त्रकथा वृथा ।। ४२

मम सुखान्मखविघ्नमधावयत्
कमपि सोऽहमपि क्षपये चिरम् ।
इति किमस्य शराग्रत : स्वयं
प्रदहति स्म सुबाहुमिवानल : ।। ४३

इति निवारितविघ्नतयामुना
क्रतुसमाप्तिकृतार्थमना मुनि : ।
तमथ पाणितलेन परामृशन्
शिरसि जिघ्रति स स्म सविस्मय : ।। ४४

अथ निमन्त्रितवान् मिथिलाधिप :
कुशिकनन्दनमध्वरदीक्षित : ।
अभिययौ पुनरस्य धनु : कथा
सुक्रतुकावुपगृह्य सरासवौ ।। ४५

त्रिचतुरैर्दिवसैरतिलङ्घ्यते
सरणिमक्षपदाश्रममाययु : ।
किमपि यत्र कलत्रमुपागम
च्छतमखाक्षिसहस्रनिदानताम् ।। ४६

अधितपोवनमश्ननि कुत्रचित्
पतितराघवपादरजः कणे ।
अवसितन्तरमग्निमतां पदं
पुनरुपासददक्षपदश्चिरात् ।। ४७

करतलेन हरि : कलशार्णवाद्
गमितवान् गृहिणीं किल गौतम : ।
उपलत : पुनरुत्पललोचनां
चरणतामरसेनराघव : ।। ४८

ननु तदादि नवाब्जसुगन्धयो :
प्रबलशोकपयोधरशोषिणि ।
समभवद् रघुनन्दनपादयो -
रपि परो रजसां रजसि स्पृहा ।। ४९

करुणयामधिकोमलमर्पितं
कथमिदं चरणं कठिनेऽश्मनि ।
इति मुनिः किल राममुपाचरत्
प्रमुदितो गृहमेधि पदार्पणात् ।। ५०

अथ विहारभुवं विभवश्रिया-
मुपससार मुनिर्मिथिलां पुरीम् ।
शशिशिखण्डधनुर्ग्रहणागतै :
परिवृतां परित : पृथिवीश्वरै : ।। ५१

निशमितोपगमं नगराद् बहि :
स जनक : सहसा सह राघव : ।
स्वरपवर्गफलोद्धुरमध्वरं
स तनुबन्धमिवाभ्यगमन्मुनिम् ।। ५२

वपुषि राघवयोर्मिथिलौकसां
न नयनानि परं नलिनाक्षयो : ।
अपि मनांसि निपेतुरनेकधा
प्रसृमराणि बहि : पुलकच्छलात् ।। ५३

अथ कृताऽवभृथो मुनिभिर्वृतो
निखिललोकमनोहरविग्रहौ ।
सविनयाववलोक्य राघवौ
कुशिकनन्दनमाह कुतूहली ।। ५४

अघिगतौ विषयं किमिहाश्विनौ
नयनयोरपि वा नलकूबरौ ।
स वपुषावथ वा मधुमाधवौ
कथय मे मुनिकुञ्जरकाविमौ ।। ५५

कतर एष कलायदलच्छवि :
 कमललोचनयोरनयो : पुन : ।
इह कथं हृदयं मम लीयते
 यमितवृत्ति यथा परमात्मनि ।। ५६

इह सहानुचरं विमृशाम्यमुं
 मखवता सुखितेन मदिज्यया ।
स्थिरतटिद्धनुषं क्षितिरक्षण -
 प्रणयिना प्रहितं नवमम्बुदम् ।। ५७

अयमहो बहुभि : किमिहोदितै -
 रमृतसागरशीतलविग्रह : ।
उपनिषत्फलमुत्पलरोचिषा
 परिणतं वपुषा प्रतिभाति मे ।। ५८

इति तमाह वदन्तमसाविमौ
 दशरथस्य सुतौ जलजेक्षणौ ।
जगति लक्ष्मणरामतयानयो -
 र्धनुषि चैकतर : प्रणयीति ते ।। ५९

प्रबलदुर्गमचापकुतूहलं
 श्रवणतोऽस्य शिशो : स कृतस्मित : ।
असिहितस्त्रिदिवान्तरकल्पना -
 स्तबकितद्वितयेन तपस्विना ।। ६०

श्रुणु विदेहपते ! श्रुतवारिधे
 मम वच : श्रवसोर्मधुपारणम् ।
शिशुतया शिथिली कुरु संशयं
 पुनरमुष्य मृगेन्द्रकिशोरवत् ।। ६१

अयमताडयदेव हि ताटका -
 मसुहरां जगतां महतामपि ।
सकरुणं किल सागरवारित -
 तत्तनयमाशु शरेण तदानयत् ।। ६२

अनभिलक्षित सर्गविमोक्षया
तृणतयैव तृणीकृतराक्षस : ।
हुतसुबाहुरुहवा ह महाहवे
हुतवहास्त्रमुखे रघुनन्दन : ।। ६३

उपलतामपहाय चिरन्तनीं
पदरजोभिरमुष्य जनेश्वर !।
उरसिजार्पितवल्कलमुद्यता
तव पुरोहित तात सुधर्मिणी ।। ६४

असुकरं पुनरस्य न ते धनु -
र्नमयितुं नवमर्शमाप्नुहि ।
इति मुनेर्वचसा हृतसंशयो
धनुरुपानयति स्म किङ्करै : ।। ६५

स तदैक्षत लक्ष्मणपूर्वज :
परिणतं सुमन : परमाणुभि : ।
अखिलबाहुज बाहुमदामिष -
ग्रहणनिश्चलसुप्तमिवोरगम् ।। ६६

अजनि यत्र हरिन्मणिरोचिषा
मधुभिदा नववंशपतत्रिणा ।
पवनपक्षजुषानलपालिना
त्रिपुरलक्षभिदा त्रिपुरं मह : ।। ६७

प्रणमिते बत यत्र पिनाकिना
समधिरोपितहारगुणे सति ।
समजनिष्ठ पुरत्रयसुभ्रुवां
समवरोपितहारगुणो गण : ।। ६८

अथ मुनावनुशासति लक्ष्मणं
किमपि वीक्ष्य कृतस्मितमुत्थित : ।
तदिदमादित धन्व रधूद्वह :
समधिरोप (ण ?) कर्मणि सागसि ।। ६९

धनुरसौ गणसङ्घट्टनोत्सुको
　　नमयति स्म तदेति न विस्मय : ।
पुरहरस्य पुरा वपुरर्धभाक्
　　तदिदमाशु चकर्ष स एव तत् ।। ७०

जनकसंशयवद्धृढकर्षणाद्
　　धनुरभज्यत तस्य तरस्विना ।
ध्वनिरमुष्य पुनर्जनकात्मजा -
　　परिणयोत्सवाद्यवदुत्थित : ।। ७१

किमु जगत्प्रमदातिशयध्वनि :
　　किमु तदीय यश : पटहध्वनि : ।
उत भृगुप्रभवोऽपनयद् ध्वनि -
　　र्दशरथात्मजभग्नधनुर्ध्वनि : ।। ७२

तदुपयानविशेषचमत्कृता
　　निमिशिरोमणिना मुनिसन्निधौ ।
रघुसुताय सुता विनिवेदिता
　　मधुभिदे कमलेव महात्मना ।। ७३

दुहितृदानमहोत्सवहेतवे
　　द्विजमुखान्मिथिलाधिपतिस्तदा ।
समुपहूय सूतैरितरै : समं
　　दशरथं दृढधी : समुपाचरत् ।। ७४

मुखरकम्पुकणं मुरलीस्वनं
　　मुखरमूर्च्छितदुन्दुभिनिस्वनि : ।
क्वणितवल्लकिकूजितकाहलि
　　स्वनितझल्लरिमार्जितमद्दलम् ।। ७५

मणिवितानसमुच्छ्रितकेतनं
　　रचितमङ्गलङग्तलाङ्कणम् ।
सुकरतोरणमौक्तिकमालिकं
　　नगरमास तटद्वनिताजनम् ।। ७६

क्वचन जाजशमीकुशभूषितां
वरविलोकनलोलवधूजनाम् ।
स भजति स्म पुर : सपुरोहितां
निमिललाममनिकेतनवैदिकाम् ।। ७७

सनयना कुसुमैर्हृ .....क्षिता
कुशै : सहसिते लाजसमुच्चयै : ।
तदवलोकनहर्षमचेतना -
प्यधितवेदिरहो किमुतेतरै : ।। ७८

अथ सखीनिवहैरवकुण्ठिता
परिणयोचितवेषपरिष्कृता ।
जनकराजसुता जनचक्षुषा -
ममृतवर्तिरिवाप तदन्तिकम् ।। ७९

हलमुखोल्लिखितादुदियाय या
जनकराजपिता न महीतलात् ।
कपटकोमलकठोरमुखाहतात्
प्रलयवारिनिधेरिव मेदिनी ।। ८०

सहजया त्रपया तदवेक्षणात्
कलिकयापि करम्बितमानसा ।
अभिमुखानलपातनिवारिता -
प्यलिवधूरिव चूतरसोन्मुखी ।। ८१

जनकजा गणयत् तदवेक्षणा -
ज्जनयितु : स्थिरसङ्गरतां न ।
अपि वपु : श्रियमस्य समीक्ष्य किं
धनुरधत्त तवेव न मामिति ।। ८२

विधिहते हि पुरोहितचोदिता -
वमुचमुज्वलति ज्वलनेऽक्षतान् ।
तटलतारुणतामरसो मरुत्
तरलिता सरस : प्रसवानिव ।। ८३

करतलेन कृती जनकात्मजा
करमवाप्य ककुत्स्थयुवा बभौ ।
परिसरे नलिनी प्रसवं यथा
किसलयेन कदम्बकिशोरक : ।। ८४

मनसो ह्युदिता ध्वजकन्दली
रुचिरिवास्य सरादिव जग्मुषी ।
अगरुपत्रसखी हरिणीदृश :
कुचतटे पुलकाङ्कुरमादधे ।। ८५

कृतपरिक्रमणौ स्फुरदर्चिष :
किमपि हव्यवहस्य वधूवरौ ।
व्यरुचतामचिरांशुवलाहकौ
परिणताविव रोहणपर्वतम् ।। ८६

सुरभिधूमपरिभ्रमणक्रमात्
सुवदना नयने कलुषाञ्जने ।
अरुणिमानमदर्शयतान्तरां
रघुधुरन्धररागमिवान्तरम् ।। ८७

रघुकुमारवलाहकसन्निधौ
तरुणकन्दलकन्दलचातुरीम् ।
व्यधित धूमविपाटिलितेन सा
नयनतामरसेन तलोदरी ।। ८८

अथ वधूवरयोररुणाक्षत -
प्रकरणं मणिपीठमुपेयुषो : ।
उदितपङ्क्तिभिरक्षिभिराशिषां
जनकबन्धुजनो निरवर्तयत् ।। ८९

उदभवत् सुभगश्रियमूर्मिलां
जनकजामपरामथ लक्ष्मण : ।
सुमनसां भरतोऽपि च माण्डवीं
तदनुज : श्रुतकीर्तिमपि स्वयम् ।। ९०

सपुलका समलक्ष्यत जानकी
स च सधर्मलवाङ्गुलिपल्लव : ।
क्षरति केवलमम्बुधर : स्वयं
ननु कदम्बलता मुकुलायते ।। ९१

इति पङ्क्तिरथस्तनुजन्मनां
परिणयेन परां मुदमानशे ।
दुहितृवीरवराधिगमादभूत्
निमिपतिश्च निनर्तिषुरात्मनि ।। ९२

हितरताभिरमीभिरुपाययु :
श्रियममी किल तैरपित : पराम् ।
विनिमयाहितपूर्वगुणद्वय -
व्यतिकरो विरराज तदन्वय : ।। ९३

स तनयै : सहितः सपरिग्रहै :
दशरथो रथरत्ननिवेशितै : ।
निरजिहीत निमिप्रभुणान्वितो
नगरतो नरलोकपुरन्धर : ।। ९४

चटुलचामर सम्मसनोच्चयां
चलचलाचलरुच्यसिचञ्चल : ।
सुलभरत्नशिरस्त्रसुरायुधा
नृपभटालटहानिरहासत ।। ९५

अनुगतं जनकं वसति त्रयी -
मथ निवर्त्य पथि व्रजत : प्रभो : ।
अपद एव विषादममुष्य धी -
रुपययौ पुरतोऽप्युपलिङ्गित : ।। ९६

वयमधिक्षुधिता : पुनरभू -
दिह हि बाहुजवंशसमद्यम : ।
इह शिवाभिरहूयत भार्गवो
रविमहिस्फुटवाशितलक्षित : ।। ९७

दशरथस्य पुरो ददृशे वने
गुरुरजोजुषि गृध्रपरम्परा ।
प्रियसखेन भविष्यदभावुकं
प्रथयितुं प्रहितेव जटायुषा ।। ९८

अभिमुखापतितां स्वयमञ्जना
सहचरस्तरसा रजसा बलात् ।
नृपवरस्य निवृत्तिमुपादिद्
हितकृतामियमेव हि पद्धति : ।। ९९

श्वशुररक्षणत : प्रसृतैर्बहि :
शमितनिम्बमलोच्चयमेदुर : ।
परिगतो रुधिरैरिव शोच्यतां
परिधिमान्विव पारमरीचिमान् ।। १००

अतितरां यदनागतवेदिनी
वसुमतीदुहितुर्वरवल्लभम् ।
किमपि गोपयति स्म रज : पटी -
परिकरेण पुरोभयकम्पिता ।। १०१

इति शुभेतरमैक्ष्य महीक्षितो
द्विजमुखात् कृतशान्तिक कर्मण : ।
महति धाम रजोदयवारिधा
वमलमौर्ववदस्फुरदग्रत : ।। १०२

पुरुषमङ्गविभाग विमोचना -
न्मुनिमदग्रजटापटलश्रिया ।
परशुना जमदग्निजमग्रत :
स तमबुध्यत दृग्विषयं क्रमात् ।। १०३

सह जटापटलां सशरासनां
जनकयो : प्रकृतिं किल दर्शयन् ।
स घनवर्षमिरम्मदमन्वगा -
दुदधिमूर्मिलहालहलं च य : ।। १०४

विजयते स्म न केवलमेव य :
पटुसहस्रभुजोर्जितमर्जुनम् ।
अविकलं दधदाश्रममग्रिमं
स्मरमपि स्मरधस्मरकिङ्कर : ।। १०५

सरभसं समुपेत्यभृगूद्भव :
परशुमप्रतिमं प्रतिचालयन् ।
क्व खलु राजकुलाङ्कुर इत्यलं
प्रकुपित : प्रति राममधावत ।। १०६

किममुना शिशुनार्घ्यमिदं कृपां
कुरु मयि क्रुधमुत्सृज रक्ष माम् ।
इति वदन्तमपास्य चिरन्तनं
स वदति स्म तमेव हि लक्षयन् ।। १०७

विजयसे रघुपोतक! वीर्यतो
वृषपताकशरासनभञ्जनात् ।
अहह बाहुभुवां कुलमुद्धरन्
पुनरपि स्मृतवान् न कदापि माम् ।। १०८

किमथवा परशुर्मम नार्पित :
प्रभवता भवता स्मृतिवर्त्मनि ।
विकटहेहयवीर्यसहस्रदो
विटपिसाटविपाटनलम्पट : ।। १०९

त्रिगुणसप्तविधं तृणवत् पुन -
र्नृपकुलं निरशेषयमाशिशु ।
त्रिषवण : स्नपितस्तदसृक्स -
रस्यकरवं पितृतर्पणमुल्बणम् ।। ११०

नियमिताग्रशिखो नियतं पुरा
गिरिजला सदयं कृतलालन : ।
भगवत : स्वयमेव पिनाकिन :
शरभुवा सममस्त्रमशिक्षिषि ।। १११

निपुणमस्त्रगुणं समवेक्ष्य मे
　　शरवणप्रभवेऽप्यचमत्कृत : ।
किमपरं भगवान् कृपयैव मय्य-
　　हह खण्डपरश्वभिधामधात् ।। ११२

धनुरभञ्जि तदीयमपि त्वया
　　जनकया .. जराघुणजर्झरम् ।
स तमदं सहते न गुरुद्रुहां
　　प्रलयहव्यवह : परुशुर्मम ।। ११३

भजसि राम इति त्वमपि श्रुतिं
　　ननु न तेन भवत्यपराधिता ।
यदिह नामकृत : कृतवीर्यभू -
　　पदमुपेष्यति न प्रजया यदि ।। ११४

अघमिदं मुनिरादिशति स्म य :
　　चमदकुर्वत ये सदसि स्थिता : ।
दुहितरं तवयोदितसत्यवाक्
　　शमयितास्मि वलात् सकलानिमान् ।। ११५

परवधूवधकर्मणि गर्वितो
　　धनुषि दर्शय मे तव धन्विनाम् ।
यदि तथा समुदितोऽस्मि किलान्यथा
　　भज भवायुधभञ्जननिष्कृतिम् ।। ११६

इति वदन्तमुपान्तपरिस्खल -
　　ल्ललितहासलवाधरपल्लवम् ।
अचकितस्तमचष्ट रघूद्वहो
　　विनयविक्रमधैर्यवदुत्तरम् ।। ११७

शमदमार्णव तातपुरस्क्रियां
　　परिगृहाण परित्यज विक्रियाम् ।
तदनु शिक्षय मां त्वरतेऽद्य ते -
　　त्वनुपलायितुमेष पराश्वथ : ।। ११८

शिशुतया शिशिरांशुशिखामणे :
किमपि चापलतां प्रति चापलम् ।
विरचितं विवहस्व ममान्यथा
विकृतिरुल्लसताद् विधिना तव ।। ११९

कुशिकसूनुमुखा महर्षयो
न जगतीपतयो जनकादय : ।
न च गुरुर्मम नन्वपराधकृत्
परमहं भवत : परमार्थत : ।। १२०

अथ धनुर्विनमय्य तदर्पितं
स विचकर्ष शरं समधत्त च ।
अयमनायि च तेन दयालुना
त्रिदिवमार्गमहार्गलतां मुने : ।। १२१

विषमिवाहिरनेन विमोचितो
रुषमृषि : शमधी : सतिरोहित : ।
अधिवसत्युदधेरुदरस्थलीं
परशुपातनिवारितपा ... स : ।। १२२

अथ गतवति तस्मिन् हर्षमासेदुषीणां
निमिपतिदुहितॄणां निर्मलान्याननानि ।
अकलुषसलिलानामापगानामिवासन्
शरदि सरसिजानि व्यक्तशोभोदयानि ।। १२३

अजनि भृगुसुतोपरोधात् पुरोधत्तदेवोद्वहन्

वपुषि पुलकवर्मनीरन्ध्रमानन्दलक्ष्म्या नृप : ।
विजयिनमभिनन्द्य रामं विवेश सुरतोरणप्रकर -
मुकुररश्मिधारालरथ्यामयोध्यां पुरीम् ।। १२४

इत्युद्दामवरप्रसादकविना सिंहासनाऽध्यासिन :
क्षोणीमीसरग्णडगुण्डयनिधे : क्ष्माकण्ठकोत्खण्डिन : ।
विष्णो : श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गोऽत्र षष्ठोऽगमत् ।। १२५

इति डिण्डिमसार्वभौमकृतौ श्रीरामाभ्युदये षष्ठ : सर्ग : ।।

सप्तमः सर्गः

ततो नृपे राजपथावतीर्णे वधूवरालोककुतूहलेन ।
बभूव सन्दर्शित विभ्रमश्रीस्त्वरानुबन्ध : पुरसुन्दरीणाम् ।। १

नीवीमवज्ञाय नितम्बभाराद् विस्रंसमानां प्रसभं व्रजन्ती ।
करस्थितेनैव शुकेनकाचिदादिश्यमाना स्वयमाललम्वे ।। २

अन्या ययौ लोचनमध्यमेव प्रसार्य पर्याकुलमञ्जनेन ।
अतित्वरारूढमवर्णमस्या : कटाक्ष एव क्षपयाञ्चकार ।। ३

स्रस्तोत्तरीया व्रजसीति सख्या शोणाधरा कापि गिरा तु कोप ।
विलोक्य बिम्बोष्ठरुचा वितीर्णं कल्हारताम्रं कपटोत्तरीयम् ।। ४

आपार्ष्णिलम्बानवकीर्य केशानाश्यानयन्ती स्नपनावसाने ।
अपास्य धूपप्रसवादिवाञ्छामन्या तदालोकनमार्गमार्गात् ।। ५

नितम्वभारान्निरुणद्धि पश्चान्नेर्ष्यावहे शीघ्रमिमामतीव ।
पुर : समावर्जितपूर्वकायापयोधराभ्यामपरा प्रतस्थे ।। ६

परिस्खलन्ती द्रुतयावकेन पदेन केनापि मणिस्थलीषु ।
अदत्तरागान्यपदावलम्वा परा ययौ पङ्कुरिव प्रयासात् ।। ७

लाक्षेति साक्षाद्रचयां बभूव पदाम्बुजे कुङ्कुमपङ्कमेव ।
मालेति केचिन्नवमालिकानां हारावलिं गर्भगतामनैषीत् ।। ८

आलोकयन्ती मुखमात्मदर्शे पाणेशितुर्दन्तपदावितोष्ठम् ।
तथैव या .... तदानीं ....निन्ये पदमेव वर्त्म ।। ९

परिस्खलत्यद्य मणिस्थलीषु पदे पदेऽस्याश्चरणप्रवालम् ।
इतीव पुष्पै : पतितं व्रजन्त्या : कस्याश्चिदुर्व्यां कबरीकलापात् ।। १०

आदाय नासाभरणाय काचिदारञ्जितं पाणितलप्रभाभि : ।
मुक्ताफलं डाडिमबीजबुध्या क्षिप्त्वा ययौ केलिशुकीमुखेषु ।। ११

अवादयन्त्यप्यधरान्नवेणिं प्रातिष्ठतान्याप्रसभं व्रजन्ती ।
अचिन्ति तत्तद्विवरेष्वमुष्या : वृथैव हि व्यापृतमङ्गलीभि : ।। १२

विजानती स्थापनमेवविघ्नं वीणाममुञ्चन्त्यपरा कराग्रा : ।
अभ्रं लिहत्सौधमधिश्रयन्तीविद्याधरीविभ्रममावभार ।। १३

प्रामुच्य पादाङ्गदमेकमेव दुद्राव काचिद् द्रुतमग्रवीथीम् ।
अन्य : पुनस्तत्क्वणितानुसारि हंसच्छलात् क्रोशमिवान्वियाय ।। १४

पादस्य लाक्षाप्रकृतिप्रभाभि : परोक्षितातित्वरया परस्या : ।
मुक्तावली धर्मकणावलीभि : कर्णोत्पलं चापि दधे कटाक्षै : ।। १५

विहाय डोलां रघुवीररूपमक्ष्यं चलेन स्फुटमापिबन्त्या : ।
कस्याश्चन प्रत्युत चित्तमेव डोलायते स्म स्मरदोहलिन्या : ।। १६

पाथोविकारं प्रकृतं निरस्य परापतन्ती मणिजालमार्गम् ।
तद्दर्शनानन्दतरङ्गितान्या स्वेदाम्भसा स्वाभिमतं प्रपेदे ।। १७

प्रवर्तितोऽपि प्रसभं निरासे कयापि राग : कलकण्ठकण्ठ्या : ।
पुन : स लेभे पुरतो भवन्त्या : रामाभिधानस्य रथाङ्गपाणे : ।। १८

लीलामयूरस्य निरस्य लास्य प्रवर्तनं प्रस्तुतहस्तताला ।
समीक्ष्य रामं सहसा स्मरेण प्रणर्तिताभून्मदनेन कापि ।। १९

गवाक्षमार्गाद् ग्रथितार्धमेव करेण मालामवलंब्य यान्त्या : ।
आपातिनीनां नखदीधितीनामापूरणश्रेणिरभूदमुष्या : ।। २०

अपास्य काचित् त्वरयाक्षलीला वातायनान्तं वनिता व्रजन्ती ।
सङ्कल्पनिर्वृत्तपणाभिरामा तामेव रामे तनुते स्म भूय : ।। २१

स्तस्तस्तनं मे स स सत्यमेव प्र प्र प्रविष्टो रर रामचन्द्र : ।
इत्थं तमालोक्य जहास तस्मिन् सङ्क्रान्तमन्या स्खलिता मदेन ।। २२

प्रागेव काप्याकुलिता मदेन पश्चात् तदालोकनपारवश्यात् ।
इत : स मे राघव इत्यलक्ष्यं क्रीडागिरिं केवलमारुरोह ।। २३

अन्याभिलाषोचितमाननन्ददवर्जयन्तं कुचभारमग्रे ।
निरोधहेतुं पुरतो नितम्बं निनिन्द सोपानपथाधिरोहे ।। २४

आयातु तूष्णीं किमिहासितव्यं रघूद्वहं पश्यत राजमार्गे ।
एवं सखीभावनया किलान्या सीमन्तिनी चित्रगतां जगाद ।। २५

कड्केलिमूले प्रतिमागतस्य कामस्य पूजामसमाप्य काचित् ।
अक्ष्णा पिबन्ती तमनेन साक्षात् सम्मोहिताभूत् सहसा रुषेव ।। २६

आकीलबन्धादवलम्बितायास्ततस्तदालोकरसच्युताया : ।
मध्ये स्थितान्या मणिमेखलाया : लतेव रेजे उचितालवाला ।। २७

आलिख्य चित्रे मदनाड्गमर्धं अन्या कराग्रे धृततूलिकैव ।
निर्वर्ण्य तं चित्रगतामवस्थां निमेषशून्यां स्वयमेव भेजे ।। २८

स्रस्ते च लीलाकमले तदैव सम्भाव्य हस्तं प्रतिचालयन्ती ।
सहर्षकम्पा तदवेक्षणेन तान्यप्यशेषान्यपहारितासीत् ।। २९

धृतं नखाग्रे त्वरया परस्याश्च्युतं तदग्रे स्वयमड्गुलीयम् ।
आगम्य सीताविरहात्यये मामस्मै पुनर्दास्यत इत्यवोचत् ।। ३०

कर्णान्तमुक्तान् कमलावतंसान् कीर्णानि पुष्पाण्यपि केशभारात् ।
अपास्य कामप्यरुधत् पुरस्तात् मात्राधिक श्वासवशाद् द्विरेफा : ।। ३१

ललामहेतोर्निर्मितां ललाटादत्याजयन्त्यड्गुलिमेव काचित् ।
ययौ युता सैव नखांशुमिश्रा ललाटिकाचन्दनकुड्कुमाभ्याम् ।। ३२

आलभ्य मुञ्चत्यपरा ललाटे तमालपत्रश्रियमातनोतुम् ।
आपादचूडं पुनरासासाद तामेव रामस्य तनुप्रभाभि : ।। ३३

बबन्ध मुक्ताफलजालमेका वक्षोजयोर्वञ्चनया त्वराया : ।
सञ्चारयित्रीं नवचन्द्रिकाया : किञ्चालके कञ्चुलिकां चकार ।। ३४

प्रधावनेऽपि श्रवणोपरस्या : प्रसाधिका कुण्डलमामुमोच ।
यत् साधनं प्राथमिकं श्रुतेस्तद्यत्नेन सद्भिः करणीयमेव ।। ३५

आचम्य मुक्ताफलवालिमेका हस्ते गृहीत्वा प्रययौ द्वितीयाम् ।
अनड्गमन्त्रस्य जपाय काचिदाबिभ्रतीव स्फटिकाक्षमालाम् ।। ३६

विलिख्यमानं मृगनाभिपत्रं विलोपयन्ती स्तनमण्डलेऽस्या : ।
अपत्रपाभूद् दरभिन्ननीवी निबन्धनादस्य निरीक्षणेन ।। ३७

प्रवालमात्रं श्रवणार्पणाय स्रस्तं न हस्तात् त्वरिता विजज्ञे ।
* आशङ्कयाऽस्याङ्गुलिमेव ताम्रं काचिच्चकार क्षणिकावतंसाम् ।। ३८

सिन्दूरचूर्णे शिथिलेऽपि हस्तात् सीमन्तमन्या तदवेक्षणाय ।
रत्नाङ्गुलीयद्युतिरागमेव कृतत्वरा केवलमानिनाया ।। ३९

विच्छिन्नहारा : कुचयुग्मलेभ्यो वितेनिरे मौक्तिकवर्षमादौ ।
पौराङ्गनामङ्गललाजहर्षं पश्चादमीषां करकुड्मलेभ्य : ।। ४०

राम : प्रकीर्णं रमणीभिरग्रे प्रत्यग्रहीन्मूर्धनि लाजवर्षम् ।
आरब्धमाशाकलभाङ्गनाभि : ऋङ्गीव हैम : करशीकरेण ।। ४१

तुङ्गस्तनीनां त्वरितप्रयाणेऽप्यभग्नमासीदवलग्नमासाम् ।
अमूर्तमुत्पत्तिविनाशशून्यमाकाशमित्यस्य ननु प्रतीति : ।। ४२

प्रायेण काञ्चीं पदनापदेशादालिङ्गति स्म प्रणयादयोध्याम् ।
आगामि जन्मार्हमनेन जज्ञे मनस्विनीनां मधुरावलोक : ।। ४३

तासां सुधापाण्डुरसौधभाजां तनुप्रभाचम्पकरागिणीनाम् ।
असम्भवाच्छारदनीरदानामापादयामासतटिद्विलासान् ।। ४४

त्रुट्यन्ति हारास्त्वरया किलेति तुङ्गस्तनीभिर्गणितं न किञ्चत्
स्वमध्यभङ्गेऽपि पराङ्मुखीनामन्यस्य भङ्गे करुणा किमासाम् ।। ४५

ततस्तदालोकनरागिणीनामनङ्गश्रृङ्गारतरङ्गितानाम् ।
संजज्ञिरे सर्वमनोऽभिरामास्तासां गिरस्तामरसेक्षणानाम् ।। ४६

वर्षीयसोऽन्ते मनुजेश्वरस्य रथस्थितं पश्यत राममेनम् ।।
विदेहपुत्र्या सह विद्युतेव नीहारशैलस्य नवाम्बुवाहम् ।। ४७

चित्रीयते नात्र जनः कदाचिद् यदस्य बाणप्रहृता किलैका।
प्रासङ्गिकेनापि जगत्यपाङ्ग पातेन विद्धं हृदयं न कस्या : ।। ४८

सुबाहुपूर्वान् पशुनिर्विशेषं रक्ष : प्रवीरा नृणयज्ञमूर्ध्नि ।
निहत्य सोऽयं निशितक्षुरप्रैर्वैमानिकस्त्रीवशतामनैषीत् ।। ४९

The last two lines are repeated in the Transcript

काचित् पुरा प्राभवदूरुकाण्डन् नारायणस्येति ननु प्रतीतिः ।
अमुष्य पादादमराधिराज सम्मोहविद्या तरुणी किलासीत् ।। ५०

अस्यैव रूपान्तरितो मनोभूरयुग्मदृष्टेरवभज्य चापम् ।
प्रायेण पुण्ड्रेक्षुधनुः प्ररूढं प्राचीनमुन्मार्जयति प्रवादम् ।। ५१

उदन्वदभ्युद्धरणात् तथा न माया वराहस्य मुखेन निन्ये ।
यथास्य जाता रमणीयमूर्तेर्ज्यामातृभावाज्जगती कृतार्था ।। ५२

इयं तमालप्रसवाभिरामलावण्यनिष्यन्दिनि रामभद्रे ।
आभाति वैदेहसुता प्रभाति हैमीव लेखा निकषानुषक्ता ।। ५३

वाचा विनैषा वदनप्रसादादनामयं लोकमिवानुयुङ्क्ते ।
अदत्तभासावसरा ह्रियापि हासाङ्कुरं व्यञ्जयतीव सीता ।। ५४

आवर्तवीचीचयजप्रवालपाठीनशैवालपरम्पराभिः ।
रङ्गेषु दत्ताभिरभूयतास्यानिबध्यमात्रा निजवाससीव ।। ५५

अक्लिष्टसौन्दर्यतरङ्गमङ्गमस्या न विस्मर्तुमिहावकाशः ।
अयोनिजा खल्वियमग्रहस्तपीडानभिज्ञैव पितामहस्य ।। ५६

अभ्येति कुम्भश्रियमङ्कुरेऽपि सन्नाहशालि स्तनयुग्ममस्याः ।
कालक्रमात् काञ्चनशैलकक्ष्यां क्रोडीकरिष्यत्यवनीकुमार्याः ।। ५७

उत्तिष्ठते नूनमुरोजयुग्मं क्षणात् क्षणं केवलमध्यमायाः ।
नेत्रे च दैर्घ्यान्निमिषान्निमेषमालम्बते साम्प्रतमायताक्ष्याः ।। ५८

अभूषितं भूषितमित्यभेद्यं सौन्दर्यनिष्यन्दि शरीरमस्याः ।
अनञ्जनं साञ्जनमित्यलक्ष्यमक्ष्यञ्चलं पक्ष्मलमायताक्ष्याः ।। ५९

अवाङ्मुखी किञ्चिदपाङ्गयन्ती सव्रीलरागा नयनं समीपे ।
व्यनक्ति सैषा विषमायुधस्य कोदण्डशिक्षाखुरलीमवस्थाम् ।। ६०

ताम्राधरं तामरसाभिरामं ताटङ्कपर्यन्ततरङ्गिताक्षम् ।
नीलालकं निर्मलगण्डरेखमस्या मुखं हन्त न वर्णनीयम् ।। ६१

बाणासनारोपणमेव शुल्कं नेता निमीनां यदि नाकरिष्यत् ।
अभ्युद्यतं यज्ञभुवोऽनुरूपमयोक्ष्यत द्वन्द्वमिदं कथं वा ।। ६२

आचक्रवालाचलमायतेन भुजेन भोगीन्द्रधुरन्धरेण ।
सहानुज : शास्तु भुवं समस्तां राज्याभिषिक्तो रघुवीर एष : ।। ६३

इत्थं प्रगल्भानि वचांसि तासामाकर्णयन् ..... नानि ।
तातं पुरस्कृत्य सहानुजन्मा रघूद्वहो राजकुलं विवेश ।। ६४

प्रत्युद्गता : पार्थिवमानमन्त्य : प्रवेपमानाङ्गुलय : प्रहर्षात् ।
आचारनीरा ...... न्वतिष्ठद् वधूवराणामवरोधनार्थ : ।। ६५

कृतप्रणामानथ भक्तिपूर्वं जनी सनाथांस्तनयान् जनन्य : ।
अवर्धयन् मङ्गलवाक्सुधाभि : सिन्धस्तरङ्गानिव चन्द्रभास : ।। ६६

अङ्गानि तासामपदिश्य साक्षात् कन्यामहाब्धेर्निमिकन्यकानाम् ।
चतुर्विधत्वं स्वयमप्यवाप्य चतुर्भुजांशाश्चतुर : सिषेवे ।। ६७

ततस्तया चम्पकपाटलक्ष्यां प्ररूढरागप्रणयानुवृत्या ।
रिरंसुरासीन्निमिराजपुत्र्यां रथाङ्गलक्ष्मा रमयेव राम : ।। ६८

विदर्भकन्याव्यपदेशपूर्वं नीता सखीभिः प्रियसन्निकर्षाम् ।
मुग्धा किमत्रेति मुखानि तासामारेचितभ्रूरवलोकतेऽस्मि ।। ६९

न केवलं तन्मुखदर्शनेन पराङ्मुखत्वं प्रतिपद्यते स : ।
कपोलसङ्क्रान्ततदीयबिम्बं मुखं सखीनामपि वीक्ष्य मुग्धा ।। ७०

तत्रापि हस्तान्तरिते सखीनां करे वराङ्गस्पृशति प्रियस्य ।
विभाव्यबाला परिणीति वेलां असौ कृताङ्गं सहसा चचाल ।। ७१

अग्रे सखीहस्ततलोपनीतां ताम्बूलवीटीं तरुणी स्पृशन्ती ।
प्रियेण दत्तेति तया प्रयुक्ते पाणिं सलज्जा प्रतिसर्जहार ।। ७२

तामन्तरा काममपि प्रगल्भा सखीशयाना श्वसितानुवृत्या ।
सुप्तेयमित्युक्तवतीमृषास्यास्वापं प्रयुज्य त्वरितं जगाम ।। ७३

सखी स्वयं तत्प्रतिबिम्बभावादक्षक्रियान्तेन सहाचरन्ती ।
जितेयमालीति तदङ्गुलीयमाक्षिप्य तस्या : करमानिनाय ।। ७४

अदृष्टपूर्वा स्रगियं तवेति प्रत्युत्तरं प्रार्थयितु : प्रियस्य ।
अमुक्तमौनग्रहणाप्यवादीद् विवर्तयन्ती वदनं मृगाक्षी ।। ७५

तस्यैकतल्पे तरुणं सखीभि : तारल्यमुक्ता सहशायितेति ।
साक्षात् समाश्लेषरसादिवाऽस्य प्रत्यङ्गमासीत् पुलकप्ररोह : ।। ७६

समं सखीभिः सरसैर्विलासै : प्राणेश्वरे नातितपारवश्ये ।
समीक्ष्यते स्म लनस्फुटसाध्वसेयं निमीलनोन्मीलनपर्ययेण ।। ७७

सामुद्रिकज्ञाननिधेरमुष्य प्रदर्श्यतामेष इति प्रयोगात् ।
सख्योपनीत : कर एव तस्या : स्वलक्षणं सेवमुखाद् विवव्रे ।। ७८

पत्यु : करस्पर्शनिवर्तिताग्रपाणे : प्ररूढं पुलकानुतापम् ।
तस्या : सखी वारयति स्म सद्यस्तस्यैव शैत्यातिशयप्रसङ्गात् ।। ७९

च्युतेति कर्णोत्पलरेणुरस्मिन् प्रमार्जनाय प्रसृताङ्गुलीक : ।
काकुत्स्थवीर : कथमप्यमुष्या : कपोलसंस्पर्शसुखं प्रपेदे ।। ८०

स कुन्तलं संस्पृशति स्म तस्यामधुव्रतोत्सारणवञ्चनेन ।
मुग्धेक्षणाया : स्तनकुड्मलं च मुक्तागुणश्लाघनकौतुकेन ।। ८१

विवर्तयन्ती मुखमाभिमुख्यादमुष्य कर्णोत्पलरेणुरक्ष्णो : ।
स्रस्तेति मिथ्या सभयं सखीभि : नीता तदुत्सारणनिष्कृतिं सा ।। ८२

दृष्टा सरागं दयिते स्थितेऽस्मिन् जातोरुकम्पा चकमे न गन्तुम् ।
संभाव्य किं तस्य मुखावलम्बं सख्या : समुद्भाव्य समुत्थिताया : ।। ८३

चेलाञ्चलं चन्द्रमुखी चकर्ष यद्यंशुकं मे हरसे निरुध्य ।
तदेष वासोऽपि विरुध्यते ते सख्यैव मुक्ता चकिता करेण ।। ८४

जग्राह नीवीं दृढबन्धमेषा किञ्चाबलेन श्रणमक्षमस्व ।
स्थातुं न वाञ्छा यदि वा प्रयाहि यद्वा प्रियो यात्विति तर्जयन्त्या ।। ८५

अधोमुखी न त्रपया किलैषा दृष्टं स्तने बिम्बितमेव कान्तम् ।
सखीभिरेवं प्रियसंमुखी सा दृष्ट्वा तिरोभूतमुखी बभूव ।। ८६

तत्संमुखी नाथ विगृह्य तस्या पर्याकुलास्यास्तिमितप्रचारा ।
तवानुरागाद् द्विविधा तमागाद् दृष्टिप्रसङ्गादृधषड्गुणेव ।। ८७

आलीपरीहकथाप्रसङ्गादारूढमन्दक्षगुणानुवृत्ति : ।
अन्तर्जपन्तीव किमप्यनङ्गविद्यारहस्यं विललास बाला ।। ८८

कपोलसंस्पर्शति कान्तहस्ते ससाध्वसेवोच्चलिता प्रयातुम् ।
हृदि स्थितं राघवमर्पयित्वा याहीति मुग्धा रुरुधे सखीभि : ।। ८९

निरुद्धनिश्वासमुदात्तकम्पं निमीलिताक्षं स्फुटरोमहर्षम् ।
असंमुखीमाननमुत्सृजन्ती त...न मुद्रां तरुणी बभार ।। ९०

पराङ्मुखी सा शयितान्वभावि स्पर्शं विना तेन किलापराङ्गे ।
आघ्राय सौरभ्यसरित्प्रवाहमस्या : प्रवृत्तं कबरीकलापात् ।। ९१

आशङ्क्य वासो हरणं किमासीदूरुद्वयं कम्पितमुत्पलाक्ष्या : ।
सम्भाव्य किं तस्य मुखावलम्बं बिम्बाधरस्य स्फुरणं बभूव ।। ९२

दृष्टिर्यदङ्गं दयितस्य भेजे तत्रैव तस्या : पुलकोऽस्तुनाम ।
अदृश्यमप्यावरणात् कथं वा काञ्चीपुरं कण्टकितं बभूव ।। ९३

अभूषणारोपणरोषत : किमारोहभारार्पणमत्सराद् वा ।
तदन्तिकान्निस्सरणं तरुण्या : सोत्कम्पमूरुद्वितयं रुरोध ।। ९४

सख्यां व्रजन्त्यां सहसा यियासु : करेणा कान्तस्य वितन्वतीव ।
तादृग्विधाश्लेषरसोपगूढं देशं किमन्ते (न मन्दं ?) बहिरालिलिङ्गे ।। ९५

श्रोतुं प्रियोक्तिं तनुते स्म तन्वीवलत्यमुष्मिन् वलिताननाभूत् ।
तत्साम्प्रदं येन कृतावधानमयं किलाकर्णयतां स्वभाव : ।। ९६

मुखाम्बुजस्योन्नमनं न सेहे न चुम्बनं बिम्बरुचोऽधरस्य ।
.....व्याननिस्सारणमन्वमंस्त न स्पर्शनं सा स्तनकुड्मलस्य ।। ९७

नीवीमुखं किञ्चिदवेक्षमाणे निबध्य केनापि करेण बाढम् ।
तत्पाणिरोधाय तदन्यमुच्चैर्निन्ये सकम्पं निबिड........... ।। ९८

निरस्तकेशग्रहडम्बराणि नितान्तदन्तक्षतनिःसहानि ।
अदत्तसीत्काररुतान्यवाप सोऽयं तदीयाधरचुम्बनानि ।। ९९

प्रेम .... प्रणयाभिनेयां तालस्तनीं नर्तयितुं तदानीम् ।
मनोभवः सत्त्वरमुत्थितोऽभून्मन्दाक्षनैपथ्यनिवारणेन ।। १००

आत्मानमस्मै ....दत्तरागानलसाक्षिकं सा ।
प्रकम्पिताङ्ग्या मणिभूषणानि प्रावर्तयन्मङ्गलवाद्यमस्या : ।। १०१

अगाढकण्ठग्रहदोर्लतानामापीड्यमानाग्रपयाधराणाम् ।
अस्यामृश........नवांशुकानां पात्रं स जज्ञे परिरंभणानाम् ।। १०२

व्याजेन चित्राकृतिदर्शनेन कामी परीहासकथामृतेन ।
निदर्शनेन प्रणयेन चैनां नितम्बिनीं स्वाभिमुखी चकार ।। १०३

स्वयं परिभ्रंशिदुकूलबन्धं स्वैरोपगूढं स्तनकुड्मलानाम् ।
विचित्रबिम्बाधरदंशनं तद् विहारमिच्छानुगुणं स लेभे ।। १०४

प्रियो गुरूणां प्रणयी जनानां विनीतिमान् नीतिमतां .... ।
अग्रेसरोऽभूदविकत्थनानां विशेषवादी विदुषां स राम : ।। १०५

दृढव्रत : सत्यनिधिर्दयालु : दाक्षिण्यवान् नीतिमतां वरेण्य : ।
स धैर्यमाधुर्यगुणाम्बुराशिर्गुरुं सिषेवे गुरुणा गुणेन ।। १०६

रामो रूपातिशयमदनो रञ्जयन् सानुरागं
सेवां कुर्वन् गुरुचरणयो : श्रद्धया वाग्विवर्ती।
भक्त्युद्रेकप्रणयहृदयं प्रीणयन् भ्रातृवर्गं
रामो नामोचितमरम ....यल्लोकमुद्दामलक्ष्मी : ।। १०७

इत्युद्दामवरप्रसादकवितासिंहासनाऽध्यासिन :
क्षोणीमीसरगण्डगुण्डयनिधे : क्ष्माकण्ठकोत्खण्डिन : ।
विष्णो : श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गोऽगमत् सप्तम : ।। १०८

इति रामाभ्युदये सप्तम : सर्ग :

अष्टमः सर्गः

अथ भुक्तमुक्तरस एष शल्मली-
फलतूलपाण्डु पलितश्रियं दधत् ।
परिदृश्यते स्म शरमत्ययोद्भवां
परिवृद्धिमेत्य नृपतिः पयोदवत् ।। १

नववयौवनाम्बुजतुषारसंहति -
र्नररक्तमांसकबलैकराक्षसी ।
प्रतिबिम्बितः किमपि शापमात्मन-
स्तनयापराधकुपितेन केनचित् ।। २

क्षयपक्षमाप हरिदश्वमण्डल
प्रविवक्षयेव नरलोकचन्द्रमाः ।
प्रणिधाय राज्यमुपधाम राम इ-
त्यमुमर्थमर्कमणिदीपमन्तकः ।। ३

कथयांबभूव तनुकंपखूर्जर -
च्छलदूतिकाविकृतिकैतवादिव ।
अथ संविधातुमभिषेकमङ्गलं
सचिवान् न्ययुङ्क्त सकलान् नृपानपि ।। ४

प्रतिचोदितः प्रियहितावहैर्गुणैः
पृथिवीपतिर्भरतपूर्वजन्मनः ।
नगरीप्रवृत्तिमुपलभ्य तस्य तां
न परं ननन्द सकलापि मेदिनी ।। ५

नलिनीव बालरविरश्मिकन्दलीं
नवचन्द्रिकामिव लहर्युदन्वतः ।
विशिखान्तरेषु विहिताभिषेचना
परितः प्रकीर्णकुसुमप्रसाधना ।। ६

स्वपरिग्रहाय पुर एव सा पुरी
स्वयमार्थितेव भरताग्रजन्मने।
पवमानलोलपटकेतुमालिनी
पटहादिवाद्य नदितानुसारिणी।। ७

करमुन्नमय्य तरलाङ्गुलीयकं
नगरी प्रमोदनटनं व्यधादिव।
अतिसृज्य तीर्थजलमर्णवापगा-
विविधौषधी भरमरण्यदेवताः।। ८

धरभृतोऽपि नवधातुसम्पदं
प्रतिपेदिरे तदभिषकर्मताम्।
उपहूयमाननृपतिर्दिगन्तरात्
प्रकृतातितर्पणविधिद्विजातिभिः।। ९

प्रहतानकः प्रकृतिहर्षसम्पदा
सममुद्ययौ तदभिषेकसंभ्रमः।
चलचामराश्चतुरदन्ततोरणा
मदवारणा मधुरपुष्पवर्षिणः।। १०

मणिमण्डना इव कुसुम्भमण्डनाः
प्रतिहारभूमिमभजन्त पङ्क्तिशः।
अपदिश्य राजभवनाभियातिन -
स्तुरगाग्रवपुषः प्रभावतः।। ११

बहुविग्रहो रधुभवोऽब्धि मन्थितुं
विववार वासवहयः कृतज्ञताम्।
अतिभद्रवीरमवनीपतिं हितं
धरणीभृतस्तदभिषेचनोन्मुखाः।। १२

उपगृह्य रत्नरुचिराण्युपायना -
न्युपतत्स्थुरुद्घटितपाणिकुड्मलाः ।
अथ क्लृप्तमज्जनविधिर्नवांशुकः
प्रतिकर्ममङ्गलधरः प्रतापवान्।। १३

अवलम्ब्य लक्ष्मणकरं शनैः शनैः
अभिषेकमण्डपमवाप राघवः।
मदवारणो नु मदनो नु मूर्तिमान्
मणिपर्वतो नु मकरालयोऽथवा।। १४

किमु चन्द्रमाः किमु मनोरथः सता-
मिति सन्ददर्श हृदयङ्गमं गुरुः।
उपनिन्यिरे मकुडमुल्लसन्मणि-
द्युतिदीपितद्युतलमस्य मन्त्रिणः।। १५

कनकाचलाङ्कुरमिवाग्रतारकै-
र्विविधैः परितमधिसद्म वेधसः।
प्रकृतं तदा तदभिषेकमङ्गलं
कठिनान्यवास्यत हन्त कैकेयी।। १६

कलिविक्रियेव सुकृतोदयं नृणां
श्रुतिसिद्धमर्थमिव सौगती मतिः।
श्रवसोः किमेतदिति पृच्छतः प्रभो-
र्वदनाद् वरद्वयमसावपादयत्।। १७

अविभावितक्रममृते तडिल्लता -
मशनीव प्रलयकालकालिका।
कृतविश्रमा किल रणेषु यस्य या
लभते स्म सा विजयपारितोषिकम्।। १८

भरतस्य राज्यकरणं ययोः फलं
भरताग्रजस्य च वने निवासनम्।
प्रतिबोधितः प्रथमविक्रये तया
परिपातिनि प्ररुदति प्रजेश्वरे।। १९

मुषितेव चित्रलिखितेव मूर्च्छया
बिषयीकृतेव जनता व्यतिष्ठत।
इदमाह पापमिषु ताडितापि सा
तरलामिमां किमभिपश्य ताटका।। २०

अथवा विधेर्विलसितादनाविलं
　　किमुपैति केकयकुलं कलङ्कितम्।
यदि पन्नगी हरति किञ्चिदेव सा
　　यदि राक्षसी कुणपवृत्तिरेव सा।। २१

यदि यद् ध्रुवं सजगतो महीपते -
　　र्बत जीविकाहरणकालरात्रिका।
अनया किमन्धमुनिशापमस्य तं
　　फलितं किमस्यत पराङ्मुखो विधिः।। २२

बत हन्त हा हहह कष्टमित्यलं
　　नरकं विलापमुखरं व्यलीयत।
विदितप्रवृत्तिरथ रामचन्द्रमाः
　　पुरतो व्यधत्त वदने प्रसन्नताम्।। २३

वचनं गुरोरवितथं भवेदिदं
　　जननीप्सितं भवति राज्यमित्यपि।
नरलोकराज्यसुरसंपदादराद्
　　विरराम राम इति कोऽत्र विस्मयः।। २४

अवधीरयन्ति यदुपासनक्रमा -
　　दपि वज्रपाणिपदमात्म .....नः।
प्रससाद तन्मुखमरोषतः पुरी
　　विषसाद तद्वनविवासवार्तया।। २५

हर एक एव हि पुरा हलाहलं
　　ज्वलनाकुले त्रिभुवनेऽप्यविक्रयः।
प्रणतं वनाय विससर्ज तं यदा
　　नृपतिस्तथैव रसमासवं जहौ।। २६

उदभूदमङ्गलनिधानमाशु यत्
　　तदिदं निवापसलिलं किमात्मनः।
शुचमम्ब! मुञ्च सुकृतं न ते परं
　　पदसेवनाद् ...... महीपतेः।। २७

भरतस्य भाव्यमियमेकराज्य -
मित्यममत्स्व मातरमसौ समाकुलाम् ।
अनपेक्षित स्वविपदा सुराहवे
क्षितिपस्त्वया प्रथममम्ब ! सेवितः ।। २८

प्रतिबाधितोऽद्य तदृढ..... तां
व्रजतीति केकयसुता ननाम सा ।
अयि मा यियासवि मया निरस्यतां
विपिनभ्रमं न विषहेत लक्ष्मणः ।। २९

इति तद्गिरात्मजविशेषगर्भया
कलुषीबभूव जननी कनीयसी ।
किमुपैयिवानसि कृशोदरि स्वयं
विपिनं हि दृष्टमृगराक्षसाकुलम् ।। ३०

इति कामिनाप्यभिहिता पुरोऽचल -
ज्जननी मही मम किलेति जानकी ।
अमुना निरस्तमभिषेकभूषणं
रुदतारवैरिव पपात भूतले ।। ३१

शरभूषणं पुनरमुष्य कार्मुकं
गुरुवाक्यमेव गुरुकण्ठभूषणम् ।
अविमुक्तभूषणघनोपरोधनं
वपुरस्य शारदमिवाम्बरं बभौ ।। ३२

अथवान्तरात्ममणिदर्पणस्पृशा
श्रुतिभूषणं किमुत भूषणान्तरैः ।
निरगादथैष निमिराजकन्यका
सह लक्ष्मणेन मनसा जनस्य च ।। ३३

नगरं नगारिमणिना विनाकृतं
कनकाङ्गुलीयमिव कान्तिमत्यजत् ।
भरते भुवं न पुनरीक्षणं गुरोः
शुचमम्बयोरिव जनेष्वनाथताम् ।। ३४

स जगाम दातुमिति नाम रक्षसां
निधनं विधातुमिति निश्चिनोति कः।
स रथं सुमन्त्रिभृतरश्मिमास्थितः
प्रययौ निवर्त्य जनमन्वगाद् गतम्।। ३५

अनुगच्छतां पथि दविष्ठमस्ति किं
पुनरीक्षणं तदनया शुचेति किम् ।
मम राम राम राम राम मामुप -
गूह गाढमुपगूह मामिति।। ३६

विरहेण तस्य विलपन् महीपति-
र्बलभित्सहासनमभुङ्क्त शाश्वतम्।
भरते विदेहजुषि राघवे पुन -
र्वनभाजि कल्पवन भाजि पार्थिवे।। ३७

अवलुण्टन क्षममवाप वापिका-
तटभूकपित्थफलधर्मवत् पुरम्।
अनिमेषतां दरारथे दिवि व्रजत्य -
निमेषवृत्तिरजनि प्रजास्वपि।। ३८

अचलैर्जलाशयचलाचलैर्युतः
प्रबलप्रहारसुकरैरभूयत।
पुर एव तद्वदनवासवेदना
विधुरा ततो नृपदशाविपर्ययात्।। ३९

अथ भूररक्षतया प्रचक्षुभे
विपदुच्यते हि विपदोऽनुबन्धिनी।
उपगम्य मृत्युमुपलभ्य तद्गुरो-
र्भरतः क्षणं तमुपगम्य मूर्च्छया।। ४०

व्यलपत् तथा स्वजननी प्रजावती
न यथाभवद् वसुमती प्रजावती।
निलयं निषादनिलयस्य जाह्नवी
तटभूषणं सह सुमन्त्रमेयिवान्।। ४१

स बबन्ध तत्र किल केकयात्मजा
व्यवसाय दुर्विषतरोर्जटाजटाः ।
अशिखामणौ शिरसि तं नभोमणौ
शिरसी शून्यनयनं विसारथिम् ।। ४२

विनिवर्त्य तत्र गुहमग्रतो नय
स्तटमासदत् सपदि सौरसैन्धवम् ।
अवकीर्य शैवलकचान् विनिपातयन्त्य -
वशं तरङ्गभुजमात्रकुलारवैः ।। ४३

व्यलपद् भगीरथरथोद्भवं भवं
विपिनोन्मुखं तमवलोक्य जाह्नवी ।
रघुनन्दनं तमरविन्दलोचनं
सुकृती गुहः सुरनदीमतारयत् ।। ४४

चरणारविन्दमधुबिन्दुरस्य य -
ज्जलमेव तारयति जन्मसागरम् ।
क्रमशोऽतिलङ्घ्य पदवीं दवीयसीं
प्रतिपूजित प्रतिदिनं महर्षिभिः ।। ४५

अथ चित्रकूट इति रत्नजातिभि
र्गिरिमन्वितार्थमभजद् रघूत्तमः ।
असितोष्णवारणमिवावलम्बितं
वसनश्रिया तटतमालमासदत् ।। ४६

गिरिगह्वरादिव समुद्यतं तमः
पटलानि रोद्धुमरुणातपोष्मणा ।
परिवृत्य वर्त्मनि पयोधरोद्यम -
प्रचरीकृतार्तिमवलम्ब्य जानकीम् ।। ४७

निषसाद मूलभुवि तस्य निर्मल -
स्फटिकांशुदत्तपरभागसम्पदि ।
अनुजस्तृषामहरदग्रजन्मनः
सरणि श्रमात् तरुतले निषेदुषः ।। ४८

नवकूपतोयमुपनीय वल्लरी
दृढबद्धशाकदलसम्पुटोद्धृतम्।
परिमार्ज पार्श्वतरुपल्लवाञ्चलैः
परिधूसरं पथि रजोभिराननम्।। ४९

श्रममस्य शेषमुखवातमर्हतः
कदली नवीनविरलीचकार सा।
अवतंसितं प्रणयिनास्य पल्लवं
न बभौ कटाक्षसविधे नतभ्रुवः।। ५०

अमुना तदीयतनुकान्ति तावना -
मवतारास्तु पुलकाङ्कुरा बभूव।
भरतोऽप्यवाप्य पितुरापदी रणात्
प्ररुदन् पपात रघुनाथ पादयोः। ५१

स गिरिर्बभार सकलेषु मूर्च्छया -
स्तिमितेषु तेषु किल चित्रकूटताम्।
भरतेन भक्तिमहतापि याचितो
रघुवंशराज्यभरणाय राघवः।। ५२

चकमे चतुर्दशसमास्वपि क्षण-
विनिवर्तितुं न विपिनाद् दृढव्रतः।
अखिलस्य कारणमहं यदम्बया
गमितेव न त्वधिदेवं गतो गुरुः।। ५३

महतापदं छलमियं च किं मया -
प्यनुभाव्यमित्यवरजस्तमब्रवीत्।
स यदा न दक्षिणतयोत्तरं किम-
प्यवदत् तथार्थयत तस्य पादुके।। ५४

गुरुपादुकैव गुरुसन्निधावपि
प्रतिपूज्यते किमु गुरोरसन्निधौ।
विनिवर्त्यते स विभुना प्रसादिते
नृपपीठसीमनि निवेश्य भक्तिमान्।। ५५

विमुखश्रियामपि पुरोपशल्यभाग्
वृतमग्रजामगविपाकमाचरत्।
गुरवे स दत्तगिरिनिर्झरोदकः
प्रसमाप्य कार्यमुचितैः फलादिभिः। ५६

प्रययौ तमद्रिमपहाय पादुका
रहितेन पादकमलेन राघवः।
अवकर्ण्य केशभरमम्बवाससा
त्यज पांसुमध्वनि तृणमान्तरे व्रज।। ५७

क्षपया तलेक्षणसितानने......... -
त्यबलां किलाभिदधिरेऽध्वगाङ्गनाः।
प्रतिकन्दरं मुकुलितेक्षणा भिया
प्रतिनिर्झरं सलिलपायिनीमृषा।। ५८

प्रतिवृक्षमूलमवलम्ब्य जानुनी -
सुचिरं निषद्य सुमुखी जगाम सा।
धनुरञ्चलेन विनिवार्य कण्ठकान्
दृषदः पदेन पुरतः परिव्रजन्।। ५९

अवकीर्य पल्लवतुषानतूतुषत्
सदयो न.... यां सलक्ष्मणः।
परिहृत्य वर्त्म दृषदः परापते -
त्यबलाविभोर्गिरमरुद्धकेलिना।। ६०

चरणं तवैव ललनार्पणोचितं
तरुणीशतं यदि भवेदितीर्ष्यया।
स दृ ..... क्षमदहारिकैशिकं
वपुरस्य वीक्ष्य च वलाहकच्छवि।। ६१

न च नर्तितुं न च निवर्तितुं शुचः
प्रजगल्भिरे प्रतिवनं शिखण्डिनः।
रस .... लघनसारकेसरं
स तमालमालकृतमालमालती।। ६२

स मुकुन्दकुन्दपिचुमन्दकुन्दलं
सह झिण्टि पुण्ड्रककुरड्कपिण्डिकम् ।
चिरिबिल्वविल्वशिवमल्लिमल्लिका
गिरिमल्लितिल्लफणिवल्लिवेल्लितम् ।।६३

नवपल्लवोल्लसितसल्लकीदल -
ग्रहफुल्लगल्लगजमल्लसङ्कुलम् ।
शिखिचञ्चुसञ्चलितकण्ठिकिस्फुटा
मणिदीपदीपितमहागुहागृहम् ।। ६४

करिघोषभीषितकुरङ्गसङ्कुले
क्षणनीलनीरजवनीघनीकृतम् ।
जगदन्तकुन्तभृतगन्धवाहभुक्
दृढबन्धचन्दनवनान्धकारितम् ।। ६५

गिरिकुञ्जगुञ्जदिभपुञ्जभञ्जना -
वृतचञ्चुपञ्चमरससञ्चयाञ्चितम् ।
शुकषण्डतुण्डपुटखण्डनक्षरत्
....फलपूगरसपूरपूरितम् ।। ६६

परिपिङ्गतुङ्गतरमातुलुङ्गिका
फलभङ्गलङ्घनपटुप्लवङ्गमम् ।
अभिजातचूततरुपोतनूतन-
प्रसवाभिजातपिकजातिभीतिकम् ।। ६७

स्मयमानपूगवहमानसौरभ -
स्वदमानविन्ध्यपवमानकन्दलम् ।
अविशङ्कलङ्घितकुरङ्गकजाङ्गल-
क्षतजक्षतक्षुधतरक्षुरक्षितम् ।। ६८

मधुमत्तलुब्धपतिमत्तकाशिनी
कुचकुम्भलम्बकरिकुम्भमौक्तिकम् ।
गुरुगात्रपोत्रिकुलपोतनिर्दय -
क्षतमुस्तरस्थपुटनिस्तरस्थलम् ।। ६९

करविद्धप.मकपित्थसत्वर -
ग्रहलुभ्यदृक्षगणबिभ्यदध्वगम्।
उरुकुम्भकर्णवशमुत्प्रकम्पनं
स्थितमाल्यवद् धृतविभीषणाकृति।। ७०

स विवेश चण्डकररश्मिदुर्गमं
दशकण्ठराज्यमिव दण्डकावनम्।
अवधिं विना गुरुलघुक्रमोल्लस -
च्चरणेन वा नरगणेन सङ्कुलम्।। ७१

बहुवर्णभङ्गिविलसत्पदोदयं
....दण्डकतया यथार्थया।
सह तालवेणुरणितं समुल्लस -
त्ककुभं प्रवालमुपकण्ठदुन्दुभिः।। ७२

स वराटिकागुणनिषादसङ्कुलं
तमवेक्ष्य नृत्यदिव तद्वनं बभौ।
चिरसोटवर्षशिशिरोष्मयन् मुनिः
द्विजसंवृतं ध्रुवमुपातवल्कलम्।। ७३

सजटं धृताक्षवलयं सभूतिकं
सजपं तपश्चरति तद्दिदृक्षया।
हरिणीभिरक्षिसरणीमसंशयं
करिणीभिरार्तिकरणीं गतिं पथि।। ७४

कबरीमवेक्ष्य शबरीदृशो द्रुतं
भ्रमरीगणेन चमरीगणेन च।
प्रतिबोधचन्द्र इति तं विभावयन्
प्रणनर्त तापसगणः पयोधिवत्।। ७५

तरुणाम्बुवाह इति तत्र संहतिः
शिखिनां च चञ्चलशिखण्डिमण्डलम्।
इदमद्भुतं न विशतीह ताटका-
मथने शशामदमुना वनान्तरे।। ७६

स्मरणादपि प्रशममस्य यन्नृणां
भजतीति तापकरणोद दवानलः।
तटनर्मदाम्भसि निमज्य चण्डिका
मृगराजकेसरविधूतिसाहसी।। ७७

मृगनाभिगण्डलहरी धुरन्धरो
विभुमन्वरुन्ध किल विन्ध्यमारुतम्।
सरणिश्रमेण शफरीदृशाङ्कभाक्
पतिरस्वपत् तरुतले कदाचन।। ७८

विलिलेख तत्कुचतटं वृषात्मजः
प्रविशन् नखैः प्रमुख एव पक्षिताम्।
नखलेपनं स्तननिपायिनः शिशोः
जननी हि तत्कृतममंस्त जानकी।। ७९

ग्रहणी मुनेर्गिरिशमौलिरत्नसूः
नयनान्नवस्य पतिभक्तिनन्दिता।
नवमङ्गरागमतिसृज्य जानकी
नलिनीप्रभेव तरुणैरभूषयत्।। ८०

निशि लक्ष्मणः स्वपननिस्पृहोऽदधत्
तृणतामसेवत तृणेशयं गुरुम्।
अवनिद्रयोगिजनदर्शनीयता
मनुबोधयन्निव फणीन्द्रशायिनः।। ८१

अथ रोषघोषपरुषो रघूद्वहं
रुधिराभिवर्षिरुरुवैरिचर्मभृत्।
उपलिङ्गितोदय इवोष्णदीधिती
रुरुधे विराध इति कोऽपि राक्षसः।। ८२

जनकाद्रिजाग्रहणजातचपलो
विपुलौ भुजौ सविशिखेन राक्षसः।
विनिपात्य विन्ध्यगिरिकाननौकसां
विदधे त्रिधा नहुषवाससंभ्रमम्।। ८३

परितः परिस्फुरितजीवमेव तं
विकटे विराधमवटे विधाय तौ।
स वरादसौ स्वकुलसंभवस्थलीं
विशदादतीव करुणौ विवव्रतुः।। ८४

पथि पञ्चपूर्वमयमस्फुरोमयं
मुमुदे निशाम्य मुकुरं वनश्रियः।
अशृणोत् तदा नवमदृश्यवादकं
कलहं स नूपुररवैः करम्बितम्।। ८५

विहरत्यदृश्यत मण्डुकर्णभू-
र्विबुधाङ्गनाभिरथ नृत्तगीतिभिः।
मणिना कृते मणिविमानमित्यसौ
विदितः कुतोऽपि विजयं च मान्मथम्।। ८६

रणरङ्गसीम्नि शरभगवार्तया
रहितोऽपि राक्षसकुलस्य राघवः।
शरभङ्गमेत्य जगृहे च सत्क्रियां
मघवन्मुखामरमनोरथोदयः।। ८७

सरणिं विलङ्घ्य वनशैलसङ्कुलां
सजगाम कुम्भजनुषस्तपोवनम्।
विनिनीषुरम्बरविलङ्घनश्रमं
रविरप्यहास्त वनमस्तभूभृतः।। ८८

पुनरर्णवं कबलयंस्तदम्भसा
परिपुष्यतश्चिरगताभतालसान्।
इति तापसार्थिजनचक्रशोभिना
दिवि होमधूमपटलेन दर्शितम्।। ८९

तरुलम्बिताद्रितरुवल्कलस्पृशा
परिलूनशोषितपलाशदर्भया।
स्ववबोधमान्तिकभुवा स्ववर्णक -
प्रणयस्नुतापतितधेनुवर्गया।। ९०

निजमार्गरोधनकृतो निपातनात्
पृथिवीभृतो मुनिकृतात् प्रहृष्यता।
विधिभूयमानममलं विवस्वता
विशदादिनान्तसमये प्रकाशितम्।। ९१

उपगम्य वामनतया किमात्मभू-
मुदयोन्मुखं शिखरिणं न्यरुन्ध यः।
तमरुन्धतीसहचरस्य सोदरं
भजति स्म मुनिमेष भक्तिमान्।। ९२

कुपितस्य यस्य कुपितं व्यभाव्यत
भ्रुकुटी पुरा हि भुजगीति खेचरैः।
जनितः क्षणादजगरः स्वयं यया
नहुषः पपात विषयादहिद्विषः।। ९३

व्यवहारि वारिकलुषस्य विक्रिया
प्रतिपते यदुदयात् प्रसन्नताम्।
अधुनापि च स्मरदिवाम्भसां निधे-
श्चुलुकोदरग्रहणशोचनीयताम्।। ९४

प्रतिपादिता स्वपदविघ्नपाना-
दिव दीपितद्युमणिनांशुकन्दलीः।
दधता जटा जलधिना पुरा कृता
त्रसतेव विद्रुमलता समर्पिताः।। ९५

विजितेन विन्ध्यगिरिणेव नर्मदा
पयसः प्रवाहमुपदीकृतं त्रिधा।
अलमात्मनः पशुपतेः प्रसाद इत्य-
मलं दधानमनिशं त्रिपुण्ड्रकम्।। ९६

सशरं धनुः किमपि वैष्णवं ततः
करवालमुल्लसित काञ्चनत्सरुम्।
शरधिद्वयं च निरपायसायकं
दिदिशे मुनिर्दशरथात्मजन्मने।। ९७

तस्याज्ञामधिगम्य सालवलयोदग्रां समग्रोल्लस
ल्लश्रीश्रीमदशोकराजवपुषोपेतां पृथुस्यन्दनाम् ।
रामः पञ्चवटीं पुरिमिव निजामिक्ष्वाकुवंशाश्रया -
मत्पद्माननमत्तवारणघटामुत्तेजयन्तीं ययौ ।। ९८

नैपथ्यं चोरसार्थादपि चरमुषितं लब्धवान् कार्तवीर्यात्
सञ्जज्ञेयाभिरामा सहचरणाकृतोत्तेजनाद्रामनाथात् ।
तच्छ्रीमडिण्डिमोद्यद्ध्वनिभृतककुभः सार्वभौमस्य काव्ये
नाम्ना रम्येऽत्र रामाभ्युदय इति समाप्तोऽष्टमः सर्ग एषः ।। ९९

इति रामाभ्युदये अष्टमः सर्गः ।।

नवमः सर्गः

अथ कृतमनुजेन पञ्चवट्या -
मुटजमधिश्रियमाश्रितस्य तस्य।
वरतनुकुचमण्डलोष्मदायी
हिमसमयो हृदयं वशीचकार।। १

दिनकृति कृतदक्षिणानुषङ्के
हिमपरिपाण्डुमुखी धनेश्वराशा।
रजनिषु विववार दीर्घयामा -
स्वधिकतरश्वसितोद्गमामवस्थाम्।। २

मरुवकसुरभीणि मन्दवीर्य -
द्युमणिकराणि तुषारधूसराणि।
अभिलषितहसन्तिकान्यभूवन्
अनुचितविभ्रमभूषणान्यहानि।। ३

विगलितघनसारसाररागा
विरलितकुङ्कुममण्डना मृगाक्ष्यः।
अगरुरसमयोजयन्त कण्ठे
समुचित एव हि शङ्खपङ्कयोगः।। ४

अधरकिसलयान्यदूषयन्त्यो
दृढतरदन्तनिपीडनासहानि।
प्रणयिषु दधुरङ्गनाः प्रकाशं
शिशिरमरुद्व्यवधीनि सीत्कृतानि।। ५

कथमपि हिमराहुणा पराह्ने
तरलिमुक्त इवात्तरक्तसारः।
तरणि रजनि कामिलात्तचक्षुः
सदृशपरिस्फुरणातस्तदानीम्।। ६

अवगमितनिशात्ययावमर्शं
हिमपटलं दिनयौवनेषु भित्वा।
उडुरमण इवार्णवादुदीर्णः
परिददृशे पतिरोजसां कथञ्चित्।। ७

हिमशिखरिणि मारुतेतराणि
घुषिततनोर्गिरिशेन पुष्पकेतोः।
व्यधिषत हसितानि विश्वमोहं
कृपणतराणि हिमानि कीदृशानि।। ८

परिहृतदनुजत्रपः पिनाकी
हि ति निधनेषुजुषा पुराण्यधाक्षीत्।
मरुचकचिरिबिल्वकुन्दवर्जं
सकलमहत् प्रसवं हिमैः सहस्यः ।। ९

हसितकुरुणकुन्दपुष्पबाणान्
वलयितचापकरो ववर्ष कामः ।
मधुरसमहितो महीतुषार
मपकरमघः परितस्तरे परागः।। १०

परुषतपनचन्द्रभूतमूर्तिः
पुरहर इत्यनुमानसाध्यमासीत्।
सकलमपि समानशो यदेषा
तुहिनमयी हसिताङ्गरागशोभा।। ११

तुहिनकबलितो बभूव सूर्यः
स्वयमपि शोकभरादिवाकुलाभिः।
पतितमवमत्सु पद्मिनीभिः
प्रशिथिलकेसरकर्णिकापलाशम्।। १२

परिहितभसितावकुण्ठनोऽभूत्
पवनसखो हिमपीडयेव गुर्व्या।
यदि कथमपि दीपितस्तदानीं
भजत विचित्रनिवेशितामवस्थाम्।। १३

विहगरुतविभाव्यसैकतानि
श्लथकमलच्छदशीफरान्तरणि।
अवसितहिमपीडयाटवीं स्वा -
मसितपटीमिव गौतमीतटानि।। १४

तुमुलतरमुदञ्चिते तुषारे
द्युमणिमहः पटलानि धौसराणि।
गगनमुदगमन् ग्रहीतुकामाः
शशधरदीधितिशङ्कया चकोराः।। १५

उचित तदनुभावयोजितार्था
समयिजना श्रुतिसम्प्रधायगर्भान्।
प्रतिदिवसमुखं स्वदेवतानां
प्रणिजगदुः प्रतिबोधगीतिबन्धान्।। १६

परिभवमतिदुस्सहं सह स्यात्
पवनसखः पर एव किं विभाव्य।
स्तिमिततरमवस्थितस्तदानीं
त्रिनयनगोलकलोचनं प्रविश्य।। १७

हरकरदहनं निरुष्णमैच्छत्
तरुज .... पेत्यवतंसनाय गौरी।
अनल इति हरेर्भुजान्तरस्था
कमलगृहापि च कौस्तुभं सिषेवे।। १८

उषसि दिशमुपासृतः कृशानो-
रहरपि धौतमनप्रविश्य साक्षात्।
व्यनयत शिशिरव्यथां विवस्वान्
विधुरपि रुद्रविलोचनान्नियोगात्।। १९

गरलदवधुगर्भितेन शय्या
भुजगधुरन्धरपूत्कृतेन गुप्तम्।
प्रलयमुपगतेऽपि पद्मजाते
परिददृशे मृगनाभिपद्ममेव।। २०

अचलवनजलाशयाजितानां
शरणममीव विमृश्य शैत्यभीत्या।
उरसिजतटमूष्मणा वधूना-
ववनमागमिवानि च प्रभूणाम्।। २१

गुरुहिमभरमित्यभाजि गुञ्जा-
फलवदलं परिपुञ्जितं प्लवङ्गैः।
जलचरितमिदं जनोऽप्ययासी-
दनलमनूष्मलमन्वहं निषेव्य।। २२

अपहतमंशुभिश्चिरं यो
विधुररविन्दविवस्वदन्तरायम्।
स्वयमजनि स कीदृशं स्वमित्रं
कुमुदवनं च कुतो मुखं बभूव।। २३

स्वयमुपनयमूष्मभिः स्वकन्या
कुचतटपञ्चवटीहृदोपलक्ष्यैः।
धरणिधरमहार्णवैर्धरित्री
सहसि सशैत्यगिरिमणि तं सिषेवे।। २४

दशरथतनयः प्रदीपदारु -
स्तबकितसीम्नि पर्णशालिकायाम्।
शिशिरमिति निरङ्गुशोष्मसीता
स्तनपरिरंभ रसावनेन निन्ये।। २५

अथ किल मिथिलाधिराजकन्या -
सहचरमेत्य निशाचरी सलीलम्।
स्वपतिमुपगृहीतकूपलक्ष्मी -
रवृणुत शूर्पणखेत्यनङ्गतप्ता।। २६

जनकदुहितृदर्शनान्निरस्ता
रघुपतिना रजनीचरी तदानीम्।
तदवरजमवापी चञ्चलाक्षी
विपनयते विषमायुधोऽपि लज्जाम्।। २७

पुनरपि तदवज्ञया निवृत्ता
पुरुषमुपाश्चुत पुष्कराक्षमेषा।
परिपरिसरपादपद्वयान्तं
व्रततिरिवोत्तरदक्षिणनिलाभ्याम्।। २८

अयि किमवरजेन कन्दमूलाहरण -
मृते प्रदिशाम्यनर्धभोगान्।
मनसि कलय मा मर्त्यनारीं
मदकरणं मधुमांसमाहरिष्ये।। २९

करिकलकलकम्पमानननाना -
मृगनयनोत्पलमेदुरेषु तेषु।
परिमणित परस्परैकभावं
विहर मया सह विन्ध्यकाननेषु।। ३०

परिमलपरिवाहिनी प्रपाली
कुसुमरजोभरकुङ्कुमारुणेषु।
कलरवशिखण्डिमण्डलेषु कालं
गमय मया सह गौतमीतटेषु।। ३१

इति रमितरलां विकुर्वदेनां
विहसितमुल्लसितं विदेहपुत्र्या।
निगलितमरुतां निशाचराणां
कुलविषदङ्कुरकोटिमाललम्बे।। ३२

उपहसितवती यदुन्मदानां
न किमुरमी नकुली निराकरोति।
सपदि कबलये प्रियां तवैना
मिति परुषं रघुवीरमीरयन्ती।। ३३

कपिलकचभरं कठोरदंष्ट्रा
भ्रुकुटिमदद्रिगुहा भयङ्करास्यम्।
मलिनमरुणवर्तुलाक्षमेषा -
वपुरभिधानवदन्यदाललम्बे।। ३४

अथ भयतरलायतक्षमङ्के
जनकसुतानिजजीवितेश्वरस्य ।
अपहतसमयाम्बुवाहमाला
रसितभयात् सरसीव राजहंसी ।। ३५

अहरत वनितेत्यसून्न तस्या -
विकृततनोरथ लक्ष्मणो विदग्धः ।
अकृतनिरुपरोधमाकुलानां
मड्ड(?) कुरुतां प्रसरं परं कृपाण्या ।। ३६

परुषमियमुभौ प्रतर्य दंष्ट्रा
रज ...कणार्धनिषिद्धरक्तसन्ध्या ।
सपदि जननिवेशमेत्य चक्रे
खरमुखमुदितेन निखातशल्यम् ।। ३७

असुरपरिषदां गिराप्यगम्यं
सुरमनुजैः स्वपनेऽपि दुर्निरूपम् ।
स्वसुरभिभवमीदृशं निशम्य
स्वपुरमगात् स्कुटमन्युना खरेण ।। ३८

शकलितशिरसोः शरैरुदग्रैः
कपटतपोधनयोः क्षणेन यूयम् ।
वितरत रुधिरं कवोष्णमस्यै
विलपत तत्र विहायसा समूहः ।। ३९

इति रजनिचराः खराः प्रयुक्ताः
प्रहरणभीमकाः परसहस्रम् ।
अभिययुरमुमाशु शूर्पणाख्या
रुधिरनिपाननिवेद्यमानमार्गाः ।। ४०

विघटितगिरिसन्धिवीरघोष
क्षुभितजनं कुणपान्धसमनीकम् ।
तृणमिति निरवर्णि तेन दूरात्
कुलमिव पञ्चमुखेन कुञ्जराणाम् ।। ४१

मृगदृशमनुजे दृशं विपक्षे
　　करमिषुधौ विदधे ककुत्स्थवीरः ।
अयमयमिति नैर्ऋतैरनेको
　　युधि ददृशे रघुवीरसूनुरेव।। ४२

पृथगिषुपतनभ्रमाय तस्मै
　　न तु विभुतास्य न भीरुतापि तेषाम्।
श्रुतिघटितगुणध्वनि स्वशास्त्र -
　　क्रममजहद्भिरमीभिरीरितस्य।। ४३

विषमपदनिवर्तनात् समित्यां
　　व्यतनुत निर्हरिणं सदूषणस्य।
खलखरमुखरांश्च खण्डयित्वा
　　खगपति खञ्जनकारिणा खगेन।। ४४

खमणिरिव तमं खलं खलीनं
　　खरमहनत् खरविक्रमं स रामः।
सरभसमसुखेन सायकेन
　　त्रिशिरस एष शिरस्त्रयं जहार।। ४५

यतिरिव तपसा त्रयं गुणानां
　　भिषगिव तन्त्रबलेन सन्निपातम्।
रजनिचरकुलं रघूद्वहोऽपि
　　त्रिगुणितसप्तसहस्रसंख्यमस्मै।। ४६

क्षणमिव कृतवान् कृतावशेषं
　　सह विपदा जगतां चतुर्दशानाम्।
रजनिचरशिरांसि रामबाणैः
　　समसमयं समये निपातितानि।। ४७

चमदकृषत धन्विना विशेषं
　　क्षितितललोढनकैतवात् तदीयाम्।
फलितमहह नासिकापराध -
　　प्रतिकरणोद्यमनं शिरोनिपातात्।। ४८

इति किल विजघूर्ण नृत्तलक्ष्या
दनुशयितः पिशितान्धसां कबन्धः।
चपलतरमुपेत्य चण्डिकायाः
परिजनभूत पिशाचमण्डलीभिः।। ४९

नियमितनभसङ्गमं निरूहे
नवपिशिताग्रयणं निशाचराणाम्।
गतमखिलमवेक्ष्य बन्धुवर्गं
रणमुखि शूर्पणखी शुचा रटन्ती।। ५०

अविगणितविरूपतान्यथासी
दसिपतनेन हि दन्तशूकपीडा ।
समरभुवि सहस्रशो हतानां
परिणततालफलभ्रमाः शिरांसि।। ५१

कुवलफलधिया दिशोऽभिताम्रा
कुणपभुजां जगृहुः पिशाचडिम्भाः।
स्वमतिकृतं ..... हि सोदराणां
फलमनुभावयितं परं दशास्यम्।। ५२

अभजत मणितं च तत्प्रवृत्तिं
हहह वधूमुखतोऽन्तमेति वंशः।
रघुतिलकविरूपितामवस्थां
स्वसुरवलोक्य गिरः पुरो दशास्यः।। ५३

किमु परिगमितः किमात्तगन्धः
किमु मुषितः किमु मूर्च्छितो बभूव।
ननु हरिणहृदं न हन्ति रक्षो -
मृगपतिकेसरमुद्धृतं गजेन।। ५४

फणिमणिरविदुर्दुरापविद्धं
प्रसभमहेर्मनुजात् पराभवो नः ।
इति रथमधिरुह्य ताटकाया -
स्तनयमवाप्य दशाननः सहायम्।। ५५

रघुवरिवृढधाम राक्षसानां
पतिरगमत् पतिदेवतासनाथम्।
अथ नियतुपलिङ्गजातमग्रे
दशवदनस्तमजीगणन्न किञ्चित्।। ५६

यदि विधिविहितं न तद्विनेयं
परवनितागृहपातकं ललाटे।
अथ जनक भुवोऽधिवासमेत्य
द्रुमकुसुमापचयप्रचारवेलाम्।। ५७

कनकहरिणरूपमाललम्बे
कपटनिधिः किल तत्र ताटकेयः ।
रचितरजतबिन्दुनीलरत्न
श्रवणपुटाञ्चितपद्मरागशृङ्गम्।। ५८

खुरपुटितविदूरजन्ममुक्ता
फलजठरं वलयैरिवाप वालम्।
क्वचन नवतृणोपलप्रचारा -
न्मरतककाञ्चनयोगमादधानः ।। ५९

क्वचिदपि कुनदीतटीषु कुर्व-
स्तनितमकुर्वत सान्ध्यमेघरूढम्।
क्वचिदिव कदलीदलानि जिघ्रन्
क्वचिदधिवल्लरि कोमलान् प्रवालान्।। ६०

सचकित इव धावति स्म किञ्चित्
विवलितदृग् विनिवर्तते स्म भूयः।
व्यवलितपरिपुप्लुवेऽन्यदीषत्
समुदचलन्निरवर्तयच्च शङ्के।। ६१

समगतहरिणैरलीढगात्रं
कपटमृगो न जहार कस्य चेतः।
सकुतुकमलोक्य तज्जिघृक्षोः
हरिणदृशः प्रणयात् स तां निनाय।। ६२

अनुजनुषितमन्वहासमाया -
मृग इति हन्तुमधिज्यचापहस्ता।
तदुदयमिव चाम्बरे वनान्ते
प्रकटनिगूढतया प्रथावमानम्।। ६३

कथमपि शरलक्षयन् विदूरात्
कपटकुरङ्गकमपातयत् स धन्वी।
रघुपतिशरविद्धमर्मम सद्यः
पतदवनौ कुहनाप्रपञ्चमूलम्।। ६४

व्यलपदनुकृतस्वरक्रमं हा
जनकसुते! हह लक्ष्मणेति रक्षः।
व्यलपितमथ तादृशं निशम्य
व्यथितमनाः कुहनामृगप्रयुक्तम्।। ६५

सपदि निववृते स रामचन्द्र -
स्तदवरजं च जगाद तत्र सीता।
स्वरमतिकरुणं त्वयाद्य वाचः
कलयसि लक्ष्मण! कर्णयोरपूर्वम्।। ६६

विमृश सपदि किं विचिन्तया मे
विकृतिफलं मृगविस्मयाकुलायाः ।
इति गदितवतीं स तामवोच -
मनसि कृथा इह मा विषादमार्ये!।। ६७

परशरणकथा रहो रघूणां
यदि हरिणः परिरक्ष तातरक्षोः ।
इति सुलभरुषः स्ववाग्भिरस्याः
स वनमगाहत वागतिप्रसङ्गात्।। ६८

रजनिचरपतिश्च भिक्षुवेषः
स्वयमुटजमापदन्तरज्ञः।
हिमकररहितामिव त्रियामां
व्यवहितभानुमिवाब्जिनीं विषण्णम्।। ६९

तटितमिव निरम्बुदां तदानीं
        दशवदनः पतिदेवतां ददर्श।
परिहितपशुचर्मणा तरक्षु -
        न्यवसितमाचरतेव राक्षसेन।। ७०

अघमकरुणमन्धुनेव तृण्या
        पिहितमुखेन यदिच्छलात् प्रयुक्तम्।
प्रणयिनमनुचिन्त्य पद्मपाली
        परिगलदश्रुपरिप्लुतस्तनानाम्।। ७१

कुशलमनुपरोधमस्य सव्ये -
        तर नयनस्फुरणेन योजयन्तीम्।
श्रियमिव शिथिलीकृतारविन्दां
        निमिषवतीमिव निर्जरां पुरस्तात्।। ७२

परिवशमभिपश्यतोऽस्य जज्ञे
        मदनमयं किल रक्षसोऽपि रक्षः।
कुटिलमलकमक्षिणी विशाले
        भुजयुगलं ललितं घनस्तनौ ते।। ७३

जघनमपि परं किमब्जजन्मा
        सुमुखि परं मनसा स्वयं व्यधत्त।
क्व तव कुलमिहासि कस्य कन्या
        किमुचितमभ्यवपद्यसे कलत्रम्।। ७४

कथमिव तव कानने निवासः
        कथय कृशोदरि कामितं गरीयः।
इति कथितवती यथा नियुक्तं
        स्वयमपि चाभिमुखी तमन्वयुङ्क्त।। ७५

अगणितदुरितामुक्तदर्पा
        स च निजगाद गिरं निशाचरेन्द्रः ।
रजनिचरपतिः स रावणोऽहं
        निगलयिता हरिणाक्षि! निर्जराणाम्।। ७६

मम किल महिषी त्वमश्नुते वा
शिरसि पदं कुरु सिद्धसुन्दरीणाम्।
अथ विपिनमवेक्ष्य दुर्गुणत्वं
प्रियभरतेन विवासितस्य पित्रा।। ७७

जगति तव जटाधरस्य पत्युः
क इव गुणाः क्षणदाचराधिराजात्।
कति कति न मया हृदाः परेषां
कमलमुखि त्रिषु विष्टपेषु कान्ताः।। ७८

करणमपि भजन्ति रूपलक्ष्म्या
करणरुजस्तव रावणः प्रमाणम्।
व्यसनमिह वने मृणालमृद्व्या
नृपशुवशं गतया त्वयान्वभावि।। ७९

समनुभव मया सहाद्य भोगा-
सुखमसुखोपरि सुभ्रुवं घटेत।
इति विकृतमिमं तृणान्तरस्था -
जनकसुता रुदती जगाद कोपात्।। ८०

कपटविट! किं जिघृक्षसे मां
निजजननी भगिनीजनेन किं ते।
अपि हरसि कदापि सिंहदंष्ट्रां
मणिमपि मोचयते महोरगस्य।। ८१

नखमपि हरते जनस्तरक्षो
र्नतभवने रघुनाथ धर्मपत्नीम्।
विषमपि पिब जिह्वया क्षुराग्रं
विलहसमुत्करि केशमुल्मुकेन।। ८२

अपि जलधिपतेरथापि जीवेः
परिहर रामपरिग्रहाभिमर्शम्।
अणुषु गणनमस्ति चेत् सुमेरोः
मम शक्रतुला यदि वा मतङ्गजस्य।। ८३

यदि तु मृगपतेः सृगालकक्ष्या
रघुतिलकस्य ततस्तवोपमा स्यात्।
इति जनकभुवो विलोमवाचे
वरतनु! मे पश्य ममेति रूपलक्ष्मीम्।। ८४

मलिनमरुणमुग्र दंष्ट्रं
व्यवृणुत वर्ष्म निरस्तभिक्षुवेषः ।
द्रुतमिति वनदेवताभि.. णैः
सह विहगैरपि तन्न विस्मयाय।। ८५

न चलनमधुरोर्मयो नदीनां
न च तरवोऽपि भिया तदीक्षणेन।
परवशमपकृष्य पांसुलस्तां
रथमधिरोप्य स जानकीं रटन्तीम्। ८६

उपपदमिव वर्त्म पद्मरागं
स्रजमिव मांसजिघृक्षया गरुद्मान्।
विपदमिह न वेत्सि मे सुमित्रा -
सुतमहिते नमते स्थितास्मि।। ८७

सरभसमुपसृत्य दुर्विनीतं
शमय रघूद्वह साम्प्रतं शरेण।
दशमुख कठिनो हतश्च दीनां
कथयत मां हरतीति राघवाय।। ८८

अवगतमृगणा इहापगा मा -
मपि कृपणामिति वाचमीरयन्तीम्।
वटतरुशजटायुषं निशम्य
श्वशुरसखः सुतरामिव व्यलापीत्।। ८९

दवदहन इवारुधद् दशास्यं
स च हृदि गाढनिखातशोकशङ्कुः।
जहिहि जहाहि जानकीं दुरात्मन् !
रजनिचराधम राघवस्य भार्याम्।। ९०

त्वमनिमिष इवामिषाभिलाषाद्
बलिशमुखे पतितः कुतो व्यपैषि।
परिमृशति भुजस्मयस्तवैनां
फणिपरुषः पतिदेवतां दशास्य।। ९१

मम सममितरैरमुष्य कण्डू -
भरभरितः परिखण्डनाय तुण्डम्।
न भवसि रघुनन्दनस्य लक्ष्यं
न कवचमाहरते तृणाय वह्नि : ।। ९२

कपटमिति कथावशेषये त्वां
न पुनरहं प्रतिमोचनाय वाली।
इति परुषं हि स ताटयन् जटायुः
खलखलितध्वनिभिर्नखैरुदग्रैः।। ९३

व्रणिततनुमिमं विकीर्णकेशं
रणरतिकेलिषु भीरुतां निनाय।
कुलिशनिशितयाऽस्य चञ्चुकोट्या
दशवदनो दलितौकचापयष्टिः।। ९४

धनुरपरमुदस्य धीरनादं
पतगगतिं शरपञ्जरे बबन्ध।
शरभरमभिनद् बभञ्ज धन्व -
ध्वजमरुजं निजघान तोरणानि।। ९५

मरुदिव विकृतो ममर्द सूतं
व्यघटयदस्य रथं च गृध्रवद्धः।
मकुटतटमपाटयत् सृपाट्या
झटिति कपालमपाटयद् गरुद्भ्याम्।। ९६

मदकरिण इवाधिरुह्य मर्मा-
ण्यलिखदमुष्य नखाङ्कुशैः खराग्रैः।
अरददतु ददाययावपायाद -
रुघदधावदतर्जयन् जगर्ज।। ९७

न्यपतदुतपतन् न्यपातयत् तं
　　शिरसि च सिद्धगणोऽस्य पुष्पवर्षम्।
अपि निशिचरराजराजदोष्णां
　　गृहवनितागृहपातकोद्धुराणाम्।। ९८

विघटनमकरोद् विहंगराजः
　　पतिजघटे स फणीन्द्रभीषणैस्तत्।
अधिकठिनपदावघट्टनाभि
　　र्मुहुरभि ..... मुष्टिभिः कठोरैः।। ९९

परिणतवयसः सपक्षयुग्मं
　　पतगपतेरसिना बलादवी...त्।
विलपितमुखरां विकृष्य सीतां
　　गलगतजीवितसीम्नि गृध्रराजे।। १००

अगमदधिगमय्य सन्निकर्षं
　　तम इव दीपशिखां स्वनाशहेतोः।
अभजत धरणीमरालकेश्याः
　　सपदि पदां मणिनूपुरं सशब्दम्।। १०१

रविरिव तमुदन्तमन्तरिक्षाद्
　　रघुतिलकाय कुलेश्वरोऽभिधातुम्।
गगनपथगता जगालमुक्ता -
　　मणिलतिका कुचमण्डलादमुष्याः।। १०२

दुहितृहरणदुःखितां धरित्री
　　मनुपरिदेवितुमौडपीव पङ्क्तिः।
तरुशिरसि दिवस्तनोत्तरीयं
　　कनकमयं निपपात कातराक्ष्याः।। १०३

तटिदनुकरणं तदङ्गभासां
　　पटलमिवक्षुभितः पराभिमर्शात्।
कनकसमरुचा नरेन्द्रपुत्र्या
　　शिथिलशिरोरुहया तया व्यभावि।। १०४

दधदिव दिवि धूममुद्वमन्तीं
दशवदनः स्वकुलं तु दग्धुमुल्काम्।
सह निभृततरापगं मृगीभिः
सह रुदितद्रुतवल्लिदेवताभिः।। १०५

सह दलदुपलं सतां मनोभिः
वनमपि शोकमयं तदा तदासीत्।
विघटिविपुलाभ्रगर्भविद्यु-
द्विलसितराजसुतावपुः प्रकाशः।। १०६

शर इव धनुषश्च्युतः प्रपेदे
पुरमथ पुष्पकरं हसास लङ्काम्।। १०७

प्रविश्य पुरमात्मनो भवनसीम्नि लक्ष्मीं परां
प्रकाश्य पिशितान्धसां दशरथस्नुषायै प्रभुः।
प्रतजनकरीमिमानान्तरे...................
विमोहजसचेतनां व्यसनकारके चारके।। १०८

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयनिधेः क्ष्माकण्ठकोत्खण्डिनः।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसैतौ कृतौ
श्रीरामाभ्युदये जगाम नवमः सर्गः समग्रो रसैः।। १०९

दशमः सर्गः

विभ्रच्छ्रियं हतमृगो विनिवर्त्य राम -
स्तत्क्रन्दितेन वनसीमनि तादृशेन।
आशंसितं कुशलमन्यथयन् प्रियायाः
सौमित्रिमेकमवलोक्य तमाह दूरात्।। १

वत्सागतोऽसि किमनादृतमन्नियोगो
देव्या विना न किमुदीरितमन्वमंस्थाः।
रन्ध्रानुमार्गणकृतां रजनीचराणां
वेलेयमेव विधिरत्र परं बलीयान्।। २

यः शातकुम्भमृगया वनरोचनाय
तस्याः पलायत न राम विवेकनिध्नः।
तस्यानुजोऽसि यदपास्य वने किलैकां
सीतां बिभर्षि सिकतामयसेतुकक्ष्याम्।। ३

पश्येयमाश्रमगतामपि राम! भूयः
प्रस्पन्दते कथमदक्षिणमीक्षणं मे।
पश्चात्तपन्निति ससाद स पर्णशालां
शून्यां नरेन्द्रतनय त्वरमाणचेताः।। ४

उत्खातकल्पलतिकामुदधेरिवोर्मिंद्य
विद्युल्लताविरहितामिव मेघमालाम्।
त्यक्तामिवाग्निशिखया यजमानशाला
माक्षिप्तनायकशिलामिव हारवल्लीम्।। ५

दृष्ट्वा न तत्र दयितां बहिरन्वगन्तु-
रग्रेऽथ ऊर्ध्वमभितः पदमप्यमुष्याः।
अन्यस्य चानुजमपृच्छदगाधधैर्यः
सीमां कदाचिदतियाति हि सिन्दुराजः।। ६

हा हन्त लक्ष्मण! वदात्र कथं न सीता
मिथ्या किमाश्रमपदं न किमस्मदीयम्।
स्वप्नः किमेष सुचिरं परिहासगूढा
क्वापि स्थितेयमथवा क्व गता प्रिया मे।। ७

वल्लीषु किं किमु वटेषु वनेचराणां
पल्लीषु किं परिसरेषु किमापगाना।
शैलेषु किं कथय मे धरणीरुहाणां
मूलेषु किं मुनिपदेषु किमायताक्षी।। ८

किं नु स्थले सिकतिले किमु शाड्वले किं
किं पङ्किले किमिह शार्करिले कृशाङ्गी।
वेतस्विनी स्विदयमद्य कुमुद्वती स्वित्
स्रोतः स्विदथवा लभा मम ... स्यात्...।। ९

रात्रिञ्चरैः प्रियनृमांसरसैः किमत्र
कान्ता हृता खरवधप्रतिकारकामैः।
मायामृगध्वनिरुपितमद्वयपाया
किं वा स्वयं वनकृशानुमनुप्रविष्टा।। १०

उल्लङ्घिता किमियमुत्तरलैरपाङ्गै
राशङ्कितेन हरिणीति मृगादनेन।
कूलङ्कषस्तनकदर्थितकुम्भलक्ष्मीः
कोपादसौ प्रशमिता किमु कुञ्जरेण।। ११

कर्णावतंसकलिकामपचेतुकामा -
	कङ्केलिकाननमितः किमियं प्रविष्टा।
आहोस्विदम्बुरुहदोहलिनी जगाहे
	गोदावरीं गुरुपयोधरखिन्नगात्री।। १२

आलापयन्त्यधिगमाय वनान्तरेऽस्मिन्
	नारंस्यते किमियमन्यभृताङ्गनाभिः।
क्रीडागतान्युपदिशत्यथवा किमेषा
	कल्लोलिनी तटजुषां कलहंसिकानाम्।। १३

पुंस्कोकिलस्य विजिताः पुरुयेव वाचा
	हंसा विलासगमनेन दृशा हरिण्यः।
केशश्रिया फणिभुजोऽपि किमप्यनार्यं
	किं वा प्रयुज्य सदृशः कृतिनो भवन्ति।। १४

लग्ना यदि द्रुमलतावलये सुसेके-
	श्याकीर्णा रुणद्धि न पदं कबरी किमस्याः।
पङ्कोत्तरे पथि गता यदि सा नितम्ब-
	वक्षोजयोरवसरः खलु वञ्चनाय।। १५

तन्वी लतासु यदि सा न विभावनीया
	रम्भाटवीष्वसुगता यदि संहतोरुः।
मीनेक्षणा यदि नदीष्वविचारणीया
	तुङ्गस्तनी गिरिषु चेत् सुतरामलक्ष्म्या।। १६

उत्सृज्य दर्भकबलं मुखमुत्क्षिपन्ती
	चक्षुः स बाष्पसलिलं मयि पातयन्ती।
व्यावृण्वते किमपि धीविषयं प्रियायाद्य
	वार्तामशक्य वचसो नियतं हरिण्यः।। १७

प्राणेश्वरी यदि ममापगता प्रकामं
प्राणाः स्फुरन्ति किममी कथय प्रमेयम्।
पृच्छामि काननगतानथवा प्रवृत्तिं
शंसेयुरुत्पलदृशस्त इमे कथाचित्।। १८

एणाः सहध्वमिह मे मृगयापराध -
न्यक्कारमीक्षणकृतं च निरस्य तस्याः।
प्राख्यातसत्वमुदन्तमनन्तरं वः
पाणौ शिरस्यपि भवेत् कथमिन्दुमौलेः।। १९

अन्तःप्रविष्टमवरस्य पदं न किञ्चि-
दालक्ष्यते न बहिरप्यबला कुतः स्यात्।
प्रत्यर्पयस्व दयितां मम पर्णशाले!
न्यस्तार्थनिह्नवमनौपयिकं वदन्तु।। २०

वाचः कियद् किमसि वञ्चुल चञ्चलाक्ष्या
मत्कर्णपूरयकथां मयि कर्णपूर! ।
पादाहतानि यदि मर्षय सौमनस्यं
प्रत्येहि तत्र सुजनो गुणगृह्य एव।। २१

धाराकदम्बधरणीरुह धारयैतान्
प्राणान् मम प्रणयिनीगतिशंसनेन।
मित्रेण ते किमपि मेघकुलेन वैरं
तत्कुन्तलस्य यदि तं न विचारणीयम्।। २२

कुन्द! प्रशंस तव कुड्मललोभनीयं
मन्दस्मितं ननु यदि क्वनु मैथिली स्यात्।
तत्कुन्तलेषु कुटिलेषु तवार्पयेय -
पुष्पाणि गन्धपुनरुक्तिधुरन्धराणि।। २३

समागता तव किमीक्षणगोचरं मे
धारालबाष्पनयनाद्य धराधिराज।
शैलोत्तरं श्रुतमहं चरितार्थ एव
र्लीहन्त प्रतिश्रुदियमन्यथयामि सार्थम्।। २४

हंस! प्रशंस मम वा ललितैर्वचोभि -
र्लीलालसत्स्वमिव याति पयोधरार्ता।
यद्यम्बुजेन सरसीषु रमेति साक्षा -
दारोपितेयमधिकोशसुवर्णपीठम्।। २५

एतैः किमु...शस्त हमे कटाक्षाः
पश्यन्ति हन्त परितः परितो हरिण्यः।
धम्मिल्ल एष धरणीदुहितुः पुरस्ता -
न्मन्ये मतिं मम रुणद्धि मयूरपक्षः।। २६

हेमाङ्गदा भुजलता हि पुरो रमण्या
नैवं सुवर्णलतिका नवमञ्जरीयम्।
वक्षोरुहद्वयमिदं किल कोमलाङ्ग्या
नागस्य कुम्भयुगलं न विचार्यमेतत्।। २७

शोणाधरादरुणिमा सुलभोऽयमेव
कङ्केलिपल्लवमिदं न कथं भ्रमाय।
ऊरुद्वयं तदिदमुत्पललोचनाया
रम्भा कथं भवति राघवमोहनाय।। २८

चन्द्रानने तरुणि चम्पकदामगौरि -
मित्येवलग्नलतिके मृगशावनेत्रे।
मन्दस्मिते मधुरभाषिणि मानिनि त्वां
हित्वा कथं भवति राघवजीवितार्था।। २९

दीर्घाक्षि कण्ठकिनि दण्डककाननेऽस्मिन्
पादः कथं भवति पल्लवकोमलस्ते।
चेतः कथं शिखरिणामपि गह्वरेषु
लीनं शिखाभिरपि देवि तव व्यपाये।। ३०

द्वेधापि ते भवति दुःखसमं मनो मे
स्तेयमित्येव तरवोऽपि भजन्ति शोकात्।
अद्यापि च स्फुरति जीवितमस्मदीय -
मद्य प्रभृत्यहह कालहलाहलानि।। ३१

कोलाहलातिशय कोरकितान्तराणि
कान्ते कथं नु कमलासनकल्पकोटि।
दीर्घाणि रात्रिदिवसान्यदिवाहयिष्ये
सत्यं त्वया विरहितस्तरुणोत्पलाक्षि।। ३२

सोऽहं मुहूर्तमपि निश्वसितं प्रगल्भे
राज्यं विशङ्कमुपभुङ्क्ष्व किलेति गत्वा।
सौमित्रिरादिशतु तं भरतं ममाज्ञाम्
राज्योपभोगविरत भरतो यदासीत्।। ३३

तातस्य तादृगपि मामनुशोचतो यत्
यन्मे वनभ्रमणमित्यखिलं स्मरामि।
सीते! तवाद्य विपदिश्लथधैर्यबन्धः
किं ते पदं किसलयाग्ररुचं रुजन्ति।। ३४

....

वैदेहि! कण्ठक....... खरवनान्तवृक्षाः ।
छायाममी किमथवा तनया धरण्याः
सौभात्रमेव परिपाल्य तवार्पयन्ति।। ३५

एवं यथाभिमतया रघुवंशकेतु -
राशामगस्त्यतिलकामवगाहमानः।
वामभ्रुवः स्वरुचितानि वसुन्धराया -
मालोकते स्म कुसुमान्यलकच्युतानि।। ३६

अग्रे जटायुषमसृग्वमता मुखेन
निष्यन्दि धातुगिरिशृङ्गनिभं स पश्यन्।
रक्षो भ्रमादपि च तं निहतं जिघांसु
रभद्रवत् तदनु तातसखं विवेद।। ३७

प्राणान्तसख्यकृतिनं कथितप्रवृत्तिं
संस्कृत्य तं हुतवहे विधिवत् स रामः।
तातस्य वीतमुखदर्शनजीवितान्त -
सन्तापमाशयगतं शमयाञ्चकार।। ३८

उद्दामशब्दमथ योजनदीर्घबाहु -
कल्लोलमात्तमृगपक्षिगणं मुखेन।
देवः कबन्धमवगत्य भुजाबलेन
पश्चात् प्रियाधिगमवागमृतं स लेभे।। ३९

सुग्रीवसौहृदगतं सुचिरादरण्ये
काचिच्छ्रमण्यममुमवाप्य गुरूपदेशात्।
तस्मै प्रदर्शित तदीयगिरिप्रदेशा
मुक्तिं जगाम शरभङ्गमुनिः क्रमेण।। ४०

सङ्केतमौक्तिकसरः सकलार्णवानां
वैडूर्यरत्नमुकुरं वनदेवतानाम्।
पाशायुधस्फटिकसौधगृहं प्रपेदे
पम्पासरस्तदनु पङ्क्तिरथात्मजन्मा।। ४१

आलोक्यमानमिव तीरवनावलीभि
राविश्यमानमिव बिम्बजुषाम्बरेण।
संवीज्यमानमिव हंसपरम्पराभिः
संवर्ध्यमानमिव पद्ममधुप्रवाहैः।। ४२

आपाण्डुरद्विजवराभरणं कराग्र -
वेल्लन्मृगं विदलितोत्पलपुण्डरीकम्।
दीपाहिरत्नवलयद्युतिदर्शनीयं
व्यावृण्वदाप इति विग्रहमष्टमूर्तेः।। ४३

सत्वोत्तरं सकमलं सरसं प्रसन्नं
निष्पङ्कमुल्लसितहंसनिनादमुच्चैः।
अन्तः परिस्फुरदशेषजगत्प्रचार -
मारण्यकाशयमिवाक्षिपथावतीर्णम्।। ४४

प्रारब्ध नृत्तलयमूर्मिपरम्पराभिः
प्रकान्तगीतिपटलेन मधुव्रतानाम्।
आनद्धशालिविहितद्विपकर्णताले -
राराधनोन्मुखमिवाम्बुजमण्डलेषु।। ४५

चाम्पेयकोरकतरङ्गितवञ्जुलानां
मध्ये गतं गगनवारिदमण्डलानाम्।
वन्याद्विपेन्द्रगदचन्द्रकितं समन्ता
देकोदकं द्रुतमिवेन्द्रधनुः सहस्रम्।। ४६

कल्हारतामरसकाननगन्धहारी
कर्णामृतानिकलहंसरुतानि कर्षन्।
कल्लोलिनीकरकिरः ककुदं रघूणां
पम्पानिलः प्रणततापहरं सिषेवे।। ४७

कर्पूरपूरशिशिराम्बुकणाभिवर्षी
        कल्लोलसौधविहरत्कलहंसयूथम्।
पम्पासरस्तदुपकण्ठभुवं च पश्यन्
        उत्कण्ठिनीं गिरमुदीरयति स्म रामः।। ४८

एतानि हन्त रमणीविरहार्तकण्ठ -
        नानाजघोषनवकोकिलकाहलानि।
वेलातिलङ्घिविषमायुधदण्डयात्रा
        कोलाहलानि कुसुमद्रुमकाननानि।। ४९

अङ्गारयन्नलिकदम्बकम्बुजाना -
        माकीर्य केसरपरागकणस्फुलिङ्गान्।
उद्दीपयन्नधिकमूर्मिकणप्रयोगात्
        पम्पामरुत् प्रणयिनी विरहानलं मे।। ५०

चञ्चूपूटार्पितमृणालरसानुसार -
        सञ्चार्यमाणहृदयानि परस्परेण।
क्रीडन्ति रक्तकमलेष्विव चक्रनाम्नां
        द्वन्द्वानि मद्व्यसनदुर्ललितान्यमूनि।। ५१

सीमन्तचूर्णसरणी वनदेवतानां
        श्रृङ्गारमण्डनमनङ्गमतङ्गजस्य।
पुंसां मनोहरिणवञ्चनवागुरायां
        पुष्पातितत्त्वमिह पुष्पलतापरागः।। ५२

पाटीरशैलफणिभिः परिपीतशेषाः
        प्रारूढतद्विषकणाः भ्रमरच्छलेन।
मूर्च्छां दिशन्ति यदि मुग्धदृशा विना मे
        चित्रं किमत्र शिशिरात्ययगन्धवाहाः।। ५३

आपादयन्त्यभिमतस्खलितेष्वनङ्ग
कोपानलं कुरवकद्रुमकोरकाणि।
धूमावलीमुपनयन्ति वनान्तलक्ष्मी -
रोमावलीरुचिरपक्ष्मजुषो द्विरेफाः।। ५४

सीतां विनापि ननु जीवसि सम्प्रतीति
मामेव वीक्ष्य हसितं नवमालिकाभिः।
व्यावृण्वते विटपिनोऽपि मयि प्रकोपाद्
वातोल्ललत्किसलयाङ्गुलितर्जनानि।। ५५

मन्दोदयेन मरुता नवमण्डलेऽस्मिन्
आन्दोलितं रुधिरदिग्धमिवारुणिम्ना।
कङ्केलिपल्लवमिदं करवाललक्ष्मी -
सङ्केतमावहति शम्बरशासनस्य।। ५६

हंसो रिरंसुरयमास्वदते रसस्या
पद्मासवं सहचरीपरिपीतशोषम्।
मञ्जुक्वणन्मधुकरोऽयमपि प्रियायाः
पक्षं परागकुलधूसरितं प्रमार्ष्टि।। ५७

दत्ते वनप्रिययुवा दयितामुखाग्रे
रागान्ध एष सहकारलता.....हम्।
रागः स एष नवसल्लकिभङ्गदाना
दावर्जयत्यपिमृशन् करिणीं करेण।। ५८

मह्यं मयूरमुखचुम्बितबर्हिणीकं
रागान्धकृष्णमृगरुद्धमृगीकदम्बम्।
आश्लिष्टवृक्षमधिकोत्कलिकं लताभि -
रेकोदकस्मररसं वनमेतदास्ते।। ५९

अस्माद् वनादचिररोचिरिवाभ्रवृन्दात्
कल्लोलिनीसहचरात् कमलालयेव।
आविर्भवेत् किमबलास्तनपर्वताभ्या -
मावर्जिता किमपि हाटकपाटलाङ्गि।। ६०

वामालके वसुमतीतनये वराङ्गि !
वैदेहि! वारणगते स्मर वैजयन्ति ! ।
ताम्राधरे तरुणि तामरसायताक्षि
सीते! तिरोभवसि सीदति केन रामः।। ६१

इत्थं प्रसाद्य विलपन्तममुं वनान्ते
सौमित्रिरग्रजमनेन सह न्यवात्सीत्।
तस्याः प्रतीचि किल रोधसि शम्बरारि
सामन्तसञ्चरितचूतवने सरस्याः।। ६२

तौ वीक्ष्य वालिसुभटाविति शैलकूटे
सुग्रीवमुक्तिचतुरश्चकितं हनूमान्।
आश्वास्य भिक्षुवपुरेत्य विवेद सर्वं
वृत्तं तयोः स्वमपि वेदयति स्म ताभ्याम्।। ६३

रूढं कबन्धवचसा शबरीनिदेशा -
दुत्पल्लवं हनुमदुक्तिभिरुत्प्रसूनम्।
सख्यं प्रबन्धपतिना सदृशार्थबन्धं
तस्याग्निसाक्षिकमभूत् सकलव्यपेक्षम्।। ६४

ज्येष्ठे निहन्तुमगरन्ध्रगते द्विषस्त -
द्वारिस्थितं किमपि वत्सरमात्मनोऽपि।
तत्पापशङ्किसचिवास्पदराज्यतुल्यं
तेन प्रियागृहमपि व्यववृणोत् स तस्मै।। ६५

राम श्रुतात्मविपदा प्लवगेश्वरेण
सन्दर्शितानि समवेक्ष्य विभूषणानि।
उत्सृज्य धैर्यमुपलीन इवाश्रुणोऽभूत्
सीता पथि द्रुमशिखा सुमुमोच यानि।। ६६

व्यातेनतुः स्वविदुद्धरणप्रतिज्ञा-
ममित्रगोत्रभवगात्रभवौ मिथस्तौ।
च...ल वालिहृदयं तटिताप्यताप्य
चुक्षोभ राक्षसपुरीं जलाग्निनेव।। ६७

उन्मध्यदुन्दुभिरिति प्रथितं लुलाय-
दैत्यं मुरस्मरहरद्रुहिणा प्रधृष्यम्।
भूयश्चकार भुवनत्रयवीर एष
भूभृद्गुहाविजयदुन्दुभिघोषगर्भाः।। ६८

तस्यासृजा सपदि योजनमीरितस्य
तस्मात् प्रदूषितपथात् स ययौ मदङ्गात्।
तेन प्रवेष्टुमगमक्षममृश्यमूकं
तेन भ्रमन् हि चिरान्न लेभे निधिं गाम्।। ६९

आनीय यानत इवाचिररोचिरर्चि -
र्दत्तं दधत् कनकदामपुरन्दरेण।
सान्ध्यं विधिं किल समापये सलील -
मुल्लङ्घ्य सोऽयमुदधिं चतुरो मुहूर्तात्।। ७०

त्वद्विक्रमं मम मनस्त्वरते विवेक्तुं
दुःशङ्कया द्विषति राघव दुर्निवारे।
नापूर्व कौतुकतया न कपित्वगर्वा-
न्न त्रासितान्न च रिपोरपदानशौण्डात्।। ७१

एवं स वालिकृतपूर्वलुलायकाय -
　　विक्षेपमुक्तमधुना विदधे पदाग्रात्।
रामः सपत्नरहितेन च सप्तसाल-
　　वेधं विधिर्नियमसमं विशिखेन सख्युः।। ७२

रामे निवर्तिनि रणे न तयोर्विशेषं
　　दृष्ट्वाग्रजन्मदृढमुष्टिहतः सधावन्।
शैलं समेत्य समेशत सुहृत्प्रतिज्ञा -
　　मत्याहितं स विदधात्यपदेऽपि शङ्काम्।। ७३

तेन प्रबोधितमतिर्हरिदश्वसूनु -
　　ग्रीवापिनद्धगजपुष्पलतापताकः ।
ज्यायान् समाह्वयत दोः समरं तदाभूत्
　　भेदस्तयोरिव यथा विजयस्य न स्यात्।। ७४

शाखाकलापगहनागमगुप्तमूर्ति -
　　र्गोप्ता गुणप्रणयिनां द्विषतां विनेता।
आकृष्य धन्व विभुरर्पयति स्म मौर्व्यां
　　प्राणप्रमापणमिषुं परदारहर्तुः।। ७५

भ्रष्टः पिपासुरसुहृद् .... सृष्टः
　　सृष्टः स तेन धनुषः श्लथमुष्टिबन्धम्।
सद्यः पपात हृदये शतमन्युसूनोः
　　प्रायोपविष्ट इव शोणितपारणायै।। ७६

विद्धः शरेण विषमोत्प्लवना निपत्य
　　वालीविलोक्य तमिमं वलये तरुणाम्।
आचष्ट मौलिमब (व?) धूय विहस्य किञ्चि -
　　दालम्बितासुरमरेन्द्रगुणप्रभावात्।। ७७

वीर! त्वया किमिदमाचरितं विरुद्धं
गूढं निषद्य रघुगोत्रधुरन्धरेण।
मन्युं कुतो मयि निरागसि वन्यवृत्तौ
शाखामृगे सह विवादिनि सोदरेण।। ७८

क्व श्रेयसे कपिवधः क्व वने धनेच्छा
कामो न पङ्क्तिमुखबद्धरि दर्यतीते।
जन्मान्तरे च दृढबन्धनमीदृशं स्याद्
वर्गस्त्वयाऽत्र मतिमान् कतमो गृहीतः।। ७९

मित्रा मम श्रुतबला....................
कृत्वा वलीमुखवधं कृतिनां सभायाम् ।
किं वक्ष्यसे त्वमपनेष्यति केन लज्जां
कं द्रक्ष्यसीति यदिषोरपि मद्व्यथायै।। ८०

तातोऽपि ते तनयमण्डमुनेरकामा -
च्छब्दान्तर भ्रमत एव पुरो जघान।
तातादपि त्वमधिकोऽसि सकाम एव
व्यञ्जन् मनागधिवनौकसि वीर! वार्ताम्।। ८१

इत्यूचिवान् निजगते स रघूद्वहेन
शाखामृगेन्द्र! तव दुश्चरितं न वेत्सि।
भ्रातुः परिगृहभृतं भरतो न हन्या -
दस्याः पतिर्यदि भुवः पदमंहसः स्यात्।। ८२

यद्यौरसीव भगिनी जननीव भार्या
भ्रातुः स्मृताद्य भरतस्य भवानदण्ड्यः।
मित्राय नात्र तु विमलीकृशत्वं
नीतः सुरेन्द्रपदवीमिति निश्चयो असौ।। ८३

दारग्रहेण किल दीर्धतपादयालु -
स्तातस्य ते ननु विकारफलं तदानीम्।
शापं न यद्यूपनयेत ततस्तव स्याद्
वार्तापि नात्र वलयाभरणं न शच्याः।। ८४

हित्वा प्रियामपि भिनत्स्यबलं किलैनं
मोक्ता न किं त्वदिह मूर्ख! ततो हतोऽसि।
वध्यो निगृह्य मलिनो विदितं यदिष्वा -
वेधाहरेण विदितो दुहितर्यवेधि।। ८५

प्रत्याह बोधित इति प्रभुणा कपीन्द्रो
नाथ! प्रसीद चपला नहि तं वदन्ति।
नालीक्षलक्ष्म तव नामपदं शिलायां
न्यस्तं पुरोऽद्य हृदये मृदुतां हि नेतुम्।। ८६

चेतस्तथापि मम दीर्यति गर्भरूपं
दृष्ट्वाऽङ्गदं कुरु दयामिह दीनबन्धो!।
सोढागसां सुमुख लक्ष्मण! निर्विशेषं
सुग्रीव एष भवता परिपालनीयः।। ८७

विज्ञापना न पदमित्यवतीर्णमूर्च्छा -
व्याघूर्णमाननवनान्तविकीर्णबाष्पम्।
उत्खातरामशरशल्यमुदीर्णजृम्भा -
व्यादीयमानमुखविस्फुरदन्तचक्रम्।। ८८

औत्पादिकं दिव इवापतितं विमान-
मुग्रानलास्तमिव वल्गु मुदं त्वदन्ते।
सिंहेन भग्नमिव सिन्धुरयूथनाथं
वर्जेणैरुगणमिव वासगिरिं सुराणाम्।। ८९

तारा निरीक्ष्य रमणं पतितं धरायां
मूर्च्छत्यथोच्छ्वसितमेत्य तथा व्यलापित् ।
रामो यथानुचितचिन्तनया व्यथेत
... थस्तथा परिणमेत तथा शिलापि।। ९०

सङ्कार्य सङ्क्रन्दनसूनुमग्ना वाश्वास्य तारां सममङ्गदेन ।
मित्रानुतापव्यसनं जहार नाथो जगन्नन्दयिता रघूणाम्।। ९१

प्रपन्नेऽस्तं तारा प्रणयिनि हरिप्रेरणगुणै-
रथासक्ते ताराभुवि विलसति सुव्यक्तमरुणे।
प्रकाशे प्रारुढे पुनरुदयलक्ष्मीं तपनजे
विवव्रे तत् सर्व वनजकुसुमामोदलहरीम्।। ९२

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयनिधेक्ष्माकण्ठकोत्खण्डिनः।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके पङ्क्त्याख्य सर्गोऽगमत्।। ९३

इति रामाभ्युदये डिण्डिमसार्वभौमकृतौ दशमः सर्गः।

एकादशः सर्गः

प्रापिते हरिपतौ श्रियमैन्द्रीं
ज्यायसीव स कनीयसि भूमौ ।
वस्तुमस्तमयमेयुषि घर्मे
माल्यवन्तमजिहीत महीध्रम् ।। १

तद्गुहागृहगते रघुनाथे
मैथिलीमृगणवारणमन्त्रः ।
प्रादुरास निगलः पथिकानां
घर्मदारुकलभो घनकालः ।। २

ग्रीष्मवासरविरामतमिश्रीं
वज्रहव्यवहधूमवितानम् ।
मारदन्तिमदपङ्कमशङ्कि
व्योमसिन्धुगरलं घनबृन्दम् ।। ३

दिग्वधूवरणचम्पकमाला-
दीपिका गगनगारुडधाम्नः ।
कालमेघकरिकाञ्चनकक्ष्या
कालभैरवजटा तटिदासीत् ।। ४

सापमब्धिलगितं सुरचाप-
प्रापणेन नवरत्नकलापम् ।
उद्वमन्निव घनोऽजनि विद्यि-
द्व्याजतो वियति विद्रुमवल्लीम् ।। ५

केकिनां नटनताल निनादै
केतकी प्रसवमङ्गलपाठैः ।
हंसमण्डलविवासनमन्त्रै-
रम्बुवाहरसितैरुदलासि ।। ६

विप्रयुक्तविषमुद्भिजमात्र-
स्तन्यमम्बुभृदनेकपदानाम् ।
केकिनां मदमधूक्षिति ......
स्फोटतैलमपतन्नववर्षम् ।। ७

उन्मुखैर्वियति चातकचक्रैः
प्रार्थितान्युदपृषन्ति कियन्ति ।
वारिदेन ववृषे कियदम्बः
सागरस्य महिमा स गरीयान् ।। ८

प्रायशो जलमुचां परिणेमे
विग्रहेण विपिनानलधूमः ।
पाटलानि नवन्दलमूर्त्या
मल्लिकाश्च वपुषा कुटजानाम् ।। ९

वर्धितं गगनवर्त्मनि गङ्गा
स्रोतसा स तपनोष्मणि सिद्धैः ।
वञ्चुलीभिरिव मञ्जुलसण्डं
चञ्चलाभिररुजद् घनचक्रम् ।। १०

वज्रभिन्नघनमण्डलगर्भ-
भ्रंशितेषु सलिलप्रसवेषु ।
क्लेदपाद इति केवलमेषां
नीपकोरकरजो निरणायी ।। ११

धन्विमेघपटलं पटुधारा
फल्लवर्षिभिरुदध्वनिभीमम् ।
रावणेन रघुवीरनिरोधे
प्रेषितं बलमिव प्रचकाशे ।। १२

राघवं सुतवधाद् यदि योद्धुं
प्राहिणोद् घनबलं पुरुहूतः ।
विस्मृतो विबुध कार्यमसौ तन्न-
स्मृतं तदपि यन्महतां स्यात् ।। १३

कामभूमिपतिशासनपत्रैः
कालयौधकनकक्षुरिकाभिः ।
कामिनीकररुह स्पृहणीयैः
केतकोदरदलैरुदलासि ।। १४

कालमेघकलशैरभिषिक्तः
केतकीकुसुमहेमकिरीटः ।
कन्दलीमुकुलरत्नकलापः
कान्तिमानजनि कालनृपालः १५

नीलनीरदनिकायनिलीनं
पाकशासनधनुः परिभूय ।
सानुमत्सुतरुणोपलशौभौ
श्यामलेषु शिखिपङ्क्तिरनृत्यत् ।। १६

हंससंसदमपास्य सरस्या-
मम्बुदो बककुलानि पुपोष ।
वृद्धिमेत्य मलिनोजलयोगा-
न्नान्तरं सदसदां ननु वेत्ति ।। १७

आस्थिता नवतटिद्गुणचक्रं
　　शक्रचापमणिदण्डपिनद्धम् ।
प्रावृड्डुद्भट पयोधरभारा-
　　नर्तकीव रसहारि ननर्त ।। १८

पत्रिणां व्यवसिते प्रतिपन्ने
　　कार्मुकस्य च कदम्बभरेण।
व्योम्नि खण्डिततडिद्गुणबन्धो-
　　रैक्षवं धनुरिवायतमैन्द्रम् ।। १९

वालिनि स्वतनयेन वनान्ते
　　वञ्चिते सुलभवासवशङ्कः ।
न द्रुतः किमरुणोऽस्य हि वाह -
　　स्तं रुरोध समयस्य न वाच्यम् ।। २०

केकिनामनुवनस्थलि केका -
　　रावकन्दलकलेषु कुलेषु ।
भाङ्कृतं किमिति भेकवराके -
　　स्तत्फलं सपदि जीवितलोपः ।। २१

धन्विनेन्द्रधनुषा घनपुष्पैः
　　बाणिना गुणवता क्षणभासा ।
वारिदैर्बलवता वसुधायां
　　वञ्चिता विरहिणो मदनेन ।। २२

द्यां पयोधरतरङ्गितविद्यु -
　　त्काञ्चनस्रजमुदीक्ष्य किमुर्वी ।
ईर्ष्यया प्रतिवनालकमूहे
　　मालतीकुसुममौक्तिकमालाम् ।। २३

कृष्टविद्युदसि यष्टिरनेहा
वार्मुचां मृदितधर्मलुलायः ।
तस्य शोणितपृषन्ति समन्ता -
द्वयाततान हरिकोपमिषेण ।। २४

व्योमगोष्ठगमितां वनचारा -
च्छैलशङ्कुषु तडिद्गुणबद्धाम् ।
कालिकां कलशिखावलगीतिः
कालगोपतिरदुग्धं पयांसि ।। २५

यद्वलाहककुलं सवलाकं
तत् प्रफुल्लमिव केतकषण्डम् ।
यः पटुद्ध्वनिरभूदशनीनां
स प्रवाहनिनदो नु नदीनाम् ।। २६

तप्तचातकतृषापहराणां
सन्ततं निपततां घनवाराम् ।
अव्यभूत् कुटजधूलिभराणा-
मुद्यतामपजयोऽपजयो नु ।। २७

निर्भरासवनिपालनिलीनैः
षट्पदैर्विहितपुष्पकलापम् ।
पाकशालिफलगुम्फितजम्बू-
सौहृदंकुटजषण्डमधत्त ।। २८

वारिदेक्षुवलयस्य निकामं
कालपे च.. निकल्पितपीडे ।
तत्र सोर्मिरभिभूयत वर्षै -
स्तत्परुर्मणिगणैः करकैश्च ।। २९

लाक्षिकीं रतिपतिध्वजलक्ष्मीं
प्राप नीपरजसां परिपाटी ।
द्यौरिवाजनि धृतारुणरागा
भूः सकुड्कुमशिखेव यथाभूत् ।। ३०

मर्त्यलोकमणितोरणमाशा -
वालिका घनवनेचरबर्हम् ।
उद्ययौ मणिधनुः स्मरलीला -
वागुरा विदधदरण्यशुकाली ।। ३१

लेभिरे नभसि निर्झरिणीनां
लीनगैरिकरजांसि पयांसि ।
निर्भराम्बुदनिपीडित भूभृ -
च्छोणितोद्वमनसोदरकक्ष्याम् ।। ३२

कन्दलन्ति नभसि स्म पयोदाः
कन्दलं सरसिजस्य न लेभे ।
कन्दलं विकसति स्म न शैलं
कन्दलन्तमकृताशनिनादः ।। ३३

विद्युता कमलयैव बलाका
मालया महिलयैव विधातुः ।
सेवते स्म शिवमम्बरमूर्तिं
पार्वतीव परिरभ्य घनाली ।। ३४

उद्यतोऽधिबकपड्क्तितडित्वा -
न्वारिदो नभसि वासवधन्वी ।
सागरे फणिपताविव साक्षा -
न्माधवः कमलया वनमाली ।। ३५

नीरदाहितरसा मदनागाः
        नीरदाहितरसा मदनागाः ।
पुष्करं भृतशतह्रद भागं
        पुष्करं भृतशतह्रदभागम् ।। ३६

व्योमपिप्पलतरोर्व्यतिषज्य -
        त्कालमेघकलभक्षुभितस्य ।
प्रच्युतैरिव फलैः परिपक्वैः
        शक्रकोपपटलैर्भरिता भूः ।। ३७

राजराजसदसीं प्रतिजग्मे
        राजहंससदसा न रसेन ।
शार्ङ्गिणोऽपि निमिमील
        तदानीं राजहंसमयमीक्षणयुग्मम् ।। ३८

त्रस्नवः श्रिततरक्षुषु वस्तुं
        कुक्षिषु क्षितिधरस्य कुरङ्गाः ।
शिश्यिरे करकशीकरधारा -
        शात्कृते मरुति शर्करिलेषु ।। ३९

अङ्गमङ्गमितरेतरयोगाद्
        गाढगाढमुपगूह्य गरुद्भिः ।
निन्यिरे तरुकुलायनिलीनाः
        पत्रिणाः पवनशीकरपीडाम् ।। ४०

ग्रीष्मराज्यपरिपालनगर्वात्
        कृप्यताम्बदकुलेन दवाग्निः ।
निर्दयं नियमितोभयवेगो -
        दारराट शतकोटिमिषेण ।। ४१

तार्क्ष्यपक्षमिव विद्युतमैन्द्रं
धन्वबर्हि गरुतं च विशङ्क्य ।
आरसातलमपात्युदाधरा -
पन्नगैः पवनपूत्कृतिमद्भिः ।। ४२

नीरदो रविनिराधनमुक्त्यै -
तत्प्रभाभिरचिरांशुमधीभिः ।
इन्द्ररोधहरणाय बलाका -
व्याजतोऽस्य च वधूभिरुपासे ।। ४३

पक्त्रिमेण समलक्ष्यत जम्बू -
पादपः परिकरेण फलानाम् ।
इन्द्रनीलमणिराशिरिवाब्धेः
नीरदैः सजलगीर्णनिगीर्णः ।। ४४

शक्रे घनालिं जरसंनिवेशात्
पानीयदानत्वरिते पृथिव्याः ।
कलापिनां गारुडकर्करीणां
नृत्ताकपादात् पतनभ्रमोऽभूत् ।। ४५

इन्द्रायुधं रोहितमाबभासे
वशंवदं वंशकरीरलक्ष्याः ।
नाथस्य हन्तुस्तिसृणां पुराणां
नभोमयस्यैव मुकुन्दबाणः ।। ४६

आशालता पुष्पगुलुत्थलक्ष्मी -
माकारयन्त्यः परितो बलाकाः ।
पयः प्रदानोपहिताः प्रजानां
नभःश्रियः शंखनखा इवासन् ।। ४७

बद्घेन बिभ्रद् विषभृद्भिरभ्रैः
केशेन विद्युत्कृतमालमालाम् ।
वर्षर्तुरुद्रस्तनिताट्टहासो
जहार कालं जनतापहेतुम् ।। ४८

वज्रानले साक्षिणि दिग्वधूनां
वर्षोपलारोपिणि वारिवाहे ।
चामीकरीमङ्गलकण्ठसूत्र -
च्छायामपुष्णादचिरांशुलेखा ।। ४९

तिरस्कृतार्कं तिमिरं घनानां
कालेभवत् कारणपूर्वमेव ।
दिवौकसामुत्तरदक्षिणे य -
दहस्त्रियामं हरिदश्वयाने ।। ५०

उत्सृज्य बाष्पं धृतरोमहर्षा
तृणाङ्कुरैः फुल्लसिलिन्धनेत्रा ।
प्रियेण वाचा प्रचलाकिनीनां
मेघं मही स्वागतमन्वयुक्तम् ।। ५१

प्रकल्पितानां नभसा विजेतुं
प्रतस्थुषः पञ्चशरस्य लोकान् ।
पयोदमालापटमण्डपानां
पाशा इवासन् प्रथमाम्बुधाराः ।। ५२

सौदामिनीदामनिबन्धनेन
जीमूतमन्धं भ्रमयन् मरुद्भिः ।
नभः पयोधावमृतं नवीनं
ममन्थ घर्मान्तमयो मुकुन्दः ।। ५३

आबिभ्रतां निर्भरमम्बुभार -
मालम्बदण्डा घनमण्डलानाम् ।
निपेतुराखण्डलचापकाण्ड -
नाराचधारा नववारिधाराः ।। ५४

तटिल्लताभिस्तपनीयकोण -
पटीयसीभिः परिताड्यमाना ।
जीमूतभेरी जगदण्डगोल -
मामूलमुन्मूलयितुं ररास ।। ५५

भूयिष्ठमुद्भिद्य विदूरभूमिः
पुरः किरन्ती मणिपूर्णपात्रम् ।
मन्त्रध्वनिव्यञ्जितमङ्गलानां
चक्रे चमत्कारमिवाम्बुदानाम् ।। ५६

धारापदेशेन पयोधराणां
नारायणस्येव पदद्वितीयम् ।
प्रासूत भूयोऽपि चरः सहस्र -
स्रोतोविशेषान् सुरलोकसिन्धोः ।। ५७

पीतः पिनाकीव विषं पयोधे -
र्व्यापी दिवो विष्णुरिव क्रमेण ।
वेधा इव व्यञ्जयितादिसृष्टिं
मेघस्त्रिमूर्तिप्रकृतिं विवव्रे ।। ५८

करम्बितायां करकाभिरुर्व्यां
चक्रुः स्मरन्त्यः शतमन्युकोपाः ।
धर्मान्तलक्ष्म्या घनसारमिश्र -
स्ताम्बूलवीटीरसबिन्दुशङ्काम् ।। ५९

जटा इव व्योमवटद्रुमस्य
　　द्यावापृथिव्योरिव सूत्रपाताः ।
विरेचिरे विस्मृतकालमेघ -
　　वितानपाशा इव वारिधाराः ।। ६०

ननर्त विद्युन्नयनप्रवृत्या
　　संभाव्यमानस्तरुणाम्बुदेन ।
मत्त शिखण्डी मदवर्षकेका -
　　कोलाहलं कुण्डलयन् कलापम् ।। ६१

नभस्तटाके नवमेघपङ्क -
　　कलङ्किनि क्रीडतिरालकोले ।
विभ्रंशिनीं बालमृणाललक्ष्मीं
　　विडम्बयन्ति स्म नवाम्बुधाराः ।। ६२

सान्द्रं तमस्तत्र मरुत्प्रहारं
　　वर्षं ततो भीषणवज्रघोषम् ।
तदेव सर्वं तरुणोन्मुखीना -
　　मविघ्नयात्रामकरोद् वधूनाम् ।। ६३

प्ररूढमैक्यं पयसोः प्रकाम -
　　ममी हसन्तीति रुषेव हंसान् ।
उत्सारयामासरुदीर्णघोषान्
　　वर्षोपलान् वारिधरावमन्तः ।। ६४

नदन्ति रोधाद् वनदन्तिरोधात्
　　पयोधराणां सपयोधराणां ।
कलापिनीनां सकलापिनीनां
　　कला सकेका सकला सकेकाः ।। ६५

वज्राग्निमङ्गारितवारिवाहं
मरुद्भिरुद्दीप्य नभस्यवादी ।
वियद्गुहायां रसवेधनेन
तटित् सुवर्णं तरसा ततान ।। ६६

उदस्य मृद्भारमुदन्वतः कि -
मारोपयन्नम्बरचक्रमध्ये ।
चकारचक्रायुधदण्डधारी
नभः कुलालोनवमेघकुम्भान् ।। ६७

मरुत्प्रकीर्णैर्घनपुष्पवर्षै
पयोदवन्नीलपयोदवेण्यः ।
मिथस्तटिद्दण्डविवर्तनाभिः
अदर्शयन् रासकलास्यमाशाः ।। ६८

नृत्यन्मयूराणि निकुञ्जदभ्र -
तूर्याणि शक्रायुधतोरणानि ।
विद्युत्पताकानिदिवो व्यराजन्
वर्षप्रसूत्युत्सवमङ्गलानि ।। ६९

शुचेर्वियोगश्वसितानुबन्धा -
च्छोकादिवाशामलिनाम्बरान्ताः ।
अलक्ष्यता राघववर्षबाष्पै -
राक्रन्दवत्यः स्तनितैरभूवन् ।। ७०

प्राची मरुत्पाशनिबद्धकेश
मालाघटीयन्त्रनिवर्तनेन ।
उदन्वतस्तोयमुदस्यवर्षा -
वितेनिरे विश्वकुटुम्बरक्षाम् ।। ७१

सौदामिनीचम्पकमालिकानां
कादम्बिनीकन्दलकुन्तलानाम् ।
आसारधाराहरिदङ्गनानां
हारा इवासन्नवलम्बमानाः ।। ७२

वनीरुहाणामवनीरुहाणां
मनोहराणां सुमनोहराणाम् ।
सदागतीनां रसदागतीनां
सुहृत् स कालस्त्व सुहृत् सकालः ।। ७३

मध्येवनं मालतिकुड्मलानि
श्रेण्यालिनां श्रृङ्खलितान्यराजन् ।
चन्द्रे निरुद्धे दिवि तारकाणि
नीतानिकारामिव वारिदेन ।। ७४

अम्भोधरे रुन्धति हंसमेक -
मन्येऽपलायन्त कुतोऽपि हंसाः।
आरण्यकेष्वस्तमितेषु तेषु
शिखिष्वनृत्यच्छिखिनः किमेतत् ।। ७५

आकर्ण्य कर्णज्वरमभ्रघोष -
मत्याहितेन स्वयमापतन्त्याः ।
सस्मार रामः समयेऽनुभूतं
कण्ठग्रहं मैथिलकन्यकायाः ।। ७६

रामे प्रियोत्कण्ठिनि राजहंसः
प्रावासयत् सा प्रकृतिः शुचीनाम् ।
ननर्त बर्ही यदि तत्र वर्ण -
साङ्गर्यभाजां स किल स्वभावः ।। ७७

पयोमुचां बान्धवमुत्पयोभिः
प्रदीप्तसीताविरहाग्नितापः ।
समीक्ष्य सीताविरहानुबन्धं
समाबभाषेऽवरजं स रामः ।। ७८

कान्तावियुक्तस्य ममावतीर्णः
कालोऽयमन्धंकरिणाम्बुवाहः ।
ज्वराहतस्य ज्वलनानुषङ्गः
क्षतत्वचः क्षाररसावलेपः ।। ७९

मुखोद्गता मोहकरी ममेति
केका मयूरस्य किमत्र चित्रम् ।
मित्रं विषं यो वियति प्रदत्ते
वृत्तिर्विषं यो वहतो बिलेषु ।। ८०

नभस्वदास्फालनपातितानां
नवाम्बुधारामणियष्ठिकानाम् ।
पर्यन्तमुक्ताफलपद्मराग -
कान्तं लभन्ते बककेन्द्रकोपाः ।। ८१

कदम्बवातश्लथमानबर्हैः
कलापिभिः प्रस्तुतलास्यलीलः ।
मथ्नन्ति धैर्यं मम वर्षधाराः
प्रलम्बिनो माल्यवतः प्रदेशात् ।। ८२

हंसा विनान्येन निजान्निदेशा -
दन्यत्र यातं नभसङ्गमेन ।
विना मयूरं विषहेत को वा
वर्षेण धारामरुदाहतानि ।। ८३

कारानुकारानुमिता नभः श्री
        हारानुकारानुमिताम्बुधाराः ।
बन्धूकबन्धूकरणारुणानां
        माधुर्यमाधुर्यत इन्द्रकोपाः ।। ८४

द्रुमतरालमरालशरासन -
        स्पृशिकदम्बकदम्बपरागणि ।
गतिरनेहसि नेह सितेतर -
        च्छवि पयोधरयोधरवोत्सवे ।। ८५

जलधर इह मे मनोमोहनो
        भवति बहुलतां नभोगत्वरः ।
क इव विरोहितो गिरेरकन्दरां
        वहति बहुलतां नभोगत्वरः ।। ८६

शिखिनां कुरुते गलैरुदग्रैः
        रतिबन्धो रसितानि कोमलानि ।
अनुसृत्युदगानि विद्युताब्दो
        रतिबन्धो रसितानि कोमलानि ।। ८७

स्थितमबलागमे तपदिनोपगमेषु यया-
        दलकानने जनितया गिरिमल्लिकया ।
इति सतीवकाल इव भूभृतिकान्तिलस -
        दलकानने जनितया गिरिमल्लिकया ।। ८८

भूः कनकप्रकरं मधुरास्ते माल्यवती हरता रमणीयम् ।
चन्द्रकिनः प्रतिनन्दन्ति .... माल्यवतीहरता रमणीयम् ।। ८९

चरितेन यत् सह पथागतमब्दं
        ककुभो भरद्युतिमतः सुमनोभिः ।
वहते हुताशनमयी रुचिराभिः
        ककुभो भरद्युतिमतः सुमनोभिः ।। ९०

घैर्यं मत्कं मेघघटा पार्थजनानां
कारामास्था दारसिता धीरधीनानि ।
अस्यां विद्युद्धाजयगान्तानिव भेद्यां
कारामास्थादारसिता धीरयुनानि ।। ९१

सकलमधुरया नवश्यामया
सकलमधुरया नवश्यामया ।
विलसितविषभृद्रसाभाविता
विलसितविषभृद्रसाभाविता ।। ९२

बकाबका युतायुता
सिकासिका मृतामृता ।
भयाभया नका नका -
धिकारताधिकारता ।। ९३

हिमाचिराहिमाचिरा
क्षमा क्षमा वनावना ।
नवोनवो दवोदवो
रयोरयो घनाघना ।। ९४

वज्रप्रहारा इव वारिधारा -
निस्त्रिंशपातालवनीरवाताः ।
कृतान्तदंष्ट्रा इव कैतकानि
कालाग्निरुद्रा इव कालमेघाः ।। ९५

कालिका सकमलं लसमानं
कालिका सकमलं लसमानम् ।
कालिका सकमलं लसमानम्
कालिका सकमलं लसमानम् ।। ९६

कैव कथा बत जीवितुमस्मिन्
　　कालभुजङ्गभयङ्करमेघे ।
कीदृगशोकलता किलकाले
　　सीदति वत्स ! कुतो मम सीता ।। ९७

इत्येवमादिकविलापविलीनधैर्य-
　　माश्वासयन् वहुभिरौपयिकैर्वचोभिः ।
सौमित्रिरम्बुधरशम्बरशान्तिवेला-
　　मालोकयन् किमपि शान्तिकलामयासीत् ।। ९८

नीरन्ध्रं कुटजसिलिन्ध्रनीपगन्धैः
　　सानन्दं विरचितताण्डवैर्मयूरैः ।
कालेऽस्मिन् कपिरपि चन्द्रमत्यजीवत्
　　तारायाः सरसरसोत्सवानुभूत्या ।। ९९

नीविमोक्षं प्रलयपयसां नीपगन्धैकराज्यं
नादब्रह्मस्तबकितशिरा नर्तकं बर्हिणीनाम् ।
कालं निन्ये कथमपि निजोत्प्रेक्षयाऽसौमृगाक्ष्या
स्वादं स्वादं नयन ... सुधावर्षिणीरूपलक्ष्मीम् ।। १००

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयनिधेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गोऽयमेकादशः ।। १०१

इति डिण्डिमसार्वभौमकृतौ श्रीरामाभ्युदये एकादशः सर्गः

द्वादशः सर्गः

अथ श्रियं योक्तुमिवाम्बुजे पुनः
　　ककुत्स्थवीरे मिथिलेन्द्रकन्यकाम् ।
भयात्ययो देवगणस्य रक्षसां
　　कुलात्ययः प्रादुरभूद् घनात्ययः ।। १

अमुष्य पीडामतिवाहितोऽप्यदात्
　　कथाप्रसङ्गेषु कदम्बमारुतः ।
अमुष्य कर्णान्त इवानुबन्धनाद्
　　गतोऽप्यसह्यो घनगर्जितध्वनिः ।। २

अजीजन (त्वात्) क्षणरुच्यगोचराः
　　प्रणष्टवज्रेष्वनलप्रवृत्तयः ।
पलायिनो दिक्षु विलायिनो घनाः
　　प्रपेदिरे राघवपीडनाफलम् ।। ३

मलीमसान्यम्बरसिन्धुमध्यतो
　　विशोध्य बालातपभाजि दिक्तटे ।
शरद्दुकूलानि मरुत्प्रसारिता -
　　न्यमन्यताभ्राण्यमलानि राघवः ।। ४

हतेन्द्रसूनुं............ भो -
　　रजय्ययोगेन कुमारमात्मनः ।
उपाययौ द्रष्टुमिवोष्णदीधितिः
　　कथञ्चिदुत्तीर्य घनोपरोधनम् ।। ५

निमथ्य सीतावियुतो घनोदयं
कबन्धमुत्तेजितमित्रमण्डलो ।
प्रसन्नताराप्रभवस्तमन्वगाद्
ऋतुः स कादम्बमहाशरासनः ।। ६

तटित्त्वती भूः कलमैः पचेलिमैः
सङ्कल्पमेधाकलभैः प्रभेदिभिः ।
ऋतुं तृतीयं पुनरिन्द्रचापजि -
च्छुकावली दाशरथेरसूचयत् ।। ७

स्ववाहचक्रं सुरलोककार्यमि-
त्युपाहरद् गोत्रभिदम्बराङ्कणात् ।
दिदृक्षुरागामिकरामविक्रमं
दृशोर्निमेषं मुमुचे जनार्दनः ।। ८

विलोक्य पद्मैर्विकचैर्विलोचनैः
पतद्द्विरेफाञ्जनबाष्पवर्षिभिः ।
चिरस्य सीता विरहासहिष्णुतां
गिरा मरालस्य तमन्वयुङ्क्तभूः ।। ९

शुकावलीतोरणमालिनीस्वन -
न्मरालशंखं मददन्तिदुन्दुभिः ।
यियासतः प्रत्यरि तस्य सन्दधे
शरज्यपारात्रिकशालिमङ्गलम् ।। १०

समानयाऽस्मान् कपिभिः किमाहवे
विपाटयामस्तव वल्लभाहरम् ।
इतीव तस्मै मदगर्जितच्छला -
च्छशंसुरुत्क्षिप्तकरा वनेद्विपाः ।। ११

प्रसन्नता सर्वहरिद्युतिप्रदे
　　विभौ रघूणां च विभाव्यभाव्यत ।
शिलापि यस्याऽजनिपादपल्लव -
　　क्रमादतीव द्रुतकोमलाकृतिः ।। १२

क्वचिन्न केका इति केकिनां ध्वनिः
　　किकस्य जज्ञे विलभुत्वयोः स्त्रियाम् ।
प्रसादमापन्मनसा सह प्रभोः
　　पयः पयोदस्तु तमः प्रकारतः ।। १३

समूह्य सीतापदि वारिदागमे
　　प्ररुद्य धाराश्रुपरिप्लुता दिशः ।
तदा रणोद्योगमिवास्य शंसितुं
　　स्ववल्लभेभ्यः प्रययुः स्वमास्पदम् ।। १४

पुरा किलाद्भिः परिपूर्य नीरदान्
　　विसृज्य कान्ता विरहव्यथादुहः ।
अरुन्ध सिन्धू यदमुं तदा पुनः
　　तदप्यदग्ध्वा न हि तन्निवर्तते ।। १५

अनद्धधीरायतनेषु तारया
　　मुखार्पितं शीथु निषेव्य मोहितः ।
क्षणान्न रन्तुं कपिराडुपागम -
　　न्मन्तिः क्व कापेयमदस्मरस्पृशाम् ।। १६

घनेभसिंहं क्षणरोचिरोषधी
　　निशात्ययं नीपवनानिलोरगम् ।
मदौषधां बर्हिकुलस्य मालती
　　जरागमं वै जननं सरोरुहाम् ।। १७

उडुप्रसूनोपवनं कुमुद्वती -
विदूषकं हंसविचारयोगिनम् ।
रविप्रकाशारणिमिन्दुचन्द्रिका -
... प्लवार्णवं पञ्चशरायुधम् ।। १८

सम्मोहनं संयमिनोऽप्यनेहसं
विभाव्य सीतां च विदूरवर्तिनीम् ।
कपेश्चमाद्यं करणे कृतोत्तरे -
द्विषं च दुःसाधमद्रुयताधिकम् ।। १९

शरत्प्रवृत्ता समयोऽभिपूर्यतां
कृतोपकारस्य किमित्युपेक्षते ।
सुखेन किं तेन विनापि तत् कुतः
तवेति सुग्रीवमुवाच मारुतिः ।। २०

गुरोर्निदेशान् कुपितोऽथ लक्ष्मणो
नयन्नुपायान् प्रतिलोमवर्त्मना ।
प्रगल्भताराप्रणयप्रसादितो
हरीश्वरं प्रापयदग्रजं ततः ।। २१

समस्तवर्गे हि पुमान् भवान् किमि -
त्यकाण्डतामप्रकृतं तदुत्सहेत् ।
इतीरितस्तेन कृतस्य का तुला -
त्वयेति सैन्यानुदयो जगत्कृती ।। २२

अथास्य सेनापतयोऽनुशासना-
द्विचेतुकामा मिथिलेन्द्रकन्यकाम् ।
समस्तमाक्रम्य जगत् तरस्विनः
प्रचेरुरह्नामिव पत्युरंशवः ।। २३

गजं गवाक्षं गवयं स जाम्बव -
त्सुषेणनीलर्षभगन्धमादनान् ।
शरारिमैन्दद्विविदांस्तथापरा -
नसौ कपीनादिशदङ्गदानुगान् ।। २४

किमप्यलभ्यं न तव त्रिविष्टपे
त्वया हनूमन्! न समो गुरुर्यदि ।
कृतां प्रतिज्ञां सुहृदे सुदुस्तरां
त्वमेव मे पूरयितुं प्रगल्भसे ।। २५

न देशकालोचितकृन्न भक्तिमान्
न राज्यविभ्रंशसुहं न धीरधी ।
न मित्रयोक्ता न च राज्यलम्भको
मम त्वदन्यो मतिमन्! निरूपय ।। २६

अनेन निष्कण्ठकराज्यदायिना
जगत्त्रयं दग्धुमपि प्रगल्भते ।
तथापि मित्रं समयच्युतं भवे -
दिति स्वकार्यप्रणयः कृतो मयि ।। २७

परः सहस्रैः किमिवोपवाहितैः
वलीमुखैरप्रतिपत्तिविक्लबैः ।
त्वमेव देवीमवलोक्य धीर! तत्
प्रवृत्तिमावर्त्तयतेति मे मतिः ।। २८

त्रपानतं स्वामिगिरेति मारुतिं
विनिश्चितार्थं स विभाव्य राघवः ।
स्वनामचिह्नं सुदृशोऽवलम्बनं
ददावभिज्ञानकमङ्गुलीयकम् ।। २९

प्रतस्थिवत्सु प्रतिदिक् प्लवङ्गम -
　　व्रजेषुवैदेहसुतां गवेषितुम् ।
ततः सतारं ककुभं सहाङ्गदो
　　महेन्द्रचिह्नां मरुदात्मजो ययौ ।। ३०

इतस्ततस्तां रघुवीरगेहिनीं
　　विमार्गणव्यग्रतयाप्यपश्यताम् ।
परं परिभ्रान्तिरभूद् वनौकसा -
　　मदेशिकानामिव मन्त्रराशिषु ।। ३१

प्रविश्य विन्ध्याद्रिवनानि वानराः
　　प्रवालमेकैकरुतं प्रमारुहाम् ।
प्रशोधयन् रामवधूदिदृक्षया
　　नयेत् करं नष्टगजो घटेऽपि यत् ।। ३२

पदैर्यदक्षुण्णमगान्तरेषु यद्
　　विलोचनानां विषये तुरीकृतम् ।
यदश्रुतं यावदनिश्चितं श्रमा -
　　द्यदप्यलब्धं कपिभिर्न तद्वने ।। ३३

पुरो जिघांसत्यसुरो दशास्य इ -
　　त्यगोपमे वालिसुतेन पातिते ।
तपस्विशापेन ततो वनौकसः
　　प्रकामशून्यामटवीं प्रपेदिरे ।। ३४

श्रमातुरास्तत्र विचित्य निर्विदः
　　प्रचोदितास्ते पुनरङ्गदोदितैः ।
समध्यरुक्षन् रजताद्रिमूर्च्छितं
　　समग्रसप्तच्छदलोध्रकाननम् ।। ३५

ततोऽवतीर्योर्मिलपद्मसौरभान्
कुतोऽप्यजिघ्रत् कुहराद् वनौकसः ।
समीरणान् सारसहंसषट्पद -
प्रणादकर्णामृतपूरणाद्बुहः ।। ३६

तृषाभितप्तास्तिमिरेण संवृतं
प्रविश्य तद्वायुसुताग्रतः सराः ।
प्रकाशदैक्षन्त ततः प्लवङ्गमा -
स्तमपरं........ वात्मवेदिनः ।। ३७

तपस्विनी काप्युपगृह्य तत्र तां
दयावती दिव्यरसैः फलादिभिः ।
अभावयत् स्वागतवागलं पुनः
स्ववृत्तमेतैरनुयुक्तमित्यशात् ।। ३८

इदं वनं लब्धवरं........व्यधा -
न्मयः स हेमावशगो ममागतः ।
ततस्तया प्राप्तमदः सदर्पितं
स्वयं प्रभायामधिशप्तये स्वयम् ।। ३९

तयाऽथ तद्वृत्तबिलान्तरा..........
निमेषतो निर्गमिताः कृताशिषः ।
प्रदिष्टमार्गाः प्लवगाः प्रतस्थिरे
नहि क्वचित् स्वामिहितोऽवसीदति ।। ४०

अवाप्य विन्ध्याचलकोटिमाकुलां
मन्धुद्रुमान् मञ्जरितान् विलोक्य ते ।
स्वभर्तुकालान्तनिवर्तनापदो
वरं प्रगृह्यानशनव्रतस्थिताः ।। ४१

उदश्रु पार्श्वे शयितं तदश्मसु
    प्लवङ्गयूथं प्रसमीक्ष्य पक्षिणम् ।
इहामिषं प्राप्तमिति प्रहर्षुलो
    जिघांसुराचष्ट जटायुरग्रजः ।। ४२

विपत्प्रसङ्गव्यथिताङ्गदेरिते
    वनप्रवेशादनुषङ्गिणि प्रभोः ।
जटायुषोऽन्ते स विलप्यनिर्भरं
    शुचा कपीन् प्रत्ययिनः स्वयं व्यधात् ।। ४३

ततोऽर्कदाहं गरुतः पुनर्भवं
    मुनिश्च सीतादशकण्ठदर्शनम् ।
निशम्य लङ्का लवणाब्धियोजन-
    प्रमाणमित्युच्छलिताः प्लवङ्गमाः ।। ४४

अथोत्तरं तीरमवाप्य पाथसां
    निधेरवाचं निबिडोर्मिमालिनः।
उदारधीरुल्लिखितामिव स्थितां
    चमूमवोचच्चतुरं वचोऽङ्गदः ।। ४५

मृषानयत् प्राह जटायुषोऽग्रजः
    स्फुटीकृतो येन गरुत्पुनर्भवः ।
स्वतन्त्रयोः स्वाम्यनुरागशौर्ययो -
    र्निधिः पुरोऽभून्निकषेयमम्भसाम् ।। ४६

गभीरभीमध्वनितं गरुत्मतो
    व्यभौरुचेतः किमवेक्ष्य सागरम्।
क एनमुत्तीर्य कृती भयार्णवे
    निमज्जतो नः पुनरुद्धरिष्यति ।। ४७

प्रभोरनुज्ञाकरणात् कुतो वयं
स च प्रतिज्ञार्णव एव मज्जति ।
न राघवो नन्दयिता न कस्यचित्
न साहसी चेन्नदराजलङ्घने ।। ४८

निमीलिताक्षं निभृतं स्थितं हि वो
निरुत्तराणामपि चोत्तरं मम ।
ददाति देवासुरमन्थनोचितं
विलङ्घयिष्ये जलधिं विलोक्य ताम् ।। ४९

प्रभुर्नहि प्रेष्य इति प्ररुध्य तं
न्ययुङ्क्त तत्रानिलपुत्रमृक्षराट् ।
आनृण्यपेक्षा किमरण्यवासिनां
दवानले प्रज्वलिते महत्यपि ।। ५०

अपि प्रयुक्ते हनुमन्! महाभये
किमत्र तूष्णीमसि केसरिक्रमात् ।
जगत् तवेदं जनकेन जीवति
त्वदाश्रयं नः पुनरद्य जीवितम् ।। ५१

न माधवस्तार्क्ष्यमृते प्रवर्तते
न राघवस्त्वामथुना विना पुनः ।
उभौ परं लोकविलङ्घिरहसौ
विसोढवज्रापहतौ मरुत्वतः ।। ५२

फलं विपक्वं किल फालपूरमि-
त्युषस्युदीक्ष्यारुणमुत्प्लुतः क्षणात् ।
शतत्रयं योचनमागतः पुन -
र्भवान् शिशुत्वेऽपि भयं हराद्य नः ।। ५३

हरिः प्रसीदेदवतारि राघवो -
व्रजेन्न भर्ता वितथप्रतिज्ञताम् ।
सुखं ध्रियन्ते स्वजना निरापदः
सपुत्रदारास्तव सत्त्वसम्पदा ।। ५४

प्रशंसितो जाम्बवतेति मारुति-
स्तथा प्रहृष्यन् वियति व्यवर्धत ।
यथा व्यतीतोद्‌भवविग्रहोद्यमं
विभो रघूणां पुनरस्मरज्जनः ।। ५५

यथोदये वारिनिधिः सुधानिधे -
र्यथा निदाघापगमे वलाहकः ।
तथा कुमारो मरुतः समं बली
वलीमुखानां ववृधे मनोरथैः ।। ५६

प्रदर्शिता कालिकवज्रपातनैः
पदक्रमैः पातितसानुमण्डलः ।
महेन्द्रमारुह्य गजेन्द्रमास्थितां
महेन्द्रलक्ष्मीं विचचार मारुतिः ।। ५७

तदङ्घ्रिपातक्षुभितस्य भूभृतः
प्रकीर्यमाणैस्तटनिर्झराम्बुभिः ।
वनौकसां भर्तृनियोगवर्तिनां
शशाम शोकानलवद् दवानलः ।। ५८

झरीपरीवाहसरीसृपन्मदो
दरीमुखं दन्तकरीरदर्शयत् ।
झरीकरीति स्म सुरी भयं नटन्
गिरीरुषेवैककरी हरीरितः ।। ५९

भ्रमच्चमर्यस्तसमस्तहस्तिजित्
त्रसद्बिसत्यक्ततटत्रुटत्किटि ।
द्रुतद्विपद्वीपिकलापितत्पद -
क्षतक्षणक्षोणिधरः प्रचुक्षुभे ।। ६०

समं मृगैः पातयता तटोपलान्
समूलमुन्मूलयिता वनस्पतीन् ।
हनूमतापाहृतनिर्झराम्भसा -
तनूमताभूद् गुरुणेव चेष्टितम् ।। ६१

उदक्षमुद्दालधिसङ्कुचत्पदं
निकुञ्चितश्रोत्रपुटं हनूमतः ।
कटीतटन्यस्तभुजं तदग्रतः
स्थितं न चित्रेऽपि विलेखितुं क्षमम् ।। ६२

निपेतुषा तत्तटनिर्झराम्भसा
हृता भृशं भोगवती व्यजृम्भत ।
तटीमटीकं तदन्तरादरान्म -
ममङ्क्ष वो मङ्क्षु विलेशया बलाः ।। ६३

नितान्तमाक्रान्तशिरोधराधरः
पपात पातालतले तथाऽमुना ।
दशास्यभीत्याऽस्य गतिं यथारुधत्
प्रतूर्णमुद्घूर्णजलः किलार्णवः ।। ६४

स तस्य निस्सारितसान्द्रनिर्झर -
प्रवाहणमारोहणसङ्क्रमक्रमात् ।
निकुञ्जकुञ्जादुदलच्छ एल्लता-
प्रताननीप्राणधराः सिता इव ।। ६५

प्रवेष्टुमास्फोट्य ततः प्रहृष्टधीः
　　सराहि सारंहितसिंहविक्रमः ।
शरः शरसादिव शैलमस्तका -
　　दुदप्लविष्टोत्तरणाय वारिधेः ।। ६६

सलोचनैश्चन्द्रकिभिर्भयोज्झितैः
　　सचन्द्रकैः प्राप महेन्द्रतागिरिः ।
बलीयतः कोऽपि वलीमुखाशनिः
　　पलाशराशिं प्रतिदग्धुमुद्यतः ।। ६७

धरन्ति यं येन पदन्ति यन्मुखे -
　　श्चरन्ति पुष्यन्ति च ये यदागमात् ।
अमी तमस्यात्मजमन्वदुद्रव -
　　न्मृगा विहङ्गा भुजगानगा अपि ।। ६८

प्लवङ्गजङ्घानिलतः समुत्थिताः
　　सगर्जिताः सर्जित कज्जलश्रियः ।
मदाम्बुधारा सुमुखा विभाविता
　　घनाघना एव घना घना घनाः ।। ६९

दिवं तदानीं गमितो मनूमता
　　शरद्घनश्रेणिभिरेकतां गतः ।
अलक्षि हर्यक्षगणः क्षुणं सुरैः
　　क्षणप्रभोत्क्षेपसदृक्षया दृशा ।। ७०

विडम्बयामास समीरसम्भवो
　　महोदधेरभसिबिम्बलम्बितः ।
अफल्गुवल्गो प्र.........धावत -
　　सुरूपमारोपितहेमसम्पदः ।। ७१

प्रभाविभागप्रविभेदिकोर्मिका
निबन्धनाद् गन्धवहात्मजन्मनः।
पयोनिधौ सेतुपथस्य भाविन-
श्चकार चामीकरसूत्रचातुरीम् ।। ७२

प्रसृत्त्वरं सत्त्वरमर्णवासिनि
प्रकाशमाकाशयतो हनूमतः ।
शशङ्किरे शङ्कुलिता भयाङ्गना
मुखार्चिषामुच्चयमम्बुकुम्भिनः ।। ७३

निगूढगूढेतरविग्रहश्चरन्
पयोधराणां पटलेन पाटलः ।
विसारयन् केसरदीधितिं तुलां
विवस्वतः प्राप नभस्वतः सुतः ।। ७४

द्विषत्पुरप्लोषचलः स्म विद्विषः
शरानलस्तम्भकरं हरिं दिवि ।
ससाध्वसा बद्धदृशो दिशो हित -
श्चचायिरे चारणचारुलोचनाः ।। ७५

तद्दूरवेगातिशयोत्पतिष्णुना
महाम्बुधेरम्बुभरेण गर्भिताः ।
सटाच्छटाम्रेडितविद्युदुद्गमा
विबभ्रमुर्निर्भरमभ्रपङ्क्तयः ।। ७६

पदस्य नादस्य नभस्युदञ्चितैः
सषट्पदैस्तत्तरुपुष्पराशिभिः ।
चिरात् पदं प्राप्यत सिद्धसुभ्रुवां
कचेषु कल्पद्रुमपुष्पकाङ्क्षिषु ।। ७७

सहालिपुष्पालिमनुप्रवर्तयन्
स मारुतिः शीघ्रमदुद्रवद् दिवम् ।
तमः कुमारा निशि तारकैः समं
हठेन कर्षन् हरितामथीश्वरम् ।। ७८

तदुद्धतैर्धातुरजोभिरम्बरे
करम्बिता चण्डकरांशुमण्डली।
अशङ्कितं कुङ्कुमकेसराटवी
विलोठनो विभ्रममभ्यपद्यता ।। ७९

जवादवाचीं प्रति जात्यकाञ्चन -
च्छटाच्छविच्छिन्नदिगञ्चलं चलत् ।
अशङ्कि लङ्काशु तमापतन्निव
स्वशृङ्गमुत्सादयितुः सुरालयः ।। ८०

उदग्रया नासिकयोग्रयोल्कया
दहन्निवाशां पुर एव दक्षिणाम् ।
प्रसार्य वाहू प्रपिबन्निवाम्भसा
निवेशमाकाशमपि न्यरूपि यः ।। ८१

त्वरोत्पतत्पादरयोद्यता पत-
दृपद्रुमा पूर्णमुखा स्थितं ध्रुवम् ।
दिनग्रहः सेतुपथस्य दर्शितः
प्लवङ्गमेन्द्रेण तरङ्गमालिनि ।। ८२

उदग्रमुत्खाय वनद्रुमोत्करं
प्रतिक्षिपन् ऋक्षगणां पदक्षतैः ।
द्रुतं दधाव द्विषतः सटाच्छटा-
विवर्तनापास्तविकर्तनातपः ।। ८३

कादम्बिनीं बोककचद्रुमोत्कला
नितान्तसङ्क्रान्तिजुषा निजत्त्विषा ।
विभातवेलासु विभावसुर्यथा
ववार वाराकरवारिवानरः ।। ८४

पयोदपङ्क्तया परिकृष्यमाणया
रराज राजीवरजोऽरुणाननः ।
अधित्यकायामधिधातुमण्डना -
सपक्षविक्षेप इव क्षमाधरः ।। ८५

वियत्यवष्टम्भितदीर्घवालधिं
विमानरामाः पवमाननन्दनम् ।
विलोमवृत्या वलितं विवस्वतः
शशाङ्कमुत्तुङ्गयुगं शशङ्किरे ।। ८६

ददानया देहरुचा दिवौकसां
दिवापि तारापथदर्शनं दिवि ।
हनूमतो हाटकभङ्गपिङ्गया
चखण्डिरे खण्डरुचो मरीचयः ।। ८७

क्वचित् खगानं क्वचिदात्मनो गुरोः
क्वचिद् घनानां क्वचिदुष्णतेजसः ।
क्वचिद् घनांशो क्वचिदध्वनां सतां
स वेगतः सञ्चरतोम तत्समः ।। ८८

प्रवर्तयन्ती कनकोत्तरांशुक-
प्रपञ्चमस्वं च जनीकुचाञ्चले।
रुचिः प्रसृत्या रुरुचे स्म कोरकान्
किरन्त्युदन्वत्कृतमालकानने ।। ८९

प्रतापसीमन्तितपाथसः कपे -
स्सरित्पतेर्गर्भपथावतारिणः ।
रतिश्रमस्वेदकणान् समीरणो
विनिन्यिरे पन्नगराजयोषिताम् ।। ९०

उदञ्चमच्चक्रुरिदं निदर्शन -
प्रवर्तिताश्चगतिं नभश्चराः ।
प्रवर्तयन्नध्वनि हर्षुलाभिरा
पवित्रया चित्रशिखण्डिनः स्वयम् ।। ९१

स्वविश्रमायास समुद्रचोदितं
निरुद्धमार्गं निजकूटकोटिभिः ।
निशाम्य मैनाकगिरिं निशम्य तं
विश्रम्य चापृच्छ्य पुनः स पुप्लुवे ।। ९२

अथास्य जिज्ञासुभिरात्मनो बलं
सुरैः प्रयुक्तां सुरसां चमत्कृतः ।
स सिंहिकायां विकृतं मुखं विशन्
शशीव राहोः सहसोत्थितस्ततः ।। ९३

अथार्णवस्योर्मिकणाद्रिकोमल -
प्रवालचूडालशिखां प्लवङ्गमः ।
विदूरभावादविमुक्तदर्शनां
ददर्श वेलातटपादपाटलीम् ।। ९४

यथा दरिद्रत्वमतीत्य सम्पदा-
यथा महामोहमपोह्य संविधम् ।
यथा तमोऽपास्य दिनोदयाश्रियं
तथाप वेलां स विलङ्घ्य सागरम् ।। ९५

प्रतूर्णनिस्तीर्णमहार्णवस्ततो
विवेकनिक्षिप्तवपुः कपीश्वरः ।
निविश्य लङ्कागिरिशृङ्गमण्डले
शनैर्विशश्राम समुद्रमारुतः ।। ९६

नग्नाग्रलग्नां नवरत्नमण्डप -
प्रभाप्रवाहैः परिपूरिताम्बराम् ।
प्लवेन यातां प्रभुरद्भुतश्रियं
ददर्श लङ्कां दशकण्ठपालिताम् ।। ९७

पटीभवत्केलिवनीपरम्परां
पयोधरीभूतविहारपर्वताम् ।
कलत्रिणीं काञ्चनसालमालया
मणिप्रभामांसलखातमेखलाम् ।। ९८

गवाक्षजालाधिगतेक्षणश्रियं
गभीरनाभीकृतगेहदीर्घिकाम् ।
वितानमुक्ताफलजालकोज्ज्वलां
वितायमानागरुधूपवेणिकाम् ।। ९९

विलासिगोपानसिनासिताञ्चलां
विचित्रचित्रक्रमपत्रलेखिकाम् ।
कपोतपालीमयगण्डपालिकां
भुजायमाणापणवीथिभूषिताम् ।। १००

सपल्लवोल्लासमधुप्रपाधरां
सचन्द्रशालामकुटां सभामुखीम् ।
वरप्रकोष्ठां वलभीवतंसकां
वशीकृतां पुण्यजवैर्वधूमिव ।। १०१

सदन्तचक्रामिव दन्ततोरणैः
सभाट्टहासामिव तूर्यनिस्वनैः ।
प्रतर्जयन्तीमिव केतनांशुकैः
प्रचोदितोल्कामिव रत्नरश्मिभिः ।। १०२

करालकालागरुधूपपालिभिः
प्रदर्शितभ्रूयुगबन्धनामिव ।
प्रभाभिराशातपमण्डपान्तर-
प्रपूर्णजम्बूतटिनीविडम्बिनीम् ।। १०३

नगेन्द्रमारुह्य नवागतं जनं
समीक्षमाणामिव सञ्जिगीषया ।
विहारहेतोर्निशि रक्षसां भयाद्
विमुच्यमानामिव वासरश्रिया ।। १०४

समीक्ष्य तां सस्मितधीर्विचिन्तयन्
पुरीमिमां पुण्यजनान्यदुर्लभाम् ।
सहस्रनेत्रो यदि पश्यति स्वयं
तटस्थितां यास्यति शोकहर्षयोः ।। १०५

प्रविश्य चैनां निशि सूक्ष्मविग्रहो
विचित्य चैत्यानि विलोक्य जानु...... ।
विबोध्य कार्यं यदि विघ्नमुत्तरन्
विनिर्गतास्यां रघुवीरकिङ्करः ।। १०६

इति त्रिलोक्याभ्युदयाङ्कुरार्पणं
हरौ वहत्यध्यवसायमंशुमान् ।
निजं शताङ्गं निमिषादिवाम्बरां
शिरस्यावातीतरदस्तश्रृङ्गिणः ।। १०७

परस्य पुंसः परवन्नियोगतः
पदं विलङ्घ्यानिमिषास्पदं स्यात् ।
सचास्तशैलस्यशिरस्थले हरिं
निशाचराणां प्रविवक्षुरालयम् ।। १०८

गभस्तिमत्यस्तमिते गरीयसा
समं निरुद्धास्तमितो दिशो दश ।
पलाशभर्तुर्मुखपद्धतिक्रमा -
द्विवेकशून्याद्धृदयादिवोद्यतः ।। १०९

ततः प्रवेशासहना हनूमता
जिताशु लङ्कापुरदेवता ह च ।
स्वयम्भुवोक्तं स्वपराजयाक्षयं
पलाशनानां प्रकृतानुरोधनम् ।। ११०

स्वान्ताक्रान्ते दिगन्ते त्वरितगतिसमुत्प्लुप्य तुङ्गे सलीलं
साले सालावृकेन्द्रः पदमपि शिरस्यन्यस्य पङ्क्त्याननस्य ।
वीथीवीथिप्रविष्टो विशदगिरिमतिः स्वीकृतो वीरलक्ष्म्या
गेहाद् गेहं प्रयातो व्यचिनुत सुचिरं गेहिनीं राघवस्य ।। १११

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयनिधेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गोऽगमत् द्वादशः ।। ११२

इति डिण्डिमसार्वभौमकृतौ रामाभ्युदये द्वादशः सर्गः ।।

त्रयोदशः सर्गः

अथास्य सिन्धोरुदियाय चन्द्रमाः
करश्रियापास्ततमः कदम्बकः ।
पराङ्गनायाः परिमर्शकाङ्क्षिणो
दशाननस्य स्मरदाहमावहन् ।। १

स्वबन्धुसन्तानजनीं शुचाकुलां
विदेहकन्यामिव वीक्ष्य विह्वलाम् ।
प्रकीर्यमाणभ्रमरावली......... -
मिमीलनालीकदृशं मृणालिनी ।। २

उपप्लवे सत्यपि रामयोषितं
स्वयं करास्पर्शसहा निशापते।
कुमुद्वती कोशमुखैर्मुदं परां
समुद्वहन्ती विससार सार्थताम् ।। ३

निशाटवाटे निशितं निगूहनं
विधातुकामौ इव वल्लभैः सह ।
चकोरिकाश्चन्द्रमरीचिमञ्जरी -
श्चचर्वुरुच्चावचचञ्चुकोटयः ।। ४

उदायुधानुद्धतदुन्दुभिध्वनीन्
कृतान्तदूतानिव रामकिङ्करः ।
करालवेषान् करदीपदर्शितान्
विदूरतो नागरिकान् व्यलोकयत् ।। ५

निरस्तवस्त्रग्रथनानिरर्गल -
प्रलापिनीपाटलचूर्णितेक्षणाः ।
स दृष्टवानिष्टतमैरधिष्ठितां
मधूप्रवृत्तां मधुमत्तकाशिनीम् ।। ६

सपुण्डरीकामिव दण्डकाटवीं
सदन्तशूकामिव शैलकन्दराम् ।
अवापदन्तः पुरमस्तभीः समं
विशत्पङ्क्तिमुखं........... वलीमुखः ।। ७

स तत्र रक्षः पतिमैक्षतोल्लस -
न्महेन्द्रचापे शयने महत्तरे ।
शयानमुच्छ्वाससमीरणोद्गमैः
प्रकम्पयन्तं परितः प्रदीपिकाः ।। ८

हठाद्धृतानामपहारितांशुकैः
पराङ्गनानां परिहृत्य जानकीम् ।
भुजैर्भुजङ्गैरिव विन्ध्यभूभृतः
प्रसारिभिः पञ्चशिरोभिरन्वितम् ।। ९

स्मरान्धकान्तास्तनकुम्भमण्डली
विलुण्ठितस्थासविलासभङ्गिना ।
विराजमानं विबुधेन्द्रदन्तिनां
विषाणकोटिव्रणितेन वक्षसा ।। १०

विनिस्सरद्विस्तृतनासिकास्तन -
प्रतिश्रुदापूर्णसुवर्णमण्डपम् ।
मदोष्मणा मानवतीरतिश्रमा -
त्प्ररूढरागस्वपनं प्ररूढवत् ।। ११

कलाचिकाचामरखड्गपादुका-
करङ्गभृङ्गारकपानपात्रिका ।
पतद्गृहादर्शिविपञ्चिपिञ्छिका
जलार्द्रिकामड्डुमृदङ्गडिण्डिमान् ।। १२

सखीनिवैकास्तनयानिवेतरा
पतीनिवान्याः परिरभ्य पाणिना ।
विनिश्वसन्तीर्विलसत्कुचांशुका
विजृम्भमाणाननशीथुसौरभाः ।। १३

प्रमथ्यगन्धद्विरदेन पा ....
प्रकीर्णपुष्पस्तबका लता इव ।
स संविशन्तीस्तरुणी सहस्रशो
ददर्शदिव्याः परितो दशाननम् ।। १४

इयं तु सीतेति तदन्तिके शयां
ननन्द मन्दोदरिकां निशामयन् ।
बबन्ध कापेयमनन्तरं न से -
त्यचिन्तयद् गन्धवहस्य नन्दनः ।। १५

वनान्तपातं वनराशिलङ्घनं
प्रसह्य लङ्काभुवनप्रवेशनम् ।
दशाननं दर्शयताप्यनिर्गलं
विदेहकन्या विधिना न दर्शिता ।। १६

कथं न दृष्ट्वा मिथिलेन्द्रकन्यकां
ककुत्स्थवीरस्य मुखं न लक्षये ।
किमित्यनाम्ना करणेन कीर्तये
प्रभोः सुहृत् प्रत्युपकारकाङ्क्षिणः ।। १७

न कापि सम्पातिगिरामसत्यता
न कुत्रचिद् रामपस्पृशां विपत्।
न चार्हतीयं विपदं निशाचरा -
दथापि देवी न कुतोऽपि लभ्यते ।। १८

गवेषता किं न गतं निशिस्थलं
पुरा मयाऽशोकवनं विना पुनः ।
विमार्गितास्मिन् यदि सा न लभ्यते
विरज्य होष्यामि तनुं विभावसौ ।। १९

विवद्यमुष्यां रघुवीर एव मे
गतिर्गरुत्मानिव नागबन्धने ।
दयावती दाशरथेः प्रियैव सा
स्वयं प्रकाशीकुरुतां स्वविग्रहम् ।। २०

विचार्य धैर्यादिति कार्यवित्तमः
ससालमुल्लङ्घ्य विहारशैलभाक् ।
अशोकभारस्य सनिर्झराम्भसा
तटाध्वनाऽशोकवनं समासदत् ।। २१

पनीपतच्छीधुधुनीकमञ्जरी -
खनीकृताऽशोकवनी वनी सता ।
अनीयताक्ष्णोवनीग्रहाङ्गणै -
र्विनीततापा तपनीयवेदिकैः ।। २२

तदन्तरे मन्दमरुत्तरङ्गिता
हिमाम्भसो हेमसरोजमालिनीः ।
स जानुदघ्नी घनसारसैकता
नदीरपश्यन्नवरत्नरोधसः ।। २३

प्रतिक्षिपन्तीं परितो दिगङ्गनां
प्रियेण सन्दिष्टमिवानुयुञ्जतीम् ।
प्रबाष्पपूरस्फुरदोष्ठपल्लवां
प्रवक्तुकामामिव वक्तुमात्मनः ।। २४

प्रतिक्षणस्पन्दितनासिकापुटां
प्रतिक्षिपन्तीमिव जीवितं बहीः ।
पिनद्धवेणीं परितापशालिनीं
समेघलेखां तनमारुणीमिव ।। २५

तरङ्गितं वासत एव तन्वतीं
वसन्तवाताङ्कुरवाञ्छितं चिरात् ।
तलान्नयन्तीं श्वसितोष्मरूषितं
रदच्छदं रत्नपलाशकोरकैः।। २६

विवृण्वतीं स्वर्णगिरेरहङ्क्रियां
विपाण्डुरिम्ना स्तनमण्डलश्रियः ।
मुहुर्मुहुर्मूर्च्छितबाष्पया दृशा
कुरङ्गजातेरुपकुर्वतीमिव ।। २७

कराग्रविन्यस्तकपोलमण्डलां
सरोजचन्द्रैक्यमिवापवृण्वतीम् ।
रसालवल्लीं विषवल्लिभिर्यथा
सुधामिव स्वर्वरणानि हेतिभिः ।। २८

बिलालिकाभिः शुकसारिका यथा
मृगाङ्गनाभिर्हरिणाङ्गनामिव ।
मदावलस्त्रीभिरिवेक्षुकन्दलीं
महोरगीभिर्मलयस्थलीमिव ।। २९

यथा ब (व?) राङ्गीं निशि यूकजातिभिः
यथा पिशाचावलिभिर्निशि स्थलीम् ।
यथा धरित्रीं मकरालयोर्मिभि -
र्यथा त्रयीं सौगततन्त्रयुक्तिभिः ।। ३०

तव प्रियस्ताडयिता नु ताटकां
खरान्तकः किं त्रिशिरान्तको यथा ।
ललास यो रावणजामिदर्शनाद्
विलासभासोऽपि गतः कुतः सखे ! ।। ३१

स्वयं कृतं स्वर्णमृगेऽपि वाञ्छितं
त्वया पुरात्तवस्य फलं सुखायते ।
मतं न लङ्घस्वमनस्विनः प्रभो-
प्रतर्जयन्तीभिरति प्रतिक्षणम् ।। ३२

ललाटपर्यस्तकडारकैशिक -
च्छटापिरापाटलादृष्टदृष्टिभिः ।
क्षपाचरीभिः क्षयकालकालिका -
करालदेहच्छविभिः समावृतम् ।। ३३

प्ररोदनेनाच्छविलोचनाञ्चल -
प्रणालिकाप्रक्षरदश्रुनिर्झराम् ।
निरायतश्वासनिपातितोष्मणा
नितान्ततान्ताधरचूतपल्लवाम् ।। ३४

विलीयमानामिव बाष्पधारया
विकृष्यमाणां श्वसितैरिवायतैः ।
प्रबद्ध्यमानामिव कान्तचिन्तया
प्रबोध्यमानामिव सत्त्वसम्पदा ।। ३५

प्रभावमुद्भाव्य जगत्त्रयोत्तरं
प्रियस्य नातिच्युतधैर्यबन्धनम् ।
सुमेरुसानौ सुलभेऽपि मारुतेः
सुवर्णवल्लीमिव नातिकम्पिनीम् ।। ३६

उदश्रुधारामुचितेन वाससा
निरूढकार्त्स्न्ये निचोलितस्तनीम् ।
सहस्य सिन्धुं स तुषारदुर्दिनां
सपङ्कपङ्केरुहकुड्मलामिव ।। ३७

आरण्यचारादघशंसिनीं प्रभो -
रजस्रमाशंसितमङ्गलोदयाम् ।
निरञ्जनान्यस्तदरस्मिताङ्कुरा-
मुपोषितां भूशयनव्रतोन्मुखीम् ।। ३८

अदत्तयद्दत्तगुरोः परिग्रह -
स्तमङ्गभारं न विलङ्घितं क्षमाम् ।
सतीपताका इव शाश्वतिर्यदी-
शिखामणोः शीफरमुच्छतामणेः ।। ३९

तनिम्नितन्वा धवलिम्नि गण्डयो -
र्जडिम्नि पाण्डोररुणिम्नि चक्षुषो ।
प्रथिम्नि बाष्पस्य पटिम्नि दुर्विधो -
दृढिम्नि सत्वस्य च दर्शितस्थितिम् ।। ४०

विलापहस्तैर्विविधैः कृतानने
प्रजागरान्ते परितापमूर्ध्नि ।
कृशत्वकण्ठे कृपणत्वपार्श्वयो-
र्विषादकुक्षाविहिताधिरोहणाम् ।। ४१

वसुन्धरामन्तरहेतवे प्रसूं -
प्रचोदयन्तीमिव पाणिलेखनात् ।
अपास्तरत्नाभरणोपशोभिनीं
प्रसूनशून्यां नववल्लिकामिव ।। ४२

अतन्त्रिकामत्यनवद्धतन्त्रिका-
ममुक्तजाड्यामपि तापशालिनीम् ।
अभूषितामप्यखिलाङ्गभूषितां
विरामकामामपि रामरागिणीम् ।। ४३

शुचा महिम्ना शुचिनाप्यधिष्ठितां
कवेः कृतिं त्यक्तकथाक्रमामिव ।
सहोपसर्गामिव योगसाधनां
सभेदभावामिव सत्त्वसंविदम् ।। ४४

वशीकृतां चेटिकयेव चिन्तया
वयस्ययेव व्यथयावलम्बिताम् ।
महुर्धृतां धात्रिकयेव मूर्च्छया
प्रबोधितां भूतिकयेव संज्ञया ।। ४५

गुणैरमीभिः प्रगुणै रधूद्वहः
प्रणीतसंवाहिभिरेव पावनैः ।
इमां विनिश्चित्य रधूत्यहाङ्गनां
तदा मुदा चापलमाचरन्न किम् ।। ४६

स वृक्षमारुक्षदपप्त भूतले
तनूमकण्डूयत पर्यभिण्डत ।
चचार चर्यां विचकार भूरज-
श्चचर्व पाणिं चरणौ न्यकुञ्चयत् ।। ४७

जगौ जहास न्यमिषत् तथामिषत्
दधावदध्यौ दुधुवे द्रुमानपि ।
उदैक्षत भ्रूयुगलीमुदक्षिप-
ल्लुलोढ लाङ्गूलमलीढ पुप्लुवे ।। ४८

क्षणे च तस्मिन् क्षणदाचरेश्वरो
मदेन मानेन मनोभवेन च ।
अधिष्ठितो मोह इवात्मसंविदं
वशीचिकीर्षुर्वदति स्म मैथिलीम् ।। ४९

निगूह्य तं भीरु ! निगृह्यसे बला
स्वयं न यावत् सुतरां प्रसीदसि ।
तपन्तु तावन्मम मान्मथात्मनः
शशाङ्कशाणोपलशातिताः शराः ।। ५०

न तेऽनुरूपो नृपशुर्जटाधरः
कृपाऽधुनाऽसौ कुटिलाक्षि ! लभ्यते ।
स चेन्न सद्यो विरहेण साद्यते
तवाऽथ वामे शशिनासिहेन ।। ५१

अतीतमाभोगिपयोधरोदयं
पयः पयः सिन्धुपयश्च नेष्यते ।
विधेहि रामे विकचाम्बुज्जेक्षणे
विलाससलीलासु सलालसं मनः ।। ५२

अदेहतापं हरदेहतोऽद्य मे
विदेहराजाय विदेहनन्दने ।
प्रसूनसामान्यमसौ प्रयोज्यते
भुजस्तव स्वस्तिकताः समेष्यति ।। ५३

तव प्रसूः सर्वजनीनभोगदा -
सतीव्रतं तीव्रमिदं तु किं तव ।
दशास्य देवीपदमेत्य किं पुनः
दिशस्व राज्यानि दिवौकसामपि ।। ५४

सुकण्ठि कुण्ठीकृत माधवायुधं
विखण्डिताखण्डलदन्तिदंष्ट्रिकम् ।
भुजान्तरं भूषय भूभृतो यथा
तटान्तरं कल्पलता तथा मे ।। ५५

ममन्थ यः सुन्दपुरन्ध्रिमन्तरे
　　ददर्प यः शूर्पणखा मुखापदा ।
तदङ्गनेत्यङ्गगतं किमत्र ते
　　न मानिनां स्त्रीषु ममाननाग्रहः ।। ५६

स्वकन्धरायां भुजबन्धनात् तव
　　प्रमोममुन्मादसमं प्रपेदिवान् ।
विमोक्ष्यसे राक्षसराण्मृगेक्षणे
　　सुपर्वगन्धर्वफणीन्द्रचन्द्रिका ।। ५७

कदा मदङ्गे करताडनत्रुट -
　　त्कपालदिक्पालभयापवर्जिताः ।
निशम्य संस्पृश्य निशाम्य सम्पदो
　　निशाम्य चाघ्राय सुखानि निर्विशेः ।। ५८

वदन्तमेवं विकृतं तमन्तरे
　　तृणं निधायाह नरेन्द्रनन्दिनी ।
निगृह्य बाष्पं निबिडं शनैः शनैः
　　प्रगृह्य गाढं पतिमेव चेतसि ।। ५९

पुलस्त्यवंशाभरणस्य कीदृशी
　　पुरन्दरादिप्रणतस्य ते मतिः ।
अभङ्गुराणामनुभावसम्पदां
　　प्रणाशहेतुः परदारकाङ्क्षिता ।। ६०

अयं धनाशामयमायया जनो
　　वनोचितः संवननोचितो न ते ।
महाम्बुधेर्मध्यगतापि बान्धवी
　　क्षमा शिखा मित्रयितुं न पाथसः ।। ६१

पराङ्मुखी चाह पलाशिराज! ते
　　न राजते चासितपद्धतौ रुचिः ।
निशामयन्त्येव हि नित्यमात्मवत्
　　सुखं परेषामसुखं च सूरयः ।। ६२

विगृह्यमाणो विविधात्मना जनै -
र्विपत्स्यसे वन्धुजनैर्धनैः सह ।
ततः प्रहृष्यन्ति तवापदापरे
मदङ्गजस्कन्धतटं गता इव ।। ६३

यतीभवन् राघवयोरदर्शने
प्रगृह्य मां चोर इव द्युवर्त्मनि ।
न नीतवानस्यभिनन्दनोचिता
क्व ते कथा क्षोभकृतो नभस्सदाम् ।। ६४

तदद्य मा मुञ्च विधेहि सौहृदं
रघुप्रवीरे रमणीयमन्यथा ।
निदाघदावाग्निशिखा इवाटवीं
विशन्तु लङ्कां रघुवीरसायकाः ।। ६५

दलन्तु जिह्वा इति ते वदन्ति
त्रुटेन्तु कण्ठास्त्वरितं तदाश्रयाः ।
नियत्यपेक्षापि हि मे तवापदि
प्रियानुमत्या प्रभुता गरीयसी ।। ६६

अलीकम (स्कर्य) पराङ्गनाहृतौ -
द्युभीरुवन्दीकरणे दुराशयः ।
प्रतापिना पङ्क्तिरथात्मजन्मना
न दण्डितो मूढ न दण्ड्यसे क्वचित् ।। ६७

तयैव मुक्तः कुपितो............
विघूर्णयन् रक्तविपाटला दृशः ।
प्रतर्ज्यतां रात्रिचरीः प्रयुज्य तत्
प्रलोभनार्थं भवनं न्यवर्तत ।। ६८

तथेति ताभिर्निरभर्त्स जानकी
ययौ यथाऽशोकवनी सशोकताम् ।
निरङ्कुशास्ता त्रिजटा न्यवेदय -
च्छुभेतरं स्वप्नका प्रसञ्जनात् ।। ६९

परीक्ष्य सुप्तिं च परीक्ष्य जीवितं
पटाञ्चलोद्बन्धनतः सिसृक्षतीम् ।
तरुङ्गतान्यं शकुनैः प्रसन्नता
मदक्षिणाक्षिस्फुरणादिभिर्ययौ ।। ७०

स्वदर्शनात् त्रासजुषः सचक्षुषः
प्रधावनी रात्रिचरीप्रबोधनम् ।
स्वनिग्रहं स्वामिनिदेशसंशयं
विचार्यकार्यं स विनिश्चतोऽभवत् ।। ७१

जगौ कथां पङ्क्तिरथादि जानकी
निशामनान्तं निभृतं कपिस्ततः ।
विमूर्च्छितां स्वप्नमतिं विशोधनीं
प्रसाद्य तां प्रत्ययितो बभूव सः ।। ७२

अथाऽङ्गुलीयं हरिणा समर्पितं
दृशा पिबन्ती दयिताऽस्य जानकी ।
कराम्बुजाभ्यां कठिनस्तनान्तरे
निमज्जतः पोतमिव न्यवेशयत् ।। ७३

कराङ्गुलीनां श्रमवारिणा नख -
प्रभाप्रसूनैः प्रणयामृतार्पणात् ।
उपासितामेवमुवाच जानकी
प्रियोर्मिकां प्रीतिभरादिवोन्मदा ।। ७४

अहं त्वमप्यर्णवनेमिसम्भवे
ककुत्स्थवीरस्य करग्रहोचिते ।
त्वमूर्मिके सम्प्रति दुःखितेति मां
स्वयं समेतासि सुखानपेक्षिणी ।। ७५

प्रियस्य रत्नप्रभया निशातमो
निरस्य नीवीहरणान्तरेषु माम् ।
प्रकाश्य शश्वत् प्रतिलोमतां गता -
प्यहो भवस्यापदि बन्धुरद्य मे ।। ७६

क्व कर्णिकाकुण्डलकङ्कणान्वयः
क्व हारकेयूरपदाङ्गदग्रहः ।
त्वमेव हि स्वाम्यनुसारिणी वने
प्रसाधयत्यग्रकरे प्रियस्य मे ।। ७७

वपूंषि सन्ध्यावदने व्यभाव्यत
..............................।
नवातपः पादतले मणिप्रभा -
तवाऽभवद्धातुरजः पयोधरे ।। ७८

नितम्बवक्षोजनिपीडनक्रमो-
त्पथि स्खलन्तीमवलम्ब्य यः प्रभोः ।
उपाचरत् पल्लववीजनेन मां
स एव ते सव्यकरः समाश्रयः ।। ७९

मया वनान्ते कुहनो मृगोत्कया
प्रवासितः पङ्क्तिरथात्मजः परम् ।
प्रगृह्य हस्ताङ्गुलि पल्लवं पुनः
त्वयनुयातः सुलभानुरागया ।। ८०

दिने दिने दाशरथेर्मया विना
विमृश्य कार्यव्यतिषङ्गिणीं दशाम् ।
तनीयसी मुक्तवती तदङ्गुलिं
समागता कारयितुं सखीव माम् ।। ८१

प्रविष्टवह्निः परिमन्थती तमः
प्रसादमुल्लेखनतः प्रसेदुषी ।
कुलप्रभोर्मूर्तिरिव त्वमूर्मिके
प्रबोधयस्याशयपङ्कजं मम ।। ८२

अलङ्क्रियाणां प्रथमा त्वमूर्मिके
तथाऽयुघानां तृणता चमत्कृता ।
यदाश्रिते कुण्डलिताकृती उभे
रघुप्रवीरस्य करं निरन्तरम् ।। ८३

करोमि किं मूर्ध्नि करोमि किं दृशो
करोमि किं गण्डतले गले तथा ।
करोमि किं त्वां हृदये करोमि किं
करोमि किं वा सकलाङ्गकेष्वपि ।। ८४

निवेश्यमानः क्षवणे प्रियेण मे
करेण कान्त्या कबलीकृतस्तव ।
अलम्भयच्चम्पकपुष्पकल्पता-
विडम्बनं बालमृणालपल्लवः ।। ८५

त्वमूर्मिक! शोकतटोपघातिनी
प्रियार्णवप्रेमरसोर्मिकाऽसि मे ।
प्रपद्य मामद्य पयोधरस्थले
प्रवर्त्यते यत्पुलकाङ्गुरस्त्वया ।। ८६

निशाटनेत्रा दिवि नीयमानया
मयापविद्धैर्मणिभूषणैर्न किम् ।
वने वने मे वरवर्णिनीह मे
दिशामवाचीं प्रति दर्शिता गतिः ।। ८७

मयोत्तरीयं च महीरुहां चले
निपातितं निर्मलकाञ्चनान्वितम् ।
व्यपावृणोत् किं तव रावणग्रहा -
दुरन्तिमुत्क्रान्तिसमं ममोर्मिके ।। ८८

इवावतंसाब्जरजः किलेति मे
प्रयुज्य मिथ्याप्रचलेन पाणिना ।
कपोलमीर्ष्याकलहेऽपि प्रस्पृशेत्
स राजपुत्रो भवतीह साक्षिणी ।। ८९

यथा त्वमावेष्ट्य दृढं कराङ्गुली-
मभीक्ष्णमिक्ष्वाकुपतिं वपुष्यपि ।
अभूषणाभां त्रपयेति मध्यमां
कनिष्ठिकां वीक्ष्य नतां च पार्श्वयोः ।। ९०

न जातु नेतुर्गणनेव यान्तिमत्
सतां पवित्रं त्वमनामिकां श्रिता ।
गुणोन्ननत्वादपि मानतोऽर्थतो
मनस्विनां या गणने ननाम ना ।। ९१

प्रसाधयन्ती सखि! तामनामिकां
प्रकाशसे स्वाम्यनुरागसम्पदा ।
सुवर्तुलं सुषिरं हृदन्तरे
प्रचक्षते प्राणपदं शरीरिणाम् ।। ९२

तटित्प्रभावद्धृतयं प्रतीर्यते
ननु स्वरूपं तव नाथ! दर्शितम् ।
गभीरवृत्तौ रघुवीरसागरे
प्रवृत्तमर्कं ... नवन्तु केचन ।। ९३

वपुस्तवाऽहं व्यसनोष्मवारिणा
वदाम्यदण्डं कनकोष्णवारणम् ।
प्रियस्य हस्तोद्यतया तवादधे
मणित्विषा दक्षिणवामधन्विना ।। ९४

खरादिवीरप्रवरासु पारणा
पराहिराजस्य गरानलभ्रमः ।
बहिः स्फुरत्काञ्चनदीधितिच्छटा-
तदन्तरुद्यन्मणिरश्मिकेसराम् ।। ९५

त्वदाकृतिं शोकभरां श्रियस्थितां
विवर्णये स्वर्णसरोजकन्यकाम् ।
अनुप्रविश्यानलमाहरन्त्यपः
शुचिप्रकाशां हृदयं स्वमेयुषी ।। ९६

परीत्य लोकेश्वरमङ्गुलौ चिरं
तपोचरस्तापशमाय किं मम ।
नितान्तसन्तापहरं ममान्तरेऽ-
प्यमन्दमानन्दभरं विवृण्वती ।। ९७

स्वयंप्रकाशस्य सुधाभिवर्षिणः
परस्य पुंसः प्रतिपद्यसे तुलाम् ।
वनान्त...वलयान्तरे प्रभो -
र्नियन्तृयन्त्रो निबिडं निशातमः ।। ९८

महौघमाणिक्करुचान्तरोच्चयाः
प्रदीपतामोषधिभिः प्रपेदिरे ।
विराधविध्वंसविधेरनन्तरं
प्रलम्बहस्ताङ्गुलिपादिनी प्रभोः ।। ९९

रटन्तमुत्सारयितुं समञ्जसा
वने क्षिपन्ती.......मणिलागणम् ।
श्लथा.....काहं भवतास्मि लक्षिता
विलक्षिताहं विहगं न वेत्सि किम् ।। १००

इति प्रियस्येरितलाञ्छनक्रमा -
प्रगृह्य चूडामणिमात्मनस्ततः ।
प्रसारिते पाणितले हनूमतः
प्रभोरभिज्ञानपदं दिदेश सा ।। १०१

पङ्क्तिग्रीवदुराग्रहं निशिचरी निर्भर्त्सनाद्यात्मनः
प्राणानामपि मासमात्रभरणं दुःखार्णवोद्धारणम् ।
लङ्कासंहरणक्रमं रघुपतेर्निर्विध्नतोऽप्यागमं
तस्याप्याशिषमाह सा प्ररुदितेऽप्यालक्ष्य लक्ष्मीं मुखैः ।। १०२

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयनिधेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदये त्रयोदशतया सर्गोऽगमत् पूरणम् ।। १०३

इति रामाभ्युदये त्रयोदशः सर्गः ।।

चतुर्दशः सर्गः

अथ श्रियं दधदनया विसर्जितो
बलद्विषां मतिमपि वेत्तुमुत्सुकः ।
न पिण्डिकावनपरिखण्डनं व्यधात्
समुण्डनं खलु दशकण्ठसम्पदः ।। १

विविर्तितप्रसवविभूषणाऽमुना
परिक्षता नखदशनैरलक्ष्यत ।
विपत्त्रकाविवशपतल्लताभुजा -
वधूस्थलीरतिमृदिता वधूरिव ।। २

विजध्विरे विचकृषिरे विघूर्णयां
बभूविरे विचकरिरे व्युदासिरे।
बभञ्जिरे विममृदिरे विचूर्णयां
वभूविरे पवनभुवा वनद्रुमाः ।। ३

वचः क्रमं जनकजया तदाश्रितां
विना क्रमं क्रममपि शिंशपां कवेः ।
निशामितस्वजनमुखाद् दशाननो
न्ययुङ्क्त तन्नियमकृते स्वकिङ्करान् ।। ४

दशाननप्रमदवने दलोद्भटे
स्थलीकृते सपदि बलीयसात्मना ।
स्वतोरणे सुलभयतिः सतोरणे
गभस्तिमानिव गिरिमस्तके स्थितः ।। ५

उदस्य तत्परिघमुदस्य वालधि -
र्वृषा गिरीनिव पविना विमथ्य तान् ।
रघूद्वहो जयतु रघूद्वहो जय -
त्विति ध्वनिं व्यतनुत सैंहमुद्धतम् ।। ६

स चैत्यमप्यदहतीत्यरवस्थलं
तदाप्यभ्रमणभुवा हविर्भुजा ।
प्रभञ्जयन्ननयत पञ्चतां सुतान्
सपञ्चये प्रघसमुखा बलाधिपाः ।। ७

धनुर्गुणप्रगुणविनिर्गुण (विनिर्गत) ज्वल-
च्छराशनिं घनमिव शारदागमः ।
स जम्बुमालिनमवलम्ब्यलीलया
प्रहस्तजं सपदि निरस्तवान् कपिः ।। ८

शिलीमुखान्यवकिरतः शितान्यथा
कुलाचलान् कुपितदशाननेरितान् ।
अमत्यजान् कपिरवपात्य सत्त्वरं
व्यवस्थितः पुनरपि वीक्ष्य तोरणे ।। ९

अपोहयन्नथ कपिमात्रभावनां
स रावणः समुदितमन्युरुच्छ्वसन् ।
कुमारके प्लवगकुतूहलाकुले
विचिक्षिपे निजदृशमक्षनामनि ।। १०

परः शतैः प्रमुदितपक्षपातिभिः
क्षतक्षतिक्षतजसमुक्षितः सताम् ।
दलद्रथं दृढमवपीड्य पादयोः
पतत्पतिः फणिनमिव प्रचिक्षिपे ।। ११

अथेन्द्रजिज्जनयितुराज्ञयापत -
न्महास्त्रवित् प्रतिमिहिरोपमे हरौ ।
प्रवीतया प्रचलितपक्ष्मपक्षया
समं दृशा समधित वृष्टिमैषवीम् ।। १२

परस्परानधिगतपौरुषान्तरौ
परस्पराभ्युपगतसाहसोद्यतौ ।
महद्रणं दशमुखमारुतात्मजौ
वितेनतुर्दिवि भुवि स्मयावहम् ।। १३

अवध्यतां प्रति पुनरस्य विस्मितो
वलारिजिद् वलयितचित्रकार्मुकः ।
अयोजयत् पुङ्गगवमस्त्रबन्धना-
न्न मोक्तु मक्षममथ वीक्ष्य तद्वरात् ।। १४

अभञ्जयन्नथाचकृषुर्व्यलोठयन्
प्रविव्यथुः प्रविजहसुः प्रचिक्षिपुः ।
प्रजहिरे प्रहरितात्मलोष्ठका -
स्तमाशराश्चणगुणबद्धमुद्धताः ।। १५

विमोचितोऽप्यथ विधिना प्रसेदुषा
निजास्त्रतः सममरिनिग्रहं पुनः ।
न चिक्षिपे दशमुखसन्दिदृक्षया
न कार्यविद् गणयति दुःखमात्मनः ।। १६

हरिद्विषा हरिरथ कैश्चिदंसयो -
परैर्गणे पदयुगले परैर्धृतः ।
स दर्शितः सदसि गुरोः प्रशंसतः
स्ववृत्तमप्यकथयदस्य निर्भयः ।। १७

ननन्द हन्त च विबुधेन्द्रकिङ्करः
कुलक्रमाद् दशमुख! कोऽपि मर्कटः ।
अवेहि मां रघुपतिदूतमात्मजं
नभस्वतस्तपनसुतस्य मन्त्रिणम् ।। १८

वधूग्रहात् समशुचिवालिनिग्रहा -
त्पदार्पणं तपनसुते रघुप्रभोः ।
विदेहजामृगणविलोकनं ततो
वनार्दनादपि तव दर्शनं मम ।। १९

पुलस्त्यभूरसि पुरतो निवेद्यते
हितं मया विसृज नरेन्द्रकन्यकाम् ।
रघुप्रभोः खरमुखरक्तपारणं
विमृश्य वा विमृदितवालिनं शरम् ।। २०

ऋणर्धिमान् लगदनलालयाश्रयो
विषान्नभुक् विषधरन्ध्रभाक् च यः ।
सदीर्घमुच्छ्वसिति न हि त्वमुच्छ्वसे
निरोधयन् निमितनयां दशानन! ।। २१

स हन्तुमित्यभिदधतोऽस्य तत्त्वरे
क्रुधा ज्वलन्निव कुणपाशनेश्वरः ।
निवर्तितस्तदनु विभीषणोक्तिभि -
र्न द्रुतसंहरणकृता नृपा इति ।। २२

विरूपतां वपुरपि वास्य यात्विति
प्रभो! गिरा तदनु निर्गला जनाः ।
अदीपयन् प्रियमनलेन वालधिं
वनौकसोऽयमिति सतैलवाससः ।। २३

न तापमावहत विदेहनन्दना
प्रभावतः प्लवगपतेर्विभावसुः ।
किमद्भुतं यदि तुहिनायतेऽनलः
पविः प्रसूनति पतिदैवताज्ञया ।। २४

नियन्त्रितः पुरमखिलां प्रचारितो
निशाचरैः सपदि नि (र?) स्तवन्धनः ।
प्रहृत्य तान् परिघधरो दिदृक्षया
सपुच्छमुच्छिखशिखिपर्यघूर्णयन् ।। २५

अजीगणन्नमरगणा हनूमतो
समुच्चलज्ज्वलनशिखाञ्चिताञ्चलम् ।
वतंसितप्रतिवनवञ्चुलस्रजं
पुरन्दरध्वजमिव पुच्छमुद्धृतम् ।। २६

मरुद्भुवो जितमदनस्य वालधि -
र्हविर्भुजस्तबकितहेतिरग्रतः ।
दिधक्षतः पुरवरमृक्षलक्ष्मणो-
र्वियत्तनोर्विशिख इव व्यभाव्यत ।। २७

परामृशत्यनिलभुवा प्रचोदितो
मरुत्सखः प्रबलमरीचिमण्डली।
प्रकम्पिनी द्रुत कनकोज्ज्वलाकृति
र्नगर्यभून्नवनवरागशालिनी ।। २८

जजृम्भिरे ध्वजपटकाननान्तरे
वितेनिरे विततवितानपालिषु ।
अवातरत् सुरतरुतोरणावली
विसृङ्खलं वलिमुखवालवह्नयः ।। २९

जलाशयान्तरमवलम्ब्य खण्डध -
न्वनावलिं कृतमणितोरणाश्रयः ।
गृहाद् गृहं सपदि गतः स रक्षसां
हरिर्बभौ हरिरिव रौद्रनिध्वनिः ।। ३०

समण्डपस्थितदृढभद्रपीठभूः
स चामरध्वजगजराजसेवितः ।
सभूषणैः सकलकलैर्जनैर्वृतो-
र्विभावसुर्नृपतिरिव व्यभाव्यत ।। ३१

सबान्धवा इव मणितोरणांशुभिः
स कार्मुका इव नवधूमसञ्चयैः ।
चटच्चटत्स्फुरितविटङ्ककोटिभि -
र्ववल्गिरे सहहसिता इवाग्नयः ।। ३२

क्षपाचरालयलयकालजृम्भित -
स्तनूनपात्तरलशिखाजटाधराः ।
अनृत्यदुद्धतडमरुस्वनोद्भटः
स रुद्रवत् सभसितधूलिधूसरः ।। ३३

प्रमथ्य तं नगरजनं सबान्धवः
स्तनन्धयं भयतरलीकृतेक्षणम् ।
परापतत् पुरमणितोरणाग्रतो
विभावसुर्भृगुपतनं व्या .....दिव ।। ३४

प्रतिध्वनिं विरचितहेमपट्टिका -
प्रतिद्रुमं कृतनवपल्लवश्रियः ।
प्रतिद्रुमं प्रकटितरक्तचामराः
प्रपेदिरे पवनसखस्य हेतयः ।। ३५

मरुत्सखः सह मरुदात्मनाऽमुना
पलान्धसामधिपतिना प्रचोदितः ।
समं ततः कबलयति स्म तत्पुरं
न शिष्यतां न खलु विवेकविप्रुषः ।। ३६

किमंशुकैः किमु मणिभूषणान्तरैः
क्व दारकाः क्व जननी क्व बान्धवाः ।
कपिः कपिः कपिरनलो ह हा ह हे -
त्यनुक्षणं नगरजनः प्रचुक्षुभे ।। ३७

उषर्बुधापदि चलद्रुर्धजानि ....
निशाटिकाः शिथिलनृचर्मशाटिकाः ।
उरस्थलीरुर.................तोदरा
प्रजध्नुरप्रलयितवर्षमृष्टिभिः ।। ३८

सहल्लकस्रज इव सन्ततोल्लस -
न्मदा इवार्पितघुसृणच्छटा इव ।
चमत्कृतारुणसिचयादिव क्रमात्
ललक्षिरे लगतिशुचौ पुरस्त्रियः ।। ३९

निजोष्मनिस्सह इव पादपान् व्रजन्
पिबन् पिपासित इव वापिका स्वपः ।
अवातरत् क्षुभित इवानलक्षणात्
क्षपाचरेश्वरगृहपाकशीलिताम् ।। ४०

मरुत्सखः प्रतिमधुधाम निर्भरं
प्रतिस्रुदा स्वदनमदादिवार्दितः ।
अरज्यदुज्वलदपप्तदुच्चकै -
रपप्तदद्रवदतरन्ननर्त च ।। ४१

अविग्रहं दृढमधरग्रहं नयन्
परिस्पृशन् कुचमवपातितांशुकः ।
प्रलापयन् पवनसखः समीरयन्
न भीरुतामभजत पौरभीरुषु ।। ४२

पराङ्गनापहरणपातकं प्रभो -
र्दुरात्मनः परिणमतेऽनलात्मना ।
कपिः किमागत इह काल इत्यसौ
विवेकवागजनि विभीषणालयात् ।। ४३

क्व मर्कटः क्व च रजनीचरप्रभोः
सुरासुरप्रकरदुरासदा पुरी ।
क्व वा तृणं क्व खलु युगान्तपावको
बतेति केचन जगदुर्निशाचराः ।। ४४

प्रमथ्य तं नगरमिति प्लवङ्गमः
प्रपद्य तां पुनरभिवाद्य जानकीम् ।
स तीर्णवान् पुनरपि तूर्णमर्णवं
पुनर्भवं पुरुष इवात्मतत्ववित् ।। ४५

अथाङ्गदप्रभृतिभिरादृत श्रुतः
प्रवृत्तिभिः पवनसुतप्रहर्षुलैः ।
समासदन्मधुवन ... र्कजन्मनः
प्रभोः प्रियं कृतमधुपानदोहलैः ।। ४६

प्रविश्य ते मधुवनपालकान् बलान्
निरस्य तद्वनमवमथ्यनिर्भयम् ।
कपित्थसम्मतमतगर्वगोष्ठिका
प्रतिष्ठया प्रजहृषिरे विचेष्टया ।। ४७

ततो युगात्ययमरुता समीरिता
वलाहका इव वलिता वलीमुखाः ।
समासदन् स किलिकिलारवं जवात्
सहानुजं सहसुहृदं रघूद्वहम् ।। ४८

कथामिति क्रमकथितां हनूमता
सुधामयीं श्रुतिचुलुकेन चूषयन् ।
शुचाकुलां शुचिचरितां सुचेतसा
स राघवः सपदि जगाम जानकीम् ।। ४९

निशामयन् निमिदुहितुस्तदर्पयन्
शिखामणिं शिथिलितधर्मबन्धनः ।
स मौक्तकैरिव तमपाङ्गशुक्तिका
प्रसृत्वरैः प्रतिजगृहे पयः कणैः ।। ५०

स सारणीमति मयि दक्षिणार्णवं
तृणादरं त्रिदशभयङ्करे पुरे ।
दशानने शलभधियं ददौ तदा
परिग्रहेऽपि च मणिहारभावनाम् ।। ५१

रघूद्वहं रघुतनयः प्रसादयन्
शुभेक्षणे प्रतिसुकृतः प्रतीतनः ।
नियोजयन् निजपृतनामहिद्विषं
वलीमुखासितवदनक्षमालिनीम् ।। ५२

हनूमता रघुपतिरंसयोर्दधे
परः पुमानधिपतिनेव पत्रिणाम् ।
अधारयत् तदवरजं सितच्छदः
शतच्छदोद्भवमिव वालिसंभवः ।। ५३

दुरात्मनः प्रतिविमतं द्विषड्गणान्
परीक्षितुं प्रवलबलायुतान्विताः ।
पुरोऽरुजत् पुरुजगणोऽस्य नील इ -
त्यनीलधीरतिमहतो बलाम्बुधेः ।। ५४

गजं पुरो गवयगवाक्षकौ नयन्
सगन्धमादनमृषभं च पार्श्वयोः ।
स्वयं बलान्तरमभजत् तथोदरे
सुषेणमृक्षपमपि वेगदर्शिनम् ।। ५५

जगर्ज दिक्तटमभिगर्जयन् गजो
मुदाकुलं कुमुदकुलं व्यजृम्भत ।
पदा मदालसमृषभो लिलेखगां
विचारितं विनमतवेगदर्शिना ।। ५६

प्रकम्पितोऽजनि पनसः सकण्टको
गवाक्षको वलदरुणाक्षमैक्षत ।
परापतत्प्रतिगगनान्तमृक्षरा -
ण्णलो ययौ प्रतिदलनन्दितोदकः ।। ५७

गतो मरुत्सख इव गन्धमादनो
जवादधावत गवयो वनाद् वनम् ।
प्रदीप्यतानिलतनयः स तेजसा
व्यमोटयन्मलमरुत्सुतः ...... ।। ५८

प्रमोटयन् वनजकुलानिहेतुवत्
प्रतापमातनुत पतङ्गनन्दनः ।
स्वकेसरानधुनुत केसरीं मुहु -
र्विवर्तिताकृतिशरभो व्यलङ्घत ।। ५९

पृथुस्तरन् प्रसवफलाभ्यशालिनः
शिवाम्भसः शिशिरसुगन्धिमारुतान् ।
स सव्यमायतलयं ययौ बलै -
र्महेन्द्रमुन्नतमधिरोहति स्म च ।। ६०

अथोन्नमच्चलदलघूर्मिताडितं
मुहूर्मुहुर्मुखरितदिक्कमारवैः ।
स दीक्षणं रघुपतिरैक्षतां नवं
समीकृतं सगरकुमारढक्कया ।। ६१

व्यथामनन्तरसुलभां तदस्त्रतो
विभाव्य सोच्छ्वसितमिवोर्मिमारुतैः ।
विमृश्यतामपि जननान्तरात्मजां
विदेहजां दशवदनोपरोधिताम् ।। ६२

फणीश्वराक्रमणभयाद् भृगुप्रभोः
परश्वथप्रभृतिभिरौर्वपीडनात् ।
मयि क्षतादिव च महीभृतो मुहुः
प्रवर्तितारवमभितः प्रघूर्णनैः ।। ६३

हयाङ्गनामुखशिखिधूमसङ्गमात्
स्वपन्मुरान्तकतनुकान्तिमेलनात् ।
विमोष्मणेव च फणिनां विसर्पतां
विलीनतां परिकलयन्तमात्मनि ।। ६४

समुज्झितास्त्वच इव सर्पमण्डलै -
र्यशश्छटा इव वरुणस्य मूर्च्छिताः ।
शशिप्रभा इव गलितापवर्जिता
वहन्तमप्यभिनवफेनमालिकाः ।। ६५

वलाहकावलि घटियन्त्रमालिका -
र्विवर्तनैर्नभसि मरुत्कृषीवलः ।
यदीरितैर्मुहुरुदपानतो यतो
जलप्लवैरवति जगत्कुडुम्बकम् ।। ६६

मुहुर्मुहुः श्वसितविवर्तितध्वनि-
र्विचूर्णितो विचलितफेनचामराः ।
करीवराकुलिततुषारपुष्कर -
स्तटस्थलीं रुजति तरङ्गशुण्डया ।। ६७

तदागमादिव कृतहर्षताण्डवोः
समुल्लसल्लहरिकरात्तकङ्कणम् ।
खगध्वनिस्तु तमुपकलप्य मारुतै -
स्तटद्रुमप्रसवशरैरवाकिरत् ।। ६८

तटस्थले विदलितशङ्खमुक्तिका -
मणिच्छटामिलितमहोर्मिशीकरे ।
पयोनिधेः फलितनवीनपादपे
न्यवेशयन्निजपृतना रघूद्वहः ।। ६९

अधिष्ठितो रघुपतिनाऽब्जचक्षुषा
समुल्लसद्बहुलहरिः समन्ततः ।
बलाम्बुधिः कलकलपूरिताम्बरो
महाम्बुधिः स च न खलु व्यशिष्यत ।। ७०

विषोत्करोद्विघटितफेनकण्ठकः
स्फुटन्मणिद्युतिलहरिस्फुटोद्भटः ।
फणीव सप्लवगसुपर्णदर्शनाद्
वलिस्थलीबलिवलितो व्यघूर्णतः ।। ७१

हरिव्रजे गतवति तत्र दक्षिणं
पयोनिधिं प्रदलितगौरिकारुणे ।
समासदच्चमरतरङ्गिणीपतिं
हरिव्रजः पुनरतुषारतेजसः ।। ७२

अवातरन्नवसितसान्ध्यतेजस -
स्तमश्च्छटास्तरुणतमालकोमला ।
प्रभोः प्रियाविरहहुताशनादिव
ज्वलिष्यतः प्रतिवनधूमराजयः ।। ७३

अथोदयारुणिममिषेण बान्धवं
वहन् विषं भरणमिषाच्च सोदरम् ।
हृतं तमो हृदि निदधद् वियोगिना -
मुदन्वतः सरसहृदुत्थितः शशी ।। ७४

स्वलम्बनाश्रयसुरवर्त्मपूरण -
प्रतिज्ञया किमु पयसां निधिस्तदा ।
उदक्षिपल्लहरिसमूहमुच्चकै -
र्दिदृक्षया दशरथजन्मनोऽथवा ।। ७५

विदेहजाचिरविरहेन्धनं वहन्
अदेहजानलमजवंशवर्धनः ।
निजान्तरे श्लथनिजधैर्यबन्धनो
युगान्तरार्णव इव गामुदाहरत् ।। ७६

सुधाकरः प्रणयसुहृज्जनो भुवः
पयोनिधिध्वजपरिपालनव्रती ।
अलङ्कृतद्रुतगतिरौपवाह्यको
विभावरीचरितविमोहनौषधम् ।। ७७

अभङ्गुरोत्कलिकमपास्य धीरतां
मनो मम भ्रमयति मन्मथः स्वयम् ।
सुधाकरस्वरजकमप्यपां निधिं
क्रियासमा किल सुहृदः प्रतीयते ।। ७८

भविष्यति स्मरपरितापशान्तये
मम ध्रुवं मलयमहीध्रमारुतः ।
विलोमतः प्रतिचलितो विदेहजां
यदि स्पृशन् पुनरपि मामुपेष्यति ।। ७९

महत्तरं किमपि जनोऽपि मन्यते
यदेक भूतलवसति प्रियाजनः ।
इदं मे न भवति येन जानकी
प्रवेशिता विधिनान्तरान्तरीयकम् ।। ८०

समीकृतस्तव समुपस्थिताः किले -
त्यमीकृता तदधिरोपितां कथाम् ।
पतन्ति मा ह ह ह तरङ्गितानलाः
सुगन्धवः सुमुखि! सुचेलमारुताः ।। ८१

इत्येवमादिभिरसौ वचसां विकारै -
र्विद्रावयन्नपि शुचं शिलयाचलस्य ।
इक्ष्वाकुवंशतिलको हृदयङ्गमेषु
वेलावनेषु वसति स्म समग्रलक्ष्मीः ।। ८२

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिन
क्षोणीमीसरगण्डगुण्डयपतेः क्षमाकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदये चतुर्दशतया सर्गोऽगमत्पूरणम् ।। ८३

इति रामाभ्युदये चतुर्दशः सर्गः ।

पञ्चदशः सर्गः

दृष्ट्वाऽथ स्वपुरमधिष्ठितं दशास्यो
विक्रान्तैः कपिभिरधिष्ठिताब्धिकूलम् ।
श्रुत्वाऽथ स्वयमसमाससन्धियोगा -
च्चुक्षोभ द्विप इव वारिमध्यवर्ती ।। १

आदिष्टैः प्रकरणमायतामवाक्यैः
सोऽहंयुः स्वयमनलो यथाज्यपूरैः ।
वातूलैर्मधुभिरिवोल्बणावलेपै -
र्व्यापारैर्विकृतिमतीव नीयते स्म ।। २

आरब्ध स्वयमनयो यदा तदानीं
निर्णीतो रणरभसो हि निर्विकल्पम् ।
तत् किं ते सचिवगणैः सहाद्य तन्त्रै -
रावापैः किमिति तमाह कुम्भकर्णः ।। ३

ईदृक्षं रहसि विभीषणस्तमाह
व्यामोहं विसृज समं विदेहपुत्र्या ।
रामीयाः शरगरुडावलीर्न यावत्
लङ्काख्यां दृढ इव लेढि लेलिहानीम् ।। ४

कीशेन क्षणमिह केनचित् कुतोऽग्नि-
र्नामपि प्रशद्यामुपैति नैर्ऋतेन्द्रः ।
ईदृग्भिः प्लवगशतैरिलोपरुद्धा
पातालावधि नमते पयोधिवेला ।। ५

इत्यादि स्ववचनमीरितां सहार्दं
प्रत्याख्यद् दशवदनो यथा मदान्धः ।
सङ्क्रान्तः सपदि विभीषणस्तदानीं
विश्वस्तः शरणमगात् ककुत्स्थवीरम् ।। ६

ऐश्वर्यं समभिरतः क्षपाचराणा -
मैक्ष्वाकः स्वयमभिषेकपूर्वमस्मै ।
प्रस्तौति स्वयमभियार्थिनः प्रसा -
................र्यं वीरभावः ।। ७

आस्तीर्य स्वयमथ कन्दलैः कुशाना -
मायामावधिमुपधाय बाहुदण्डम् ।
प्रस्थातुं सलिलभरात् प्रभुस्त्रिरात्रं
संप्रार्थ्य प्रतिशयितः समुद्रराजम् ।। ८

कैलास..................... निषण्णं
काकुत्स्थं न गणयति स्म सिन्धुराजः ।
निद्राणे निजहृदयस्थिते फणीन्द्रे
व्यस्मार्षीत् स पुनरमुं युगान्तबन्धुम् ।। ९

उत्थायोषसि शयनादुदात्तकोपः
सा .... मापयिष्यन् ।
काकुत्स्थः स्फुरधरस्मितः कनिष्ठं
कल्पान्तज्वलन इव ज्वलं जगाद ।। १०

पश्येमामहह जलात्मनः प्रकृत्या
वाराशेः शरणगतोऽपि मय्यवस्थाम् ।
नित्यं यश्चरति नितान्तदान्तशान्तः
शालीनं कलयति तं किलैष लोकः ।। ११

तत् कर्तुं सलिलधिमाशु भस्मशेषं
निर्धातप्रतिनिधिभिर्निजैः पृषत्कैः ।
कोदण्डं कुटिलकृतान्तफालभासि
व्याघूर्णं भ्रुकुटिविशङ्कटं प्रदेहि ।। १२

आस्थद् यो वनभुवि पीतमात्तगन्धं
पाला गणमपि वालिहृत्सरोजम् ।
तृष्णार्तः पिबतु शिलीमुखो मुहूर्ता -
दुद्वेलं सरसमुदन्वदुत्पलस्य ।। १३

कामारेः खरतरकालकूटदातुः
कल्पान्ते कवलितसर्वलोकसीम्नः ।
लभ्यं यद्रिपुबलरक्षितुस्तु मन्त्रै -
रुद्दाम्नो दमनमुदस्यतः प्रयोक्ष्ये ।। १४

मद्बाणज्वलनमहेन्द्रवज्रभीति -
प्रक्रान्तोत्पतननिपातपर्ययाणाम् ।
मैनाकप्रभृति कुलं महीधराणा -
मम्बोधौ कलयतु कन्तुकायितानिम् ।। १५

निष्पक्वे पयसि निधेरपां मदस्त्रैः
शम्बूकप्रभृतिषु शल्कतां गतेषु ।
तत्क्षोदैस्तदुरुमरुद्गरुन्मरुत्समुत्थैः
कालुष्यं सुरसरितोऽकल्पयिष्ये ।। १६

व्याघूर्णन्मम विशिखाऽग्निदाहवेगात्
पातालावधि वलमानपूर्वतादिभः ।
अम्भोधिः क्षणमलक्ष्यतां समन्ता -
दायत्तः पृथुल इवायमद्वितीयः ।। १७

इत्युक्त्वा समधित राघवः सचापे
वैधात्रं वलयितहव्यवाहमस्त्रम् ।
तद्भूता तिमिरम......... यीव सर्वतो
दिग्रोधस्यौ सपदि रुरोध धूमराजिः ।। १८

कोदण्डं कुटिलयितुं पयोधिकोपात्
काकुत्स्थे करकमलान्तशिञ्जिनीके ।
सन्देहश्चरणविघट्टिताभिराभिः
सिन्धूनां सरसमभाजि शिञ्जिनीभिः ।। १९

आकृष्टप्रतिचलिताञ्जनाद्रिकूटै -
राकासु सुरसरणौ तदस्त्रधूमैः ।
आगामि व्यसनमिवाऽवलोक्य भर्तुः
स्वर्गङ्गा स्वयमगमद् विवर्णभावम् ।। २०

मूर्च्छन्तो मुकुलितरोदसो व्यराज -
न्नाराचाद् दशरथनन्दनस्य धूमाः ।
आशङ्क्यान्तिकगतमात्मनः प्रणाशं
कल्लोला इव जलनिधेः पलायमानाः ।। २१

उत्सृष्टो द्रुतमिषुरुद्यतः प्रचण्डात्
कोदण्डाद् रघुकुलनायकेन सिन्धौ ।
संहर्तुं जगदभिजृम्भितश्चकाशे
कल्पान्तानल इव कालरुद्रवक्त्रात् ।। २२

निर्धूतः सपदि निपात्य वारिराशौ
प्रावृत्य प्रतिलहरि प्रविश्य मूलम् ।
विभ्राज्यदि्धमकरि ....वहारिचक्रं
प्रक्वाथ्य भ्रमयति पावकः स्म दीप्रः ।। २३

ज्वालाभिर्ज्वलनमयस्य राघवेषो -
व्यावृत्ताः सलिलनिधेर्विसृत्वराभिः ।
मन्थानभ्रमरयवासनां विवृण्वन्
घूर्णन्तो घुमुघुमितार्णवान्तरङ्गाः ।। २४

काकुत्स्थायधदलितैः किलास्थिकूटैः
कल्लोलिन्यधिभुवि कम्बुभिर्बभूवे ।
शैवालैरजनि निबद्धपित्तभागैः
संजज्ञे रुधिरसिरालिभिः प्रवालैः ।। २५

आनाकं गिरिकुलमस्य विन्ध्यमस्त्रै -
मैनाकप्रभृति महार्णवादुदस्तात् ।
दृष्टं तद् बलवारणाभिलाषी
दस्युर्यत् प्रविशति दण्डपालधाम ।। २६

शैलानां शरणजुषां शरक्षताना -
माकीर्णस्तटकुनदीरजोभिरद्भिः ।
व्यावव्रे वपुरतिमात्रकोपवेगा -
दालब्धं सुरभपराभवप्रकर्षः ।। २७

पीत्वाम्भः परिकलिता चिरप्रकाशा -
नुत्खड्गानपरिभटानिवोत्पतिष्णून् ।
अस्त्राग्निः प्रसभमभञ्जयत् पयोदान्
संपर्कात् प्रकृतिजटैः समाप्तिहेतुः ।। २८

व्यालूनास्तदिषुभिरम्बुवारणानां
शुण्डालास्त्वरितमुदञ्चिता व्यराजन् ।
निष्कामा इव निबिडोष्मनिस्सहत्वा -
त्पातालात् पथि मरुतां फणाधरेन्द्राः ।। २९

ऐक्ष्वाकप्रभवशरानुवेधा .... -
दम्भोधेः सरभसमद्भिरुत्थिताभिः ।
आक्रामत्प्रकटितमत्सराभिरारा -
दौर्वाग्निः स्फुटमिव लज्जितो ममज्ज ।। ३०

संमूर्च्छन् मणिवलयैस्तरङ्गहस्तैः
सन्ताड्याचलकूलमण्डलं समन्तात् ।
वाहिन्यः शिथिलितशैवलालकान्ता -
व्यापन्ने प्रणयिनि पत्रिभिर्विलेपुः ।। ३१

उत्कीर्णैर्मणिभिरुदर्चिरस्त्रवेधाः
शुक्तीनां स्फुटनजुषामकाण्ड एव ।
संजज्ञे सलिलधिरुत्पतिष्णुजाल -
व्यासर्जत्पिठरकपालविभ्रमेण ।। ३२

आवद्धो हरिहयवंशवर्धनास्त्रैः
प्रत्यङ्गं प्रदहनबन्धनप्रगल्भैः ।
कल्पाग्निं परिकलयां च कामं
वाराशिः क्वनु बडवानलप्रसङ्गः ।। ३३

उत्क्षिप्योब्मलतरलपङ्ककूटमग्नां
पक्ष्मालीं कथमपि पर्वताः प्रतप्ताः ।
उत्पेतुः पुनरवपेतुरुच्छिखाग्नि -
निर्घातान् रघुपतिसायकान् निरूप्य ।। ३४

इन्द्रस्यावरज इति श्रुतः पुरा यत्
काकुत्स्थः स किल शरैः समुद्रभाजाम् ।
शैलानां सपदि लुलाव पक्षपालीं
सौभ्रात्रं भजति पुमान् भवान्तरेऽपि ।। ३५

आवर्तानथ गरुडा इव प्रविष्टा -
स्तं बाणाः सलिलनिधौ स्वपर्वतानाम् ।
व्यालानां फणमणिभिः स्ववाटिकायां
निक्षिप्तैर्व्यधुररुणाः ... फलानि ।। ३६

वैदहीरमणशरैर्महोरगाणां
क्षेपीयः क्षतवपुषां फणाकलापाः ।
उड्डीनां दिवमुपचण्डभानुबिम्बं
स्वर्भानुभ्रममुदपादयन् सुराणाम् ।। ३७

उत्कृत्ता जलकरिणां रघूद्वहास्त्रैः
उद्यासादिवमुडुराजखण्डभासः ।
देवीनां द्रुतघुसृणद्रवेषुदंष्ट्रा
व्यातेनुर्नवनखविभ्रमं कुचेषु ।। ३८

सन्तापप्रचलितशुक्तिमुक्तिमुक्ता -
सन्तोहैस्तटभुवि संभृतान्नकूटः ।
संमूर्च्छज्जलचरमांसपाकगन्धः
संजज्ञे त्रिदशमहानसं समुद्रः ।। ३९

इक्ष्वाकुप्रभवशरानलैरियत्तां
मुञ्चद्भिर्मखचलितैः समुद्रपार्श्वात् ।
आमूलाचलपदमापगा व्यशुष्यन्
प्रायेण प्रकृतिरियं पतिव्रतानाम् ।। ४०

आकाशप्रविचलिताः शरापविद्धा -
दर्णोधेरहि मयूखवंशकेतोः ।
प्रालम्बीकरणपराभिरप्सरोभिः
पाणिभ्यां प्रजगृहिरे प्रवालवल्यः ।। ४१

उद्यातास्त्वरितमुदन्वथस्तदस्त्र -
व्यापारैर्वियति विसारिशङ्कयूथम् ।
सौहार्दं प्रतिपुलिनं नभस्तटिन्या
व्यातेने द्रुहिणविमानराजहंसैः ।। ४२

चन्द्रस्योदय इव चण्डरोचिषोऽपि
प्रायेण प्रसृतविषाग्निपाटलाक्षैः ।
पाथोदधेः प्रतिजघटे भृशं दशद्भिः
प्रत्यस्त्रैरिव फणिभिस्तदस्त्रपूगः ।। ४३

रामास्त्रक्षतगिरिरेणुधातवो या -
न्यम्भोधावधिकमरञ्जयन् पयांसि ।
आलोक्याचलचलनभ्रमादमूनि
व्यालोलच्छफरभरं विलङ्घते स्म ।। ४४

उद्वेले सलिलनिधौ हुताशवेधा -
दुद्धर्णत्युपनतबुद्बुदे समन्तात् ।
प्रायेण प्रियलयमुच्छ्रियापगानां
तत्स्तम्भे मुखगतमुत्तरङ्गमम्भः ।। ४५

व्योमाम्भः कनकविमानमार्ग -
प्राप्ताभिर्हुतवहपालिकाभिराभिः ।
नेत्रेष्वपनिमेषष्वे निर्जरीणां
मैरेयग्रहणमृतेऽप्यभून्मद श्रीः ।। ४६

यच्छ्लाघ्यश्वशुरतया रथाङ्गपाणे -
र्नृत्तंसोपवनतयाप्युमासखस्य ।
आपेदे विपदमुनापि रामबाणा -
दर्पान्तं परिहरते हि देवतापि ।। ४७

आपीतामृतमयमौर्वहव्यवाहं
व्याहानि द्विजमुखरं विभक्तसोमम् ।
आरब्धासुरपशुमब्धियज्ञवाटं
क्षिप्ताशिं प्रभुरुददीपयत् क्रियान्ते ।। ४८

शैलेन्द्रैः शतमखशस्त्रघातनाद्यैः
सन्त्रातः शरणमुपस्थितः समुद्रम् ।
पक्षास्ते तृणमिव तच्छरेण दग्ध्वा
दुर्लंघः परिहरतोऽपि दुर्विधिः स्यात् ।। ४९

क्ष्वेलार्तिं भृगुजनुषः कुठारपातं
... क्षोभिप्रथमनमौर्वहव्यवाहम् ।
संवर्तानलमपि तादृशं विठोरं (?)
रर्नानां (?) निधिरसहं न रामबाणान् ।। ५०

ब्रह्मास्त्रं धनुषि च सन्दधानमेनं
सौमित्रिर्न्यरुधदलं रुषा महत्या ।
लक्ष्यं किं तव लवणार्णवस्तृणार्थं
कल्पाग्निः कति कति कञ्चुकानधीतः ।। ५१

आक्रन्दन्नभयमथ स्फुटद्भिरङ्गैः
व्याविद्धं हृदि विशिखं दधत् कथञ्चित् ।
कावेरीसुरसरितोः करावलम्बी
काकुत्स्थं शरणमगात् समुद्रराजः ।। ५२

तं व्यज्ञापयदिति स प्रणम्य दीर्घं
स्वामिन् किं स्वपरिजनः कृतस्त्वयैवम् ।
त्रायस्वेत्यज सविवेकमत्र यस्मात्
भूतेषु प्रकृतिरपामगाधभावः ।। ५३

यः साक्षात् त्रिभुवनरक्षितुस्तवापि
.... ।
स्वच्छन्दस्वपनसखोऽथवा युगान्ते
स्वामिन्! कः स्वजनपराभवाग्रहस्ते ।। ५४

कालिन्द्या व्यपनय कण्ठसूत्रशङ्कां
गङ्गायाः प्रशमगयद् गदान् विलापान् ।
कावेर्याः स्थिरयकपोलपत्रवल्लीं
विष्टम्भात् तव पदवीमपां विधास्ये ।। ५५

विष्टभ्य स्थितवति मय्यपोभिलङ्कं
पन्थानं विपुलमिह प्रबन्धयेथाः ।
ब्रह्मास्त्रं प्रतिहरसे च यद्यमोघं
मद्भागे विसृजमरौ किरातधाम्नि ।। ५६

इत्युक्ते नदपतिना विसृज्य देशे
नाराचं तमपि नराधिराजसूनुः ।
आदिक्षन्नथ स च सेतवे नगेन्द्र !
नानेतुं हरिपतिमात्मनो बलं च ।। ५७

धूकाभिर्गगनमिव द्विधा सटाभिः
कुर्वाणाः कुलगिरिभेदिसिंहनादान् ।
आक्रम्य स्थलमथ वानराः कराग्रै -
रुत्क्षिप्ताचलमशनैरुदप्लवन्त ।। ५८

संक्षे...... नमितटे प्रहर्षिणीभिः
प्रक्रान्ते प्लवगचमूपरम्पराभिः ।
उच्चेले नियतमुदन्वता गिरीणा -
मुत्क्षेपप्रसभमिवेक्षितुं तदीयम् ।। ५९

उद्यन्तः कबलितसर्वकाष्टमुच्चै
साटोपोच्चलितसटार्चिषो बहिस्ते ।
रामास्त्राग्नय इव मुक्तसागरान्ता
वैदेह्याहरणपथं दिवं दहन्तः ।। ६०

पातालान्तरगतमूलसन्निवेशा -
दुद्रिक्तातपशिखरस्फुटाकलापान् ।
उद्धर्तुं गरुडवदुद्भटान्नगौघान्
नागौघानिव पतिता वनौकसस्ते ।। ६१

तत्पतनात् तटलुठमानगण्डशैल -
स्पर्धालुद्विपपरिमर्दिताटवीकैः ।
संजज्ञे विघटितसन्धिबन्धरन्ध्रै -
क्षेपेयः प्रबलितपन्नगैर्गिरीन्द्रैः ।। ६२

उत्क्षेपोच्चलितभुजेषु तेषु गानां
निर्झर्यः प्रधवत धातुरागताम्राः ।
परिस्ताः पवनभुजोऽप्यसृक्प्रवाहा -
न्यन्त्राणि न्यपिविददुः परित्रुटन्ति ।। ६३

कुर्वत्सु प्लवगकुलेषु भूधराणां
संक्षोभं मृगपतयो गजान् विजह्रुः (हुः ?) ।
तद्दृष्टिं किल भुवि तर्णकेन जग्धे
धान्ये यः श्रवणनिकृन्तनं खरस्य ।। ६४

कन्यानामिव मदसरितां मदावलानां
पुत्राणामिव सुहृदामिव द्रुमाणाम् ।
भामिन्या इव च भुवो बभूव भूयान्
सन्देहः कपिकुलचालितेष्वगेषु ।। ६५

उत्क्षेपक्रमरभसादुपाश्रयत्सु
व्योमान्तं विवलदुपान्तकाननेषु ।
शैलेषु त्रिदशपतिश्चकाङ्क्ष भूयो
दम्भोलिं गरुदुपलम्भनाभिशङ्की ।। ६६

उद्यातं धरणिभृतां तटाटवीतो
विभ्रश्यन्महिषपदं वियत्पदव्याम् ।
पादाग्रैरपि रथवाजिनः प्रजध्नु -
र्जय्य स्यात् त्रिदशजिगीषतो विपक्षः ।। ६७

शैलानां तटनिकटात् तदुद्यतानां
पञ्चास्यैः पथि मरुता वदानुषङ्गात् ।
आपेते झटिति शिरस्सु दिग्गजाना -
मुल्लङ्घ्यः क्व नु भवितव्यताविपाकः ।। ६८

प्रच्छन्नां नभसि निरन्तरं पतद्भि-
स्तैरुर्वीतिमिरितदिङ्मुखाबभूव ।
विच्छिन्नास्तदनु विसृत्तवरातपश्री -
सन्तुष्यत्कमलवनासचक्रवाकैः ।। ६९

पर्यायाद् भुजपरिधूर्णितैः कपीन्द्रैः
पर्यन्तभ्रमितधराम्बुतैलपूरैः ।
शैलेन्द्रैः समगमि हस्ततैलचक्र -
प्रकान्तिं प्रकटितवीत्कृतप्रणामैः ।। ७०

उत्प्रेक्ष्य स्वयमुदवृद्धिमम्बुराशेः
प्रायेण प्रतिनेवसेतुबन्धविध्नम् ।
तालेन प्रकटितसन्धिबन्धमार्गात्
संपेतुर्धरणिभृतां तटात् तटिन्यः ।। ७१

तद्बाहूद्यतगिरिचक्ररुद्धबिम्बे
चण्डांशौ सपदि तदीयमूलरन्ध्रात् ।
उद्गच्छन्नुरगपतेः फणामणीनां
तत् कृत्यं भुवि तनुते स्म रश्मिपुच्छः ।। ७२

लाङ्गूलैरधिगतलेलिहानराज -
प्रागल्भ्यैर्विपिनपयोनिधौ नियम्य ।
पर्यायाद्धरिपरिषत् प्रघूर्णयन्ती -
मन्धाद्रिभ्रममकरोन्महीधराणाम् ।। ७३

अभ्युद्यद्गिरिकटकावपातिनीना -
मापूर्णात् सलिलभरेण निर्झराणाम् ।
पश्यद्भिर्नभसि शरद्धनात् पलाये
वादित्राण्यनिमिषवैणिकान् निगृह्य ।। ७४

आरोप्याचलमधिकलिकश्चिदं स -
प्राप्ये तज्झरमणियष्टिकः प्लवङ्गः ।
प्रारब्धाभिनवकराङ् गुलिप्रनृत्य -
न्नागत्य प्रसभमपातयत् पयोधौ ।। ७५

आदाय क्षितिधरमुन्नतं तदन्यः
पर्यायोद्यतपरिपातितं कराभ्याम् ।
गोलत्वं भजसि करीहलादनैषी -
दासीदेज्जलमुखमर्णवस्य यावत् ।। ७६

प्रक्षिप्ते शिखरिगणे प्लवङ्गवीरैः
सान्वन्तः प्रचलितचण्डभानुरम्ये ।
उत्तत्स्थनुमिनदुदन्वता कथंचित्
काकुत्स्थानलशरपातशोषणेन ।। ७७

तप्तानां रघुपतिसायकेन पूर्वं
सत्वानामुपरि ततः समुद्रभाजाम् ।
संपेतुः प्लवगसमीरिता महीध्रा
यत्सत्यं विपदनुबन्धिनी विपत् स्यात् ।। ७८

केनापि क्षितिभृदधोमुखं निरस्तो
दंष्ट्रालस्फुटितततटेन दारुणेन ।
आपस्तत्सरसमप्तले पयोधे ... -
र्यत्रासन् कपटवराहखेलनानि ।। ७९

क्षुण्णानां क्वचन वनौकसा सलीलं
पाथोधौ धरणिभृतां निपातनेन ।
तुङ्गानां बलिपुररत्नतोरणानां
वार्तापि क्वचिदपि वार्तितुं न सेहे ।। ८०

ये क्षिप्ता रविरथरोधिनः कपीन्द्रै -
र्वप्रान्तः परिणतदिग्गजा महीध्राः ।
तं सर्वे कपटकिटेः परं पयोधौ
पर्याप्ताः खुरपदपङ्करन्ध्रभागे ।। ८१

प्रक्षोभात् प्रथमनिपातिनो वनेभा -
दंष्ट्राभिद्रुतमददन्तिनो रुजन्तः ।
शैलेन्द्रैरनुपतितैः क्षतात् क्षणार्धात्
प्राणान्तं फलति निरागसि प्रहारः ।। ८२

अंभोधेर्मुखमधिकृत्य बन्धतो द्राग्
विज्ञानव्यसननिधौ नले नगानाम् ।
संजज्ञे समतलसेतुबन्धहेतो -
रन्योन्यं प्रहरकप्रहारभावकः ।। ८३

वारीणामधिभुवि वारणैः प्रपन्नः
पातालैः प्रकृतखणात् क्रियानिनादः ।
शैलानामुरगसमुत्पत्समूहः
पृष्ठास्थ्नि व्यलूठतकूटकच्छपस्य ।। ८४

निर्मोकैर्निपतदगान्तरच्युतानां
नागानां विचलितपट्टबन्धनस्य ।
वाराशेर्वनकरिणां मदप्रसर्पन्
रामास्त्रक्षतमुखतैलतां प्रपेदे ।। ८५

निर्यत्नन्निर्जरसाम्बुमानुषीणां
वक्षोजाद्रिषु कृतवर्णचूर्णरागैः ।
शैलानां शिखरशिरः सरोजषण्डैः
सन्ध्यंभः समकल्पतां चिरादवाप ।। ८६

प्रक्षुण्णैः प्रतिवनचन्दनप्रवालै -
धूताभिक्षतघनसारधूलिकाभिः ।
निष्पिष्टैः शशिमणिभिश्च नीरराशेः
सन्तापः शिखि विशिखोद्भवः शशाम ।। ८७

निःसङ्गेष्वपि निपतत्सु निर्झरौघे -
ष्वद्रीणां न किमपि मध्यमध्यगन्छत् ।
प्रायेण प्रभुशरसञ्जरानुबन्धा -
दापन्नस्त्रिषु मधभूरपामयासीत् ।। ८८

पत्राढ्यैः पनसकपित्थनालिकेरी -
रम्भैरावतसहकारडाडिमानाम् ।
शीर्णैस्तच्छिखरिभुवां फलैर्युयुस्ते
हैरम्बप्रमदमविघ्नसेतुहेतोः ।। ८९

आमूलाश्लथयति तद्रमाग्मपङ्क्ति-
वेलान्तं वियति करोद्धृतैः कपीनाम् ।
भूभागस्फुटमदलक्षि भूधरेन्द्रै -
र्नागानामिव फणिभिः फणाकलापाः ।। ९०

एकैको जलनिधिपूर्तये गिरीणां
पर्याप्तं पृथुलतयेति चिन्त्यमानाः ।
मग्नेऽस्मिन्नपि च चचाल वारिराशि-
र्गाम्भीर्यं न हि महतामलं गृहीतुम् ।। ९१

शैलानां परिपतनाददृश्यभावं
प्राप्तानां प्रतिविशदम्भसां गुहासु ।
आघूर्णन्ननिलरयादपां निधाने
गम्भीरो गहनमगाहत प्रणादः ।। ९२

व्योमाग्रस्थितिभिरनुक्रमात् कपीनां
विक्षिप्ता व्रजति गुणा भुजप्रकाण्डात् ।
अद्रीणां परिषदवाप सिन्धुबन्धो -
रन्तरघ.......... यः ... न्त्रबन्धलीलाम् ।। ९३

आसिच्याम्बुभिरनुबध्यमानसेतो -
र्निक्षिप्तः सलिलनिधेर्मुखे नलेन ।
अन्योन्यं दृढमघटन्तभूधरेन्द्रा
विश्लेषं न विषहते किलाद्रिभावः ।। ९४

एकैकं घटितगिरौ नले तथा सा-
वुद्वेलं पतिरुदवर्ततापगानाम् ।
संक्रान्तं भवति यथा दिगङ्गनाभ्यो
मालिन्यं निशिचरवामलोचनानाम् ।। ९५

प्रारब्धे सरभसमुत्तरत्र तीरा -
नैपुण्यात् किमपि नलस्य सेतुबन्धे ।
आवेगादुदधिरधावदासुवेलं
वृत्तान्तं तमिव दशाननाय वक्तुम् ।। ९६

आविद्धः प्रथममगैः प्रधाव्य दूरा -
दाक्रोशात् पुनरुदधिं निवर्तते स्म ।
सन्त्रातुं निजमिव सङ्क्रमप्रवृत्या
संविद्धोच्चलितमुखं वियत्कुटुम्बम् ।। ९७

क्रोधोत्थापितजलकुञ्जरेण दंष्ट्रा -
विच्छिन्ना विकटतरा वनेभहस्ताः ।
उत्पक्षक्षितिधरचक्षिराडुपान्त -
प्रक्षिप्ताः फणिन इवाबभुर्महान्तः ।। ९८

आमूलाच्चलदलितेषु पर्वतैस्तै -
र्दीर्घेषु द्विपदशनेषु सन्तरत्सु ।
न व्यूढा जलनिधिनीलपालिकायां
पौलस्त्यप्रलयमुखाङ्कुरार्पणश्रीः ।। ९९

उत्खातद्रुमशिलसीम्नि गोकरीषि -
ण्युद्दामप्रथमवराहपोतदृष्टे ।
प्रत्येकं निखनितुमब्धिजाङ्गले तैः
प्रक्षिप्ता गिरिकलमप्ररोहबन्धाः ।। १००

विस्रस्तं विपुलतरेषु वारिराशे -
रावर्तेष्वनिलभुजागमक्षतानाम् ।
आघूर्णत्फणमणिजातमन्वकार्षी -
च्चण्डांशुर्नमदधिरूढशाणयन्त्रम् ।। १०१

चित्रं किं रघुतिलकेन दत्तदण्डे
ग्रावाणः किमपितदप्लवन्तसिन्धौ ।
यत्तस्य प्रशमयति वर्त्म वेश्म -
न्यश्मानि प्रथममृषेरनग्निमत्ताम् ।। १०२

कापेयं स्वमपि कथावशेषयन्तः
कैङ्कर्यं कति कपयः कुर्वते स्म ।
पाषाणैर्यदि पुप्लुवे पयोधा -
वुपतापिशितभुजामितोऽपि कोऽन्यः ।। १०३

श्रृङ्गारं शिरसि मनःशिलाभिरम्भः
शुण्डालाः श्रुतिशिखरेषु शैलपातात् ।
लाङ्गूलं चमरगणस्य लब्धवन्तः
संक्षोभोऽप्युपकृतये वनेचराणाम् ।। १०४

उत्प्लुत्याचलपतनादुदन्वदम्भ -
स्याकाशात् पतितदन्तरानुविद्धम् ।
जम्बालं जलदकदम्बमस्य शङ्के
चण्डांशुर्मणिमपि शैवलांस्तदश्वान् ।। १०५

यावन्तं प्रसरमवाङ्मुखः प्रपेदे
सिन्धूनां कमितरि तत्र सेतुबन्धः ।
उच्छेत्तुं दशमुखमुत्तराभिमुख्यात्
तावन्तं किल लभते स्म कालदण्डः ।। १०६

अध्यर्धं हरिणधरावरोधनाना -
मुद्यद्भिर्वरुणगृहोर्मिभिस्तदानीम् ।
व्याघातेऽप्युपनमिते विमानकोटी -
घण्टानां घणघणनिध्वनिर्न जज्ञे ।। १०७

प्रौढेन प्लवगवरेण सेतुवबन्धे
पातोधेर सलिलं प्रवर्तमाने ।
लङ्कायामभिलषति स्म मोक्तुमाप्तैः
स्वात्मानं किलसुरबन्दिवेणिबन्धः ।। १०८

अर्धान्तं हरितिलकेन सङ्गमोऽसौ
पाथोधौ परिददृशे प्रवेश्यमानः ।
पाठीनग्रहणकृते कुवेणिदण्डः
प्रक्षिप्तः पयसि पटीरभूभृतेव ।। १०९

सन्नद्धः सलिलधिलासिकेन सेतुः
पार्श्वेन प्रतिचलितैस्तरङ्गहस्तैः ।
इक्ष्वाकुप्रभवयशः प्रधोष्य दूरात्
साटोपं पटह इव प्रताड्यते स्म ।। ११०

इत्येवं सरभसमासुवेलमूलं
नीरन्ध्रं कपिपतिना न्यबन्धि सेतुः ।
क्षेपीयः किलिकिलिनिध्वनिं वितेने
कापेयप्रमदकरम्बिताः प्लवङ्गाः ।। १११

स तेन रघुनन्दनः पवनन्दनस्कन्धभा-
गुपर्युपरि रुद्धदिग्गगनमुच्चलद्भिर्घनैः ।
विलङ्घ्य वरुणालयं विजयहेतुना सेतुना
सुवेलमवलोकयन् सुलभहर्षलक्ष्मीरभूत् ।। ११२

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयपतेः क्ष्माकण्ठकोत्खाण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र पञ्चदशतां सर्गोऽगमत् पूरणम् ।। ११३

इति रामाभ्युदये पञ्चदशः सर्गः ।

षोडशः सर्गः

अथार्णवाभ्यर्णगतं सुवेल-
मधिश्रयन् दाशारथिर्ददर्श ।
आशान्तविश्रान्तविशालसानु-
माकाशकूलङ्कषतुङ्गश्रृङ्गम् ।। १

मनः शिलास्थासकमण्डनेषु
तुरङ्गमाणां तुहिनेतरांशोः।
दधानमङ्गेषु दिगङ्गनानां
नखक्षतानीव खुरक्षतानि ।। २

दिशः प्रदिप्तैर्दिननाथकान्तै-
र्दिवा हि तप्तादययेव दृष्ट्या ।
निर्वापयन्तं निजचन्द्रकान्त
निष्यन्दिभिर्गिरिनिर्झरीभिः ।। ३

मानापनोदेन मनस्विनीना-
माराधितेनापि दशाननेन ।
वन्दीकृतानीव तटान्तरेषु
विभ्राणमिन्दोरवरोधनानि ।। ४

अभ्राणि शुभ्राण्यनुरञ्जितानि
धातुद्रवैः सानुषु धारयन्तम् ।
आलभ्य रक्षोभिरिवार्जुनीनां
चर्माणि मुक्तानि सशोणितानि ।। ५

चक्षुः पदप्रापितचन्द्रहंसं
सरित्पतौ संश्रितशङ्खचक्रम् ।
शरत्पयोदाधिगता पराङ्गं
मुकुन्दमुद्यन्तमिवाऽहितल्पात् ।। ६

सा तु स्थली लोहितकच्छलेन
नेतुः प्रतापानुविधापराधात् ।
सन्ध्यापुरन्ध्र्या सममेव बन्धात्
सन्धारयन्तं धरणेः कुमारान् ।। ७

निर्भेदितानां मृगगार्भिणीनां
निर्वर्त्य यत्तासवपानगोष्ठीम् ।
बलाभिमानात्तशिलाभिघात
वक्षांसि रक्षांसि वने वहन्तम् ।। ८

प्रभावमद्भिः स्फटिकोपलानां
दरीमुखैर्दिग्गजघोषगर्भैः ।
शाखामृगैः केवलमात्तगन्धान्
शैलानिवालोक्य कृताट्टहासम् ।। ९

(अत्र शास्त्रिकृष्णभट्टश्लोकाः ?)

पद्मालयाधिष्ठितमिन्द्रनील-
रत्नांशुभिः श्यामलमात्तसत्त्वम् ।
हेमस्थलीभासितमध्यभागं
साक्षादिव व्याप्तदिशं मुकुन्दम् ।। १०

मृगोद्वहन्नागगतैः परीतः
चन्द्रोल्लसत्पुष्कररम्यकेशम् ।
शैलेन्द्रसंजातशिवाश्रिताङ्गं
साक्षादिवेशं श्रितनीलकण्ठम् ।। ११

नानामणिद्योतितमुग्रखड्गं
सचामरं संश्रितराजहंसम् ।
पाटीरकस्तूरिमृगात्तगन्धं
साक्षादिव क्ष्माधरमेव भूपम् ।। १२

नानागुहास्यं तरुषण्डबाहुं
हरिद्विडोत्पत्तिसमाश्रिताक्षम् ।
समाश्रितं पुण्यजनैरनेकैः
रत्नाढ्यमूर्धानमिवाशरेन्द्रम् ।। १३

गजर्क्षवाजी शरभादिघोर-
मुच्चैः शिरस्कं दृढमप्रकम्प्यम् ।
वंशोज्ज्वलत्सागरकेतुभूतं
व्यवस्थितं राममिव द्वितीयम् ।। १४

उज्जृम्भितश्वापदघोषमुच्चैः
सबाष्पमभ्युच्छ्रितसालहस्तम् ।
रुदन्तमुत्प्रेक्ष्यकुलान्तिकस्थं
कुलावसानं कुणपाशनानाम् ।। १५

प्रवाहिनीभिः परितस्तटानि
प्रवध्यमानानिवमापगाभिः ।
निमज्जनायेव निशाचराणा-
मनर्थहेतोरचिरेण सेतोः ।। १६

अनेकमूर्धानमधोमुखास्य-
मात्मानमम्भोनिधिलभ्यबिम्बम् ।
विलोकयन्तं व्यपदिश्य साक्षा-
द्दशां भवित्रीं दशकन्धरस्य ।। १७

अदृश्यमूलं हरिपोत्रिणापि
हंसेन केनापि विभाविताग्रम् ।
अन्तः पयोधेररुणांशुराशि -
र्ज्योतिर्मयं स्थाणुमिव ज्वलन्तम् ।। १८

माध्वीभिरोष्टप्रतिसीत्कृतेन
प्रौढाङ्कपाल्या मदनोत्सवेन ।
या क्रीयया दुर्दिनतो विमान्यै -
र्नेतुर्वधूनामृषिभिर्निषेव्यम् ।। १९

अम्भोधिचक्रान्तरशेषभावि -
कल्पोचितानां कमलासनेन ।
राशीकृतं रत्नमयं महीना -
मुच्चैरुपादानमिवोपलक्ष्यम् ।। २०

समुद्यतं चन्द्रमणिस्थलीना -
मेकोदकीकृत्य रसं निशासु ।
उद्वीक्ष्य तारासखमोषधीशं
यत्र ज्वलन्त्योषधयो रुषेव ।। २१

सेतुप्रबन्धानुमितस्य सिन्धो
रागः सरोषं प्रभुमाशराणाम् ।
नेतुर्नभो निम्नतया प्रसादं
निषेवितं निर्झरकैतवेन ।। २२

दान्तर्धकृष्टानि दिशा गजेन्द्रै -
र्दधानमुन्मज्जनविश्लथानि ।
शैवालशोभां सरितां दिशन्ति
हरन्ति सन्तानलतांशुकानि ।। २३

मेधैरिवालब्धभयान्मृगेन्द्रो
रत्नैरिवारिष्टगृहं रवीणाम् ।
इभैरिवोत्तीर्णऋणं पितृणा -
मुत्सैरिवोत्सादपदं युगानाम् ।। २४

कुञ्जप्रतोली कुपिताच्छभल्लं
फुल्लासनोल्लासितपुष्पदण्डम् ।
गजादिव प्रार्थितगण्डशैलं
वज्रप्रभावर्जितवाहिनीकम् ।। २५

कृत्वैकदेशोद्धरणं पितृणां
कृतार्थतां प्राप्य बलानुसारात् ।
महावराहेण वसुन्धरायाः प्राग्
दुर्वहं प्रारमिव प्रयुक्तम् ।। २६

नियन्त्रितानां हरिदन्तपाल -
वामभ्रुवां साञ्जनबाष्पपादात् ।
कलानिधिः काष्र्ण्य ....
कुरङ्गपादः कुहनाप्रपन्नः ।। २७

अपां निधोनं परिधूर्णिताप -
माबालमङ्गीकृतरत्नराशेः ।
दरीषु दर्पोन्मुखदिग्गजेन्द्रा
दरिप्रभारान्तरलब्धमार्गाः ।। २८

हरन्ति यस्मिन्नहिमांशुभासा -
तया बहिःस्थायिनमन्धकाकम् ।
दिशो दशानामपि कन्दरा नु
भुवोऽपि भूर्यस्य तटस्थली नु ।। २९

दिवोऽपि द्यौः श्रीशिखरं नु मूलं
रसातलस्यापि रसातलं नु ।
अथाऽधिरूढः पतितः प्लवङ्गौ -
रङ्गप्रभाविष्कृतकर्णिकारैः ।। ३०

हन्तुः पुरा मन्दिर यत् तदानीं
द्वितीयचापभ्रममाबबन्ध ।
अभञ्जयन्नञ्चितयावकानि
सर्वर्तुनिर्वर्तितसंस्थराणि ।। ३१

मन्दोदरीकान्तरकान्तराणां
साक्षीण्यमी तत्र लतागृहाणि ।
मन्दानिलान्दोलितहेमवल्ली -
श्रृङ्गारितानिर्झरशीकरार्द्रम् ।। ३२

अध्यासितारण्यममी यथेच्छं
सौवेलमुद्वेलबलावलेपाः ।
उत्खाय तस्मिन् मृदुलान् खनिभ्यो
यज्ञानपेक्षं कृतमध्यरन्ध्राः ।। ३३

रत्नाङ्कुरा हेमलतागुणेषु
विचिच्छिदुस्तैर्विरचय्य भूयः ।
ददौ दशास्याय वरं वराय
सकेश एवास्तु विधिर्दयालुः ।। ३४

विपत्तिहेतुं व्यवृणोच्च सीतां
निदर्शनादद्य विमुञ्चतीति ।
दाहो दशानां युगपद् दिशानां
दशास्यनाशं प्रकटीचकार ।। ३५

वक्षस्तटक्षोद इवास्य वक्तुं
पर्यस्फुरत् पर्वतगण्डशैलाः ।
निपेतुरुल्का निशि दीप्यमाना
लङ्कापुरे लङ्घितहर्म्यश्रृङ्गाः ।। ३६

आग्नेयबाणपतनं रघूणां
नाथस्य वक्तुं किल नैर्ऋतेन्द्रे ।
सभासु कोटीकपिसैन्यभार -
निरन्तराक्रान्तदिगन्तसीम्नः ।। ३७

न रक्षितं राक्षसराजभूमेः
प्रकम्पनं पत्युरुपायचिह्नम् ।
कल्पद्रुमा येन महेन्द्रलोका -
दुत्थाय लङ्कां प्रतिरोपिता ये ।। ३८

रक्षस्तदुन्मीलयितुं रुषेव
निबद्धघोषा भुवि ते निपेतुः ।
इतस्ततो रामशराः पतेयु -
र्लङ्केश्वरं हन्तुमितीव भीत्या ।। ३९

छायां सजायां हृदये बभार
मालिन्यलक्षेण मरीचिमाली ।
आगामिनीं भूतलपातपीडा -
मासूत्रयन्तः पनवाः परागान् ।। ४०

अवाकिरन् नागरसुन्दरीणां
सिन्दूरयोग्येषु शिरोरुहेषु ।
आत्मोदयैः सञ्चरताममीषां
काकुत्स्थसैन्यैः कलहं विभाव्य ।। ४१

कलानिधिः कातरयारज्न्या
पर्यालिलिङ्गे परिधिच्छलेन ।
अभिन्नजात्योः पयसोरिवान्तः
भेदापरोधाद् घनमण्डलेन ।। ४२

आवेष्टितोऽहं स इव व्यभावि
प्रायेण भानुः परिवेषयोगात् ।
प्रायेण काकुत्स्थशरप्रहारात्
प्रवेक्ष्यतां राक्षसशोणितानाम् ।। ४३

उवाच बीजान्युपलिङ्गमुर्व्या
वलाहकः शोणितबिन्दुवर्षी ।
उल्काः प्रसङ्गाः पतिता मुखेषु
ज्वालाच्छलेन द्रुतमुद्वहन्त्यः ।। ४४

आक्रान्तमेष्यन्तमिवाशरणा -
मदर्शयन् बह्निशिखा रटन्त्यः ।
निशाचरत्वप्रणयादिवेर्ष्यं
निर्भेदनं वक्षसि राक्षसानाम् ।। ४५

निवेदयन्तो निनदच्छलेन
दिवा दिवाभीतगणाः प्रचेलुः ।
प्रकम्पिताः प्रस्फुटिताश्च शैला -
स्त्रिकूटमुख्या यदि सिंहलेषु ।। ४६

प्रकम्पिता प्रस्फुटिता च भूमि -
राधेयमाधारवशं यदाहुः ।
अथर्षभं गन्धमुखं च पार्श्वे
समादनं स्थापितवान् बलस्य ।। ४७

नीलाङ्गदौ वक्षसि दुर्जयं च
नेतुर्दिनान्तं तनयं च पश्चात् ।
कक्षौ च ऋक्षाधिपवेगदर्शी
सुषेणवीरान् स्वयमस्य मूर्ध्नि ।। ४८

यास्यन्ननाशास्य जयस्तथेति
वीरो रघूणां विबभार सैन्यान् ।
स सेतुबन्धादिमुदन्तमस्य
समाचचक्षे दशकन्धराय ।। ४९

विसृज्यतां संप्रति मैथिलीति
विज्ञापितस्तेन विबोध्य सर्वम् ।
मद्द्वारपालैर्मणिदण्डहस्तैः
किरीटकोटीषु कृतप्रहाराः ।। ५०

कैङ्कर्यसिद्ध्यै कमलासनाद्या
नानौकसो नावसरं लभन्ते ।
विशश्लथे पल्लवसिद्धकान्ता
कराच्चलत्काञ्चनवल्लकीकः ।। ५१

यदृच्छयास्फालनलीलयापि
समे सुमेरोरपि सन्धिबन्धः।
सेवागताद्रिं शरदीश्वरस्य
तिस्रश्चकोटीस्त्रिदशान् दधौ यः ।। ५२

स्कन्धार्पितोऽसौकृतिपुङ्गवस्य
कैलासशैलः ककुदं ममासीत् ।
उपर्युपर्युन्नमितः शिरांसि
ममेश्वरस्यापि महीधरो मे ।। ५३

पुराभवन्निर्झर पूरवर्षी
वीराभिषेकं वृतपूर्णकुम्भः ।
करीरलावं कुरदन्तिदन्त-
काण्डावलीखण्डनपण्डितस्य ।। ५४

ममाद्य लङ्का मृगयावनेऽस्मिन्
लीलायितं राममृगप्रहारः ।
निरस्तनानाभवनोद्भवस्य
नितान्तमामोदधुरन्धरस्य ।। ५५

भूयाद् विभेदो मम चन्द्रभास-
चन्द्रेण रामोत्पलकाननस्य ।
वनान्तरस्त्रीवधपातकस्य
निन्द्यस्य नित्यं नृपशोर्निमेषात् ।। ५६

दण्डं विधास्ये दयितापराध-
मात्रेण किं मस्तकभेदनेन ।
उच्चाटयिष्यामि रणादुदर्चि-
रर्चिः शिखण्डैरचिरेणकाण्डैः ।। ५७

इरम्मदानामिव राजहंस-
माडम्बरैरम्बुधरावतारः ।
पुङ्खानुपुङ्खं मयि मुक्तपत्रि-
ण्यकारिते हन्त रणेषु रामः ।। ५८

शङ्कामपास्यैव हि मैथिली स्यात्
श्रृङ्गारचेष्टाभिमुखी चिराय ।
न सत्यदैरावतदन्तचक्रं
वक्षः प्रविष्टं कठिनं मदीयम् ।। ५९

अर्धावरुग्णं पतितं धरण्या-
मारब्धकीर्त्यङ्कुरशङ्कमासीत् ।
गन्धर्वयक्षोरगसिद्धसाध्य-
गीर्वाणगर्वग्रहमात्रकेण ।। ६०

कथं नु मोक्ष्ये कलकण्ठकण्ठीं
भुजेन सीतां भुवनैकवीरः ।
तस्याज्ञयेत्युक्तवतस्तदानीं
यात्रानकं रात्रिचराः प्रमत्ताः ।। ६१

अनाटयन्ननवधीरघोष-
माकर्णमानं हृषितैः प्लवङ्गैः ।
सुतार्णवध्वानभरो गभीरं
क्षपाकरः क्षोभकरः क्षणार्धात् ।। ६२

नभोविभोरस्य विबलस्य नादो
ममाथ मैथिल्यपहारमार्गम् ।
दिने दिने दातरि वा विशेषं
द्यावापृथिव्योः परिदेवितानि ।। ६३

आरुढशैलं पुरमाशराणा-
मालोकयामास रघुप्रवीरः ।
अलक्ष्यपौरावयवा प्रभाभि-
र्महत्तराणां मणिमण्डपानाम् ।। ६४

लङ्का किलास्मै रजनीचराणां
भाभावमासन्नमपावृणीत ।
अद्रौ स्थितं तत् पुरमञ्जनाना-
माशाभिराक्रान्तकपोलगर्भे ।। ६५

स्तम्भोपरि स्थापितमेव मेने
प्रभूततेजः पटलं प्रदीप्तम् ।
सवेगमाक्रान्त सुवेलशैलाः
शाखामृगाः स्वर्णरुजो व्यराजन् ।। ६६

स्वश्रृङ्गलङ्काभरणाय भूयः
सुमेरुणेव, प्रहिताः कुमाराः ।
भीरुस्ततो वीक्षणमात्र एव
वप्रावतोन्मर्दयितुं न लङ्काम् ।। ६७

कृतोपरोधात् क्षणदाचरीभिः
प्रियामिहस्थां परिहर्तुमेव।
परिव्रजैः कल्पविकल्पमूर्च्छ-
दुषर्बुधन्यर्बुदरोचथानैः (?) ।। ६८

लङ्कापुरी सङ्कुलिता समन्ता-
द्धरण्मयी सा किल लीयते स्म ।
श्रुत्वापि वार्तामुदितांशुकेन
न श्रद्धधानो मुनिपुङ्गवस्य ।। ६९

स रावणस्तं सह सारणेन
विवर्जयामास पुनर्विवेक्तुम् ।
बद्धार्णवं साम्यरुषेव शैलैः
विजृम्भमाणं हरिवेषगूढैः ।। ७०

प्राविक्षतां तौ प्लवघौघमुच्चै-
र्द्वितीयमम्भोनिधिवर्धनं तम् ।
तितीर्षतस्तत्र रतः समुद्रं
तीर्णाश्च तीरेषु नगेष्वगेषु ।। ७१

निवेक्ष्यमाणान् निबिडान् निविष्टान्
प्रत्याशमालोकयतां नृपाणाम् ।
स्रष्टापि कर्तुं गणनां न शक्यं
कुतो नु तासां कुणपाशनानाम् ।। ७२

विभीषणेन व्यवधानमुक्तौ
प्रदर्शितौ पङ्क्तिमुखस्य चारौ ।
उदीरित सागमनक्रमौ ता-
वन्वग्रहीत् प्राग्रसरो रघूणाम् ।। ७३

सीता हृता येन निशाचरेन्द्र !
तत् ते बलं सम्प्रदि दर्शयेथाः ।
स्थातुं क्षणं त्वामपि न क्षमन्ते
वलीमुखाः क्वापि शिलीमुखा वा ।। ७४

इतीरितं तेन दशाननाय
सन्देशमादाय पुनर्निवृत्तौ ।
व्यज्ञापयेतां विविधं तदीयं
वृत्तं स्वभर्त्रे शुकसारणौ तौ ।। ७५

तद्वाक्यमध्यक्षयितुं स ताभ्या-
मभ्रंलिहं सौधमथाऽधिरूढः ।
निर्दिश्यमानान् हरियूथनाथान्
निर्वर्ण्ययामास निशाचरेन्द्रः ।। ७६

राजन्नितः पश्य वलीमुखाना-
मेकोदकं सैन्यमितः पुरस्तात् ।
पत्युः प्रजानामधुना किलासीत्
प्लवङ्गमाद्वैतमयः प्रपञ्चः ।। ७७

यो यूथनाथायुतहेतिमाली
प्रभाभिरुद्दीपितसर्वकाष्ठः ।
पलाशिनः प्रार्थयते प्रदग्धुं
नीलोऽभ्ययान्नीलपथावतारः ।। ७८

कृताभिषेकः किल यौवराज्ये
प्रेम्णा पितृव्ये कपीश्वरेण ।
यस्त्वां रणायाह्वयते पुरस्तात्
पश्याङ्गदं पौत्रममुं मघोनः ।। ७९

भूषां भुजस्याङ्गदमङ्गनाया
भुजान्तरस्यापि च हारयष्टिः ।
एषा पुनर्वक्षसि रामसेना
प्राप्नोति नीलाङ्गदभूषणत्वम् ।। ८०

उदग्रदन्तोऽखिलरोदसी यः
संमूर्च्छयत्युल्बणगण्डशैलः ।
वामेन वाहिन्यवलम्बको यः
समादनो गन्धमुखः समिन्धे ।। ८१

निषेवतेऽन्यश्च दमाग्रण्यै-
र्वलीमुखैश्चन्दनवारिभिर्यः ।
नलो रिपूणामनलोऽपि सेतुं
केतुं च बद्धायशसः किलाऽसौ ।। ८२

संलक्ष्य साक्षादिव सन्नताङ्गी
मायामये मानुषराजकन्या ।
नागेन विद्धा नलिनीव सीता
शोकेन चैतन्यमपाचकार ।। ८३

आपादयिष्यत्यविलम्बमेव
　　दीर्घायुषो दाशरथेः प्रसादाः ।
विबोधयामास विदेहपुत्रीं
　　नरस्तु मोहान्नियतिः सखीव ।। ८४

राजीवमित्रे रमणस्य नेत्रे
　　भ्रुवौ च भुग्ने कुटिलांश्च केशान् ।
सा प्रत्यभिज्ञाय चकार शोकाद्
　　दीर्घाणि देवीपरिदेवितानि ।। ८५

प्रहस्तमभिषेणनव्यसनतः प्रतीक्ष्य स्थितिं
निशम्य पुरुषात् ततो निशिचरेश्वरे निर्गते ।
वियद्‌गमनदक्षया विदिततत्प्रवत्त्या स्वयं
मृषेति मृगलोचनाजनि कयाचिदाश्वासिता ।। ८६

लङ्कायां रजनिचरेश्वरस्य धीरो
निस्साणध्वनिरभिषेणनाभिशंसि ।
तन्मिथ्या रघुपतिसंशयं निरासे
वैदेह्या व्यसनभरेऽप्यमुक्त लक्ष्म्याः ।। ८७

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयपतेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गोऽगमत् षोडशः ।। ८८

इति डिण्डिमसार्वभौमकृतौ श्रीरामाभ्युदये षोडशः सर्गः ।

सप्तदशः सर्गः

श्रीमद्रामानीकरुद्धोपकण्ठं पङ्क्तिग्रीवं काममापृच्छ्यमानम् ।
मन्त्री तन्त्रावापवेदी महीयान् मातुस्तातो माल्यवानित्युवाच ।। १

ताताधीताऽनेकविद्याऽनवद्य प्रत्यावेद्यं प्रायशस्तेन किञ्चित् ।
पृच्छस्यस्मान् अन्वसाह्यस्य हेतुः वक्तव्यास्ता वंशवृद्धाननेन ।। २

सत्यासत्ये विद्धि तेजोऽन्धकारौ प्रज्ञामोहौ स्वर्गपाताललोकौ ।
सत्त्वासत्त्वे सर्वरक्षाजिघांसे धर्माधर्मौ भिन्नसर्गौ निसर्गात् ।। ३

पूर्वः पद्यस्तत्र सत्राशनानां दैतेयानामुत्तरो रक्षसां च ।
धर्मस्तेनाऽधर्मनिर्मूलनाय ध्वान्तस्येव ध्वंसनायातपः स्यात् ।। ४

धर्मः प्राप्तो यस्तथापि त्वयादौ वक्त्राम्भोजैर्वामदेवार्चनेन ।
भूरीभूतः सोऽपि नारीति रीत्या पत्यादेशात् पर्वतेन्द्रात्मजायाः ।। ५

यश्चाऽधर्मः शङ्करस्याऽद्रिकम्पात् शान्तिं नीतः सामगानां किलाऽसौ ।
वैदेहीयं कीदृशी वत्स साक्षाद् यस्यास्तातो याज्ञवल्क्यस्य शिष्यः ।। ६

उत्पातानामूर्मिलाद्यप्रवृत्तिः कीशा व्याजात् केवलं का द्रुताः ।
सिन्धोर्मध्ये सेतुरुत्सारहेतुर्यैरारब्धो लीलया राक्षसेन्द्र! ।। ७

नैवापेक्ष्या नन्दिशापस्य पाकात् प्रत्यासन्ना हन्तुमस्मान् प्लवङ्गाः ।
मर्त्य कच्चिद् राघवं मावमंस्था मर्त्यानास्था यत्कृतावध्यतायां ।। ८

तत्राप्यन्यः स स्वयं चक्रपाणिर्नः संहर्तुं रामनामा नरोऽभूत् ।
वैरायम्ना व्यक्तिभिर्वा नराणामाविर्भूतास्तेऽप्यमित्रा धरित्र्याम् ।। ९

लङ्कादाहस्याऽनुभूत्या वनौका यद्येकोऽपि प्राप्नुयाच्छङ्कितव्यः ।
सङ्ख्यातीताः साम्प्रतं वानरेन्द्राः सम्प्राप्ता यत् तत्र नोदासितव्यम् ।। १०

शैलादेर्यः क्रोधवह्निः पुराऽभूत् तस्यैवैते हेतवो न प्लवङ्गाः ।
प्रायेणाऽस्याश्चण्डिकायाः प्रकोपान्नाशोऽस्माकं वत्स नारीमुखेन ।। ११

क्रन्दन्ती हा हतास्मीत्यभीक्ष्णं पत्युः कण्ठं प्राणशस्त्री परस्त्री ।
तत् प्रत्यक्षं यत् तवापांसुलेयं धारालश्रद्धाम्नि मङ्गल्यसीम्नि ।। १२

यः संदत्ते शत्रुणा हीयमानः तस्यापत्यं विग्रहः स्वस्तनोति ।
प्रज्ञान्धक्षु स्वान्यवृत्ती प्रदर्शी सर्वेषां स्यात् स स्वयं मूर्ध्नि राज्ञाम् ।। १३

अस्मद्बन्धा हेहयानामधीशोऽहं तातस्यायोधने रैणुकेयः ।
अस्याप्यासील्लीलया योपजेता रामः सोऽयं कीदृशो लक्षणीयः ।। १४

पक्ष्या रक्ष्याः पालनीयाः सगन्धाः पर्यालोच्चं प्रत्यहं तैर्विधेयम् ।
पत्थ्या तेषां पा क्व यस्याऽभ्युपेया तस्याशास्यं कञ्चिदन्यं न लोके ।। १५

रत्या नार्ये चाज्ञया येन वाक्यं वारं वारं वारितं श्रावितं च ।
सोदर्यस्ते सोऽपि रामं प्रपन्नः प्रत्याचष्टे न प्रयोगं चराणाम् ।। १६

एतावत्या किं प्रवृत्त्याऽस्य राजन्यायामाया राक्षसानामधीनाः ।
तास्ता व्यक्तीकर्तुमीषद् व्यवस्येत् प्राणान् तस्याद्यः स्वपक्षप्रभेदः ।। १७

यः सर्वेषां मन्त्रिणामैकमत्यान्मन्त्रस्थोऽयं क्वापि नैवावकाशी ।
यद्वा वृद्धो बन्धुनैकोऽपि चर्या मन्त्री तन्त्री तस्य वाक्यं न दूष्यम् ।। १८

तत् काकुत्स्थः सर्वरीत्याबलीयान् दौर्बल्यान्नो द्रौहिणः पौत्रसिद्धः ।
सन्धिर्न्यायो मुच्यते येन सीता प्रत्याख्यातं नार्हसीदं प्रमत्तः ।। १९

इत्याख्यातस्तत्र मातामहेन प्रत्याहासौ प्रज्वलत्कोपवेगः ।
रक्षोनाथः क्षोभयन् राजधानीं दिक्पालानां दारुणैरट्टहासैः ।। २०

धर्मः पक्षो वाप्यधर्मः किमाभ्यां प्रज्ञा भूयस्यस्तु मोहोऽथवा मे ।
दोर्दण्डानां दूनदिग्वारणानां दूरे देवास्तत्र कोऽयं नृदण्डः ।। २१

पथ्यं तथ्यं मन्त्रमुक्तं त्वया यद् हीनाहीनप्रक्रियाविक्रियाभिः ।
अन्तःस्वान्तं तत्प्रवेशं न सोढा प्रत्याक्षिप्ता मर्त्य लोकप्रतापः ।। २२

कोऽयं धर्मः कोऽपि कार्पण्यसीमा कन्दाहारः कानने श्लाघितो यत् ।
नेता सोऽहं निर्झरेन्द्रापजेता निःसन्देहं निन्दितो यः समक्षम् ।। २३

स्त्रीघातात् किं स्थापितस्तेन धर्मः किं वा स्थाणोर्जीर्णकोदण्डभङ्गात् ।
वन्यावन्यां वालिनो वञ्चनात् वा वद्ध्वा यद्वा वक्त्रवैरूप्यदानात् ।। २४

प्रक्षिप्तं मे यत्परस्योपलिङ्गं बद्धादब्धेरभ्युपेयं भयं यत् ।
शौर्योत्कर्षः स्थापितो यत् कपीनां किं पाण्डित्यं किं द्विषः प्रेरणं तत् ।। २५

कैलासाद्रेः कम्पनं सामगानां नन्द्याक्षेपो नाथ पूजाशिरोभिः ।
रम्भाक्रान्तर्या च रक्षा शराणां कर्तुः सैवाधर्मधर्मव्यवस्था ।। २६

व्यापद्यां यः सन्निधत्ते हितार्थं व्याचष्टे यः स्वामिनो व्यग्रही सः ।
स्वाप्राणार्थी तं च नो मुञ्चते यः सोदर्योऽसौ स्वेदजः सत्यमन्युः ।। २७

प्रज्ञाहानिः काममस्माद् विरिञ्चात् प्राप्ता सर्वावध्यता यत्तपोभिः ।
शौर्ये को वा संशयो दृष्टपूर्वो विष्णोश्चक्रं येन विक्षित्तमाजौ ।। २८

लङ्काराज्यावाप्तिरारभ्य गेहे स्वेच्छाकृष्टा स्वर्गपातालनार्यः ।
क्रन्दत्यार्ताः प्रत्यहं किं गतं मे सच्चारित्रा तत्र सीतेति कैषा ।। २९

किं त्वेतस्या रूपसौन्दर्यलक्ष्म्यः कोट्यंशेन प्राप्तिरासां न किञ्चित् ।
स्त्रीरत्नं यत् स्यान्महाराजयोग्यं तस्यार्हत्वं कस्य वान्यस्य मत्तः ।। ३०

रामा नैषा यद्बलात् स्वीकृतासीत् रम्भाशापस्तत्र किं कारणं मे ।
तत्सौशील्यं विद्धि वक्ता श्रुतीनां यत्कूटस्थः सोऽपि राजीवजन्मा ।। ३१

गर्ह्यः सद्भिः सो गृहीतस्य दोक्ता युद्धारम्भे जीवितं योऽनुमन्ता ।
पश्यालम्भो योऽनुकम्पे तस्मात् सोऽहं मोक्तुं न क्षमः स्त्रीललाम ।। ३२

दौहित्रस्ते दीव्यते यो मदन्यो रामेणैवारब्धराज्याभिषेकः।
तत्कारुण्यात् स्थातुमाशादुराशालीलाभिन्नैरावणो रावणोऽहम् ।। ३३

दत्ताग्निः स्यादाहवं दारुलोके यद्याश्चर्यं श्लाधनीयो हनूमान् ।
अक्षद्रोहाहस्करः संयतोऽपि व्यक्तं मुक्तोवानरत्वात् स भूयः ।। ३४

दीर्घापाङ्गे दर्पकस्याऽस्य विद्ये विद्यामध्ये मेघनीलालकाग्रे ।
वक्ष्ये कस्मै वाचमाख्याति मोक्तुं मन्त्रीवृद्धों माल्यवानित्युवाच ।। ३५

लङ्कानाथस्यैवमाकर्ण्य वाचं ह्रीत्या भीत्या मन्त्रितोमन्त्रिवृद्धः ।
प्राप्यानुज्ञां प्रत्यगात् प्रत्यगात्मप्रज्ञानं किं रोचते कामुकेभ्यः ।। ३६

द्वारे वाच्ये द्वौ महत्पूर्वमुक्तं नाम्ना पार्श्वं चोदरं च न्यधत्तः ।
प्राच्ये पुर्याः सप्रहस्तं प्रतीच्ये शक्रारातिं तौ चचारावुदीच्ये ।। ३७

मानोन्मत्तौ मध्यमे तत्र गुल्मे रक्षः कृत्वा यद् विरूपाक्षनाम ।
सन्धित्सूनां मन्त्रिणां तत्र मन्त्रं प्रत्यादिश्य प्रापुरन्तःपुरं सः ।। ३८

लङ्कावृत्तं पक्षिभावात् प्रविश्य ज्ञात्वा वृत्तान् स्वानुभावान् प्रमृश्य।
रामायाख्यद् रावणं नावसन्तं लङ्कोदीच्यद्वारमस्यानुजन्मा ।। ३९

पूर्वे नीलं दक्षिणे वालिपुत्रं लङ्काद्वारे पश्चिमे मारुतिं सः ।
तत्रोदीच्ये स्वानुजः स्वं ह भेजे मध्ये गुल्मे जाम्बवद्वानरेन्द्रौ ।। ४०

सर्वैः सैन्यैस्त्वां सुवेलाधिरूढो लङ्कां दृष्ट्वा राघवो विस्मितोऽभूत् ।
पीडामूलं सर्वदिक्पालकानां व्यावृण्वन्तं मेघहंसाङ्गपालिम् ।। ४१

छत्रेणैकेनोल्लसत्पद्मरागच्छायामायासन्ध्यरागोदयेन ।
सूर्येणैव स्वप्रतापप्रहर्षः प्रत्याधिष्टज्योतिषा प्रार्थ्यमानम् ।। ४२

आरक्ताक्षो रक्तवासो वसानं दंष्ट्रालास्यं दीप्तकोटीरचक्रम् ।
कालाभ्राभं कर्कशभ्रूकूटीकं लोहप्राकारोपमं राजधान्याः ।। ४३

दीप्रक्रोधो दृष्टमात्रान्महीध्रादुत्प्लुत्योच्चैर्गोपुराग्रं कपीन्द्रः ।
पादाघातात् पातयामासभूमौ लङ्काभर्तुः कीर्णरत्नं किरीटम् ।। ४४

आदौ तत्रालक्षितोपाद्यमुद्यत्सद्योविद्युद्विभ्रमं व्योम्निचक्रे ।
पादाघाताद्वञ्चयामास पश्चाद्वज्राघातान्मस्तके रावणस्य ।। ४५

घोषोदग्रं घोषयामास तूर्णं वालीवप्रां मन्दरं वानरेन्द्रः ।
दुर्मोक्षं तं कण्ठतः पङ्क्तिकण्ठो भारोत्कर्षाद् वर्ष्मणो भीषणस्य ।। ४६

पादोत्क्षेपात् संपतन्नेव भूमौ पत्युर्भासां पातयामास पुत्रम् ।
त्यक्तग्रीवस्त्यक्तसुग्रीववेषः क्ष्वेडानादैः क्षोभयन् दिङ्मुखानि ।। ४७

निन्ये तस्मिन्निष्ठुरामुष्टिघातान्वेलाशैले वीचिपातानिवाब्धिः ।
कालव्यालश्रेणिपाणिन्धमानां मध्यं प्राप्तस्तत्र दोर्मण्डलीनाम् ।। ४८

भानोः सूनुर्भानुमालीव जज्ञे लक्ष्यालक्ष्यः कालमेघान्तराले ।
स्वच्छन्तेन स्वीकृतस्वेदपूर्वं नुन्दन् धीरः स्वामिनः कौणपानाम् ।। ४९

घूर्णत्कोणा कोणघोरेण मूर्च्छा घोणीवाद्यात् घट्टयामास वार्धिम् ।
रक्षोदोष्णां सन्निवृत्तोद्यतानां व्यालेन्द्राणामुत्फणानामिवाग्रे ।। ५०

निस्सामुख्यं निर्यगुद्धार्य वेगान्निन्येभङ्गं निष्ठुराणां नखानाम् ।
सुग्रीवं सोसूयते यत्तदेव क्षिप्तं पङ्क्तिग्रीवमुद्ग्रीवमासीत् ।। ५१

लङ्काराज्यस्थापनार्थं यथाभूत् तस्य भ्राता रावणेनाभिषिक्तः ।
द्वौ द्वैगुण्यादंसमास्फाटयन्तौ रन्ध्रावाप्तेर्मुष्टिमत्ते भ्रमन्तौ ।। ५२

पूत्कुर्वन्तौ पर्वतेन्द्राविवोभौ वारं वारं वञ्चनां मार्गयन्तौ ।
निर्घातानां निर्विशङ्कं निपातं व्यातन्वानौ मुष्टिबन्धप्रहारैः ।। ५३

अङ्कुल्यग्राकर्षणादाविशन्तावन्तः स्कन्धालम्बनात् पातयन्तौ ।
अध्यारूढोरस्तटौ ताटयन्तौ व्याविध्यन्तौ तूर्णमङ्घ्रिद्वयेन ।। ५४

वेगोन्मत्तौ दूरमुत्थाप्य भूयो ध्नन्तौ मुष्ट्या कम्पयन्तौ त्रिकूटम् ।
रक्तस्रोतः पातनाल्लम्भयन्तौ दोर्दण्डानां दर्पकण्डूतिशान्तिम् ।। ५५

वीरोत्तंसौ विस्रवः सूर्यपुत्रौ चक्राते तौ सावहित्थं नियुद्धम् ।
सुग्रीवोऽथ स्वामिभार्यापहर्ता मायां तेनारभ्यमाणां विदित्वा ।। ५६

वेदीमध्यादुत्थितः सत्त्ववेगात् प्रत्यावृत्तः स्वामिपार्श्वं स वीरः ।
सर्वानस्मान् संशये स्थापयित्वा कीदृक्षं ते केवलं साह्वयस्य ।। ५७

कल्यारम्भाद् द्वापरं त्वय्यवाप्ते ... त्र(त्रे?) तां हित्वा का गतिः कृता स्यात् ।
पश्यन्नेव प्रज्वलन्मन्युना यत् सिंहः कामेत् सिन्धुरं निर्विवेकः ।। ५८

तत् प्रत्यक्षं साहसिक्यं त्वयीदं प्रज्ञाशस्त्रयाभ्याततायी प्रभार्यः ।
तेनेत्यक्तो भासकीत्थं बभाषे देव त्वत्के धाम्नि देदीप्यमाने ।। ५९

आपत्तिः काह्यततताय्यन्धकारा नास्माकं स्यान्नाविवेको ममेति ।
द्वारे द्वारे द्वेषिणो राजधान्यां कोटिं कोटिं यूथपाः स्थापयित्वा ।। ६०

त्रिंशत्कोटीमध्यगुल्मे षडुग्रां लङ्कानाथं राम एवं रुरोध ।
यः सन्देशो राघवो नाथदत्तः तं प्राज्ञानामग्रणीर्वालिपुत्रः ।। ६१

मन्दोदर्या वल्लभं मन्दिरस्थं प्रत्यासन्नः प्राह मोहैकमूलम् ।
ज्याबन्धेन प्राग् यथा कार्तवीर्यः । दोर्मूलेन द्रोहिणं त्वां निबध्य ।। ६२

सन्ध्यां चक्रे यः समुद्रेष्ववध्यं तारेशो यस्तस्य पुत्रोऽङ्गदाख्यः ।
सोऽहं दूतः स्वामिनो राघवेन्दोः पङ्क्तिग्रीवः प्राप्तवांस्त्वत्समीपम् ।। ६३

स त्वां पथ्यं प्राह सन्देशमेवं रक्षामूलं राक्षसैश्वर्यलक्ष्म्याः ।
रक्षोराज!त्वं हि राजीवयोनेर्नप्ता पर्णैरर्चिता शूलपाणेः ।। ६४

दिक्पालानां दर्पहाप्यल्पकार्यो मोहायत्तो मुञ्चसे किं विवेकम् ।
स्थाणोः स्थानं स्थावरस्यापकारो रुद्रा रुद्राण्यङ्घ्रिमुद्रा च मूर्ध्नाम् ।। ६५

यक्षाध्यक्षाद् यद्विमानाभिमानाद् ग्राहो मोहो नन्दिनो नन्दितं ते ।
उत्स्वप्नेष्वप्युच्चकैर्हन्त हन्त प्राप्तः प्राप्तो रावणो रावणोऽयम् ।। ६६

हन्ता हन्तेत्याख्ययोद्विग्नमास्ते भूयो भूयो भूर्भुवस्स्वस्त्रयं ते ।
चारित्रं ते रावणेभ्यः सभायां नप्तुः श्रुत्वा मूर्खनालीकजन्मा ।। ६७

कर्तुं कर्ता वर्जनं नु क्षमः सन् व्रीलागेया केवलं मीलितोऽभूत् ।
रेवामध्ये स्वामिनो हेहयानां वारिक्रीडां कुर्वतो वल्लभाभिः ।। ६८

मौर्वीबन्धाद्वेष्टुमास्था न किं ते चक्रः किञ्चित् साधुमार्गोपदेशम् ।
बाहुग्रीवापादबाहुल्यभावं बध्वा गाढं त्वां बलीन्द्रावरोधाः ।। ६९

तालोत्तालं ताण्डवं प्रापयन्तः प्रत्यावृत्तं ताण्डवाक्षेपणं किम् ।
धारान् कांश्चिद् दृष्टरात्रान् परेषां प्रत्युत्कण्ठां नापशु प्रस्तुते कः ।। ७०

रम्भारागारम्भसंभावनानां किं भूमिः स्यान्न स्नुषा किं तवापि ।
निश्शेषं ते रक्षणं धक्षणं वा कर्तुं जानात्येष काकुस्त्थबाणः ।। ७१

बद्धा मोक्तुं बाहुमौर्वीलताभ्यां नासौ वाली नार्जुनः कार्तवीर्यः ।
ब्रह्मर्षीणां सन्ततं बाधितारं दिव्यस्त्रीणां दत्तकारानिबन्धम् ।। ७२

श्रुत्याचारध्वंसिनं त्वामिदानीं दण्डं नेतुं जृम्भते जृम्भकास्त्रम् ।
पाताले प्राक् स्वामिनो दानवानां नारीभिस्त्वं नर्तितस्वोत्तमाङ्गः ।। ७३

एह्येहि त्वं राघवो युद्धसङ्गे नित्यं नेतुर्निःशिरस्कं प्रतीक्षे ।
सत्यंद्रोहात् सत्यसन्धस्यपूर्वं पक्षौ यैरुत्पाटितो गृध्रराजः ।। ७४

भग्नानाजौ त्वद्भुजानद्य गृध्राः खादन्तस्तान् वैरशुद्धिं भजन्तु ।
एवं यद्यप्यर्थसे रावण! त्वत्प्राणानां त्वं केवलं त्राणहेतोः ।। ७५

वैदेही चेन्मुच्यते वा स दद्यात् साकेतं ते यत्कनिष्ठस्य लङ्काम् ।
इत्युक्तेन प्रेरितस्तस्य हन्तुं चत्वारो ये गृह्णतस्तान् ग्रहीत्वा ।। ७६

उत्प्लुप्योच्चैर्गोपुराग्रं स भ... विक्षेपाहीन् पक्षिणामीशितेव ।
प्रासादस्य प्रज्वलत्पद्मरागच्छायामायासान्ध्यरागानुबन्धि ।। ७७

श्रुङ्गं हित्वा तस्य श्रृङ्गेण साकं प्रत्यायासीद् रामसेनां प्रपन्नः ।
विज्ञातार्थो वालिपुत्रादुपेतादिक्ष्वाकूणामीश्वरो योद्धुकामः ।। ७८

.... ।
कक्ष्यां बद्ध्वा वल्कलीं कर्णलम्बं प्राग्भारं च प्रत्यबध्नां पटानाम् ।। ७९

आवृत्याक्षोहिणीभिस्त्वरितमथशरैराहितक्ष्वेडितानां
वीराणां वानराणां विमतपुरमसौ वीरलक्ष्मीं बभार ।
काकुत्स्थः कल्पकालानलकबलीभूतदिक्चक्रवालो
ज्वालामालाभिरास्फालितगुणत्रिणतानल्पविष्फारघोषः ।। ८०

श्रीरामाभ्युदयेऽत्र सप्तदशतां सर्गो जगामाग्रिमः

इति रामाभ्युदये सप्तदशः सर्गः ।

अष्टादशः सर्गः

नगरं कपिभिस्तदा निरुद्धं
तदनिश्वासमिवात्मनो निशम्य ।
समनीनहृदाशुरक्षणाय
क्षणिकश्रीः क्षणदाचराधिराजः ।। १

भिदुरध्वनिभीषणप्रणादै -
रचलस्फोटमभाव्यथाह वाणी ।
अवधीरितवारिधिर्गभीरं
रणभेरी रणतिस्म रावणस्य ।। २

घटयन् घनवज्रघोषहेतो -
र्दलयन् दीपमिवेर्ष्यया बभूव ।
विससार विकीर्णरोमहर्ष
चरितं राक्षससैन्यतूर्यघोषः ।। ३

निनदाशनिजृम्भणाभिशङ्को
बहुमेने स सुरैः सुमेरुकुञ्जे ।
स्वयमेव वधूभिराकुलाभि
क्षतमार्गेषु सुखं क्षणादवाप्तैः ।। ४

पटलं फणिराजलोचनानां
सुगतोक्तिः सुरकुञ्जरश्रुतीनाम् ।
कुलिशं कुलभूभृतां जजृम्भे
परितः पङ्क्तिमुखानकप्रणादः ।। ५

पटहध्वनिभिस्ततः समन्ताद्
वलमानैस्तुरगैर्विकृष्यमाणः ।
मरुदाकुलमद्गुवच्छताङ्गं
परिबभ्राम खेर्णभः पयोनिधौ ।। ६

कुहनाचरघोरघोणिघोणा -
　　क्षुभिताम्भोनिधिघोषभीषणेन ।
दशदिक्षुनिरर्गलं जजृम्भे
　　तुमुलेन ध्वनितेन दुन्दुभीनाम् ।। ७

उपहूत इवोद्यताग्रहस्तै -
　　रि....... दन्तद्विरदैरवाप्तकम्पैः ।
विविधानि मनांसि संप्रणादै -
　　र्विदधे दिक्पतिवामलोचनानाम् ।। ८

भरितोन्निनदेन तेन कामं
　　जलधिं निर्भरजृम्भितोर्मिमालः ।
पुनरप्यगमीव रामभद्र -
　　प्रहितास्त्राशनिपातदुन्दुभिः ।। ९

अखिलेषु जगत्सु पन्नगाना -
　　मधिपेन निर्भरमाससाद खेलम् ।
दशकन्धरयानदुन्दुभीनां
　　निनदे मूर्च्छति निस्तुषीकृताशे ।। १०

मदवारणवन्महीध्रसन्धिं
　　दलयन्तो दश............ तूर्यघोषः ।
कृतपुष्करखेलना वितेनु -
　　र्हृदयक्षोभणमप्सरोगणानाम् ।। ११

वधमिच्छति शब्द एव हतौ
　　नभ इत्यागमवान् ननु प्रमाणम्।
श्रवणानि नभोमयान्यभूवन्
　　परिलीना विधिदानकप्रणादैः ।। १२

नगदन्तपुरान्तकाट्टहास
　　ध्वनिताडम्बरगन्धधूर्वहेण ।
हरशूलाभिरशोभि हन्यमान -
　　द्विपफीट्कारनिकारदुर्गमेन ।। १३

प्रलयाग्निनिमग्नपर्वताङ्ग -
स्फुटविस्फूर्जथुतर्जनोर्जितेन ।
समसुप्तिसमुद्भयाभ्रनिर्यद्
भिदुरध्वानभयङ्करोद्यमेन ।। १४

दनुजाधिपदेहधारणोद्य -
न्नरसिंहध्वनिकर्मकर्मठेन ।
शशिचूडशराग्निचर्व्यमाण -
त्रिपुराट्टालचटत्कृतोद्भटेन ।। १५

सुलभस्फुटनिस्वनं सुधर्मा -
कनकस्तम्भकजम्बदर्पणेन ।
प्रसृतायतजीवदूरयाव -
द्यमरं सैरिभभीतिलम्भकेन ।। १६

पुनरप्युपलभ्यमानपाशा -
युतपुत्राहवपेषणभ्रमेण ।
प्रतिरोपितपर्वतप्रकम्प -
भ्रमपर्याकुलितैकपिङ्गलेन ।। १७

परिघूर्णितसप्तसागरोर्मि -
प्रकरं ध्वानवितानतुन्दिलेन ।
रथचीत्कृतलब्धवर्धनेन
द्विपघण्टाध्वनियोगदुर्धरेण ।। १८

जयघोषभरानुवेदितेन
स्फुटनाडीभभटारवोद्धतेन ।
प्रतिशब्दविदार्यमाणलङ्का -
गिरिगर्भोद्धृतसिंहमण्डलेन ।। १९

मदलासिनिरुद्धरोदसीकं
रणनिध्वानभरेण रावणस्य ।
प्रलयार्णवघूर्णमानमाया -
किटिकण्ठध्वनिभारकेलिकारे ।। २०

दशकन्धरसैन्यदण्डयात्रा -
　　पटहानां परिजृम्भिते प्रणादे ।
अवसन्नमदैर्भयादिरेका -
　　दवरुग्णाय सश्रृङ्खलाकलापैः ।। २१

कृतवीत्कृतिभिर्भृतं समन्ता -
　　दलितस्तम्भमिभिर्दिगीश्वराणाम् ।
वलहन्तुरुदस्तफल्लहस्तं
　　करिणी भ्राम्यति कातरे तदानीम् ।। २२

परितः परिघूर्णितानि मेरौ
　　कनकानोकहकाननान्यभूवन् ।
करुणाः सरथोपकृष्यमाणः
　　तुरगैः साध्वसतूर्णघूर्णमानैः ।। २३

अविशेषमगाधिराजमन्धात्
　　परिबभ्राम नभःपयोधिमध्ये ।
द्विससस्रतया द्विजिह्वभर्तु -
　　रश्रद्धयन्नयनपथान्युपाश्रितानि ।। २४

अभिधानविधेर्बलादभूवन्
　　क्षपितायूंषि रसातले क्षणार्धात् ।
अनुभूतवतीव भूरकाण्डे
　　प्रलयाम्भोधरवज्रपातपीडाम् ।। २५

वृषभः स्फुटमट्टहासघोरः
　　स्मरति स्मरहन्तुरौपवाह्यम् ।
स्फुटितं च तदाण्डमण्टपेन
　　त्रुटितं दिक्तटसन्धिबन्धनेन ।। २६

इदमद्भुतमेकमेव नास्मान्
　　परिपेते गगने पयः प्लवेन ।
कुहरैः स्फुटितैः कुलाचलानां
　　विगतद्वान्तनिबोधनैर्बभूव ।। २७

रजनीचरराजमध्यगच्छन्
रणसाहाय्यकृते ध्रुवं तमांसि ।
स्फुटितस्फुटभिन्नसन्धिबन्धाः
कुलशैला इति कोऽत्र विम्ययः स्यात् ।। २८

यदि गोत्रभिदोऽपि तस्य चेतः
सुलभस्फोटमभूत् स्वयं भयेन ।
प्रवरोच्छलितः पदातिवाचि-
द्विरदस्यन्दनदुन्दुभिप्रणादः ।। २९

विल्यं वियतः स्फुटं विधाय
व्यवृणोत् कारण एव कार्यलोपम् ।
न पतद्रसतां हरित्पतीनां
नगरद्वारकवाटबन्धनादः ।। ३०

ध्वनिबन्धिनि दुन्दुभौ शशङ्के
सुरबन्ध्यं शुकमोचनस्वनोऽपि ।
निरगान्निगरान्निशाटसैन्यं
निबिडौ रामबलो निरोधनाय ।। ३१

चतुरं चतुरङ्गितः समुद्रैव -
घोषजातनिबद्धजातरोषः ।
मणिभाण्डमयूखमण्डलीभि-
र्मघवत्कार्मुककर्मिमा.......णः ।। ३२

परितश्चलितप्रकीर्णकत्वाद्
गरुतो भूय इवोद्गतोदयानाम् ।
प्रतिपन्नशिरस्त्रशस्त्रभस्त्रा -
भरणोरस्त्रतया भयङ्कराभे ।। ३३

अवलम्ब्य करैः खलीनपाशा-
मधिरूढ.........मश्ववारवीरैः ।
करयातितमारुतास्तुरङ्गा-
स्थगयन्तः खररेणुभिः समुद्रम् ।। ३४

कलयन्त इव ह्रियं कपीनां
निरगुः सेतुनिबन्धगर्वितानाम् ।
निशमय्य हराचलप्रवृत्तिं
निखिलाः पङ्क्तिमुखं निषेव्यमाणाः ।। ३५

अचला इव मारुताः समन्ता -
दचलन्नञ्चितदाननिर्झरीकः ।
जगता सहकारगन्धिदान -
प्रसरां प्रेक्ष्य रणे पयोदनीलाम् ।। ३६

उदठण्ठितारमुदस्तकर्णैः
कलकण्ठैरपि तत्र नीलकण्ठैः ।
प्रतिमुक्ततनुत्रतोयदानां
प्रचरत्खड्गदिक्प्रभोद्भटानाम् ।। ३७

भयमापततां भजेत रक्षः
सुभटानां पुरतः स्वयं यमोऽपि ।
तनया इव तत्र कालरात्रे
रवतारा इव कल्पतोयदानाम् ।। ३८

प्रतिमा इव कालभैरवाणां
प्रतिसस्नुः पिशिताशनप्रवीराः ।
तमसामिव तत्र संहतानां
चरतां राक्षससैन्यमण्डलानाम् ।। ३९

तरुणातपवत् तरङ्गितानां
पुरतः प्रादुरभूत् प्लवङ्गसैन्यम् ।
सकलायुधसम्पदा समेतं
चतुरङ्गं रजनीचरेन्द्रसैन्यम् ।। ४०

हरिसैन्यमनायुधं तदासीत्
कथमायोधनधर्मसाम्यकक्ष्या ।
निपपात निशाचरेन्द्रसैन्ये
प्लवगानां परिषत् परःशतानाम् ।। ४१

बटवानलवह्निहेतिमाला-
प्रलयारम्भ इवाम्भसां निधाने ।
अनुचक्रुरवप्तवर्णभेदा-
मिलिता राक्षसवानरा मिथस्ते ।। ४२

कलितप्रणयोपगूहनानां
कनकक्ष्माचरकज्जलाचलानाम् ।
प्रतिपक्षधनुर्धरप्रमुक्ता
विशिखास्तत्र विजृम्भितानधावन् ।। ४३

रविमार्गरुधो रणाय तावद्
रणवृक्षादुदमूलय प्लवङ्गः ।
प्रतिवैरविधूतपत्रपुष्पान्
सहसोन्मूल्य तरून् समुत्सृजन्तः ।। ४४

विदधुर्विजयैषिणः प्लवङ्गाः
दृढमायोधनदेवतासपर्याम् ।
कनकध्वजदण्डकान्तिमत्तां
दधिरे दीर्घतरोच्छ्रिता हरीणाम् ।। ४५

वलिताः पुनरत्र दण्डपाशा
यमपाशा इव राक्षसेष्वभूवन् ।
उभयोर्बलयोरुदीर्यमाणे
रजसि ध्वान्त इवालयन्त्यशेषम् ।। ४६

अजनिष्टनखायुधप्रहार -
स्वरभेदान् स्वपरान्..........वबोधान् ।
अयि कोमलमातपं ग्रसित्वा
मृषयेवाम्बरसिन्धुमुज्जिहानः ।। ४७

अलिसङ्घ इवापतद् द्विपानां
मदनिष्यन्दिषु गण्डमण्डलेषु ।
मलिनीकृतपुण्डरीकलक्ष्मी -
मिभकाना........मेदुरः समूहः ।। ४८

चुलुकीकृतसप्तसिन्धुपूरो
गमिताशेष गिरीन्द्रगर्वशृङ्गः ।
अखिलानपि संश्रयं दिगन्ता -
नपरः कुम्भजनेरिवावतारः ।। ४९

दशकन्धरदण्डयात्रशङ्का
परभृत्पर्वतभूगृहप्रवेशः ।
क्षणादाचरजीवितक्षयोद्य -
द्यमयात्रापटमण्डपप्राकारः ।। ५०

गगनात्मगिरीशगात्रचर्मा -
वरणं दिग्वनितैकवारवाणम् ।
समरग्रहसन्निधानधूपः
सुभटस्वर्गवधूरतिप्रदोषः ।। ५१

मदवारणमण्डनाङ्गरागो
हरिसेनार्णवशैवलाभिषङ्गः ।
धवलातपवारणेन्दुराहु -
र्ध्वजवल्लीवनपुष्पधूलिपुञ्जः ।। ५२

अमरारिशरावपातबिभ्य -
त्सकलांशाधिपधामसालबन्धः ।
जगतीमणिकञ्चुलीनिबन्धो
जगदक्षःपटलं प्रभाकरस्य ।। ५३

रजनीचरराजराजधानी
रमणीलोचनवारिपातधूमः ।
कुलिशायुधधाम कोमलाङ्गी
जनसीमन्तनिबन्धवर्णचूर्णः ।। ५४

रणविक्रमनाट्यसंविधान -
क्रमनैपथ्यमनीकिनीभटानाम् ।
उदजृम्भत रोदसी इवैक्यं
सहसा साधयितुं रजःसमूहः ।। ५५

पुरुषासिफणाय धरा विरेजे
रभसा संहतिरन्धकारताशा ।
रजनीचरवासभूरमीषां
रणसभ्योल्ललिता बलिस्थलीषु ।। ५६

पृथिवीपृतनां परागलक्षा -
द्दुहतुर्बन्धनदुःखजातरोषा ।
कबलीकरणाय कौणपाना -
मुदलङ्धीदुदलादिवाम्बुराशेः ।। ५७

उपरुद्धदिगन्तरेण सेना
रजसा लम्भितमेघभावनानाम् ।
विवृतानि मुखानि चातकानां
विविधाव्योम्नि मृषाभ्रमान्यभूवन् ।। ५८

पृतनारजसाशु पङ्कभावं
प्रतिपन्नः सुरदीर्घिकाप्रवाहः ।
गगनाम्बुनिधौ पुनर्गभीरे
विदधे मृण्मयसेतुबन्धलीलाम् ।। ५९

पटहध्वनिभिः समं प्रवृत्ते
जगदन्धङ्करणे रजःप्रबन्धे ।
विकलेन्द्रियतां यता जनानां
व्यवहारोऽङ्गुलिय मुद्रया विना ।। ६०

विषमीश इवोदधेरथासीद्
ववृधे विष्णुरिवाम्बरे परागः ।
चतसृष्वपि दिक्ष्वसौ मुखानि
प्रथयामास यथा पतिः प्रजानाम् ।। ६१

असितः क्वचिदन्यतोऽवदातः
कपिलं क्वापि कषायितः कुतोऽपि ।
बहुवर्णतया गिरस्थलीनां
व्यसरद् व्योमनि वाहिनीपरागः ।। ६२

पलितङ्करणा न निर्जराणां
　　जगदन्धङ्करणेन च व्यराजि ।
परिपाण्डुरुचा नभःपयोधौ
　　रजसा लम्भितफेनडम्बरेण ।। ६३

बलनिध्वनिभारभीतवेधः
　　क्षुभिताधारकुशेशयोऽर्थितेन ।
रजसा सरसासवः श्रुतासौ
　　बलरेणुर्व्यवृणीत सामरस्यम् ।। ६४

मुखमास्त गिरा स्वयं स्वयम्भूः
　　सकलद्वीपगते चमूपरागे ।
कमलाकरमस्य नाभिवापी -
　　कमले तत्र कवाटबन्धनेन ।। ६५

प्रसितारिकणाः परस्परास्त्रो -
　　पलघातादधिरूढसत्यलोकः ।
परमाणव एव रेणवस्ते
　　विदिताः पार्थिवतैजसा विधातुः ।। ६६

पटलं रजसां प्रसूनमूलं
　　क्षतजेन क्षरता रणक्षतानाम् ।
निबबन्ध निजान्तसान्द्रसन्ध्योः
　　परिपर्यस्तपयोदपङ्क्तिकानाम् ।। ६७

उपरिस्थितमेघरेणुचक्रा -
　　रुधिरौघा दधिरे युधि क्षतानाम् ।
उरुगैरिकरागरञ्जितानां
　　समरप्रावृषि संगमं नदीनाम् ।। ६८

व्यजितासुभिरुद्भटैर्वधूनां
　　युधि कीलालभरोक्षिता भटानाम् ।
क्षितिरुच्छ्वसितेव रेणुमूर्च्छा
　　तमसा सैन्यभरोद्भवेन मुक्ता ।। ६९

वरराघववाहिनीचराणां
प्रसभोन्मूलितपादपच्छलेन ।
विततार वितानमायुधानां
विविधानां स्वयमेव भूतधात्री ।। ७०

धनुरुद्धतयातुधानमुक्तै -
र्विशिखैर्गाढविपाटिता जनेषु ।
वदनेष्वरुणेषु वारणाना-
मविभाव्या रुधिरप्रवृत्तिरासीत् ।। ७१

चलिताभरणेषु गाढघण्टा
वरटङ्कारिषु रक्षसामिभेषु ।
उपरोधितरोदसीकमुद्य -
न्हरिनादो हरिनाद एव जज्ञे ।। ७२

गजमाशु गण्डशैलैः...............
गिरिभिः कृपरिणो रणैस्तुरङ्गात् ।
प्लवगा दशकन्धरध्वजिन्याः
प्रहरन्ति स्म शिलाभिरायुधीयान् ।। ७३

कलये नवकाञ्चनप्रकाशं
कपिसैन्यं क्षणरोचिषां कदम्बम् ।
परिभग्नपलाशषण्डमध्यात्
प्रतिपेते हि शिलाप्रदीप्रपञ्चैः ।। ७४

प्रतिपक्षधनुर्गुणप्रमुक्ताः
परिपेतुर्विशिखाः प्लवङ्गमेषु ।
मधुपा इव सिद्धमागसिन्धोः
कनकाम्भोरुहकाननान्तरेषु ।। ७५

रिपुखड्गनिपातलब्धमूर्च्छा
पतिता क्षोणितले प्लवङ्गमा ये ।
अविलम्बमुदश्वसन् पुरस्ते
सुरमुक्तैः कुसुमैः सुधारसार्द्रैः ।। ७६

समृधेषु समुद्धृतेषु तत्र
　　प्लवगा वन्यपलाशिमण्डलेषु ।
पुनरुद्धरणाय वेतनाना -
　　मुदजृम्भन्त पलाशकाननानाम् ।। ७७

पृथुलैरुपलैः प्लवङ्गमुक्तैः
　　क्षुभितोऽभूत् कुणपाशिनामनीकः ।
न तु नीतिमतां कुलं तिरश्चां
　　बलमेषां दृढमायुधं यदात्तम् ।। ७८

विटपिव्रजमार्गवेल्लिताङ्गं
　　लतिकाभिः परितुष्य राक्षसेषु ।
शरवर्षिषु गण्डशैललक्षं
　　हरयः प्राहरणं प्रयुञ्चते स्म ।। ७९

प्लवगप्रहितोपलक्षिताना -
　　मधिगात्रं दशकण्ठसैनिकानाम् ।
रुधिरस्स्रुतिरुल्ललास सान्द्रा -
　　तटिदम्भोदकदम्बजृम्भितेव ।। ८०

दशकण्ठभटेरितैः पृषत्कैः
　　दलिताङ्गक्षरितासृजः प्लवङ्गाः ।
सकलेऽपि वपुष्यवाप्तवज्र -
　　च्छविरागा इव सङ्गरे व्यराजन् ।। ८१

परिमण्डलपादपातपत्र -
　　प्रतिपत्त्या शतशः प्लवङ्गवीराः ।
शरव .... शेषमाशराणां
　　समरप्रावृषि वा रथां बभूवुः ।। ८२

सहसारिधनुर्भृतां समूहैः
　　कपिभिर्गाढतरङ्गगीतकण्ठे ।
अपहाय नखानिवापि पूर्णैः
　　विफलैः केवलमायुधं बभूव ।। ८३

पृथुदोर्विटपैर्निशाटसेना
गहनो ग्रन्थिलचर्मपत्रबन्धे ।
विरराज विलङ्घनं विचित्रं
लघु शाखामृगराजकिङ्कराणाम् ।। ८४

शकटोपलसञ्चयं कपीनां
सुलभं प्रापयिता सुवेल एव ।
निधनाय बभूव नैर्ऋतानां
करिणां स्वाश्रयनाशकारणानि ।। ८५

परितः समरे परस्परेण
प्रहृताः प्रक्षरितैरसृक्प्रवाहैः ।
अभवन्न भयेन रञ्जिताङ्गाः
रिपवो लक्षयितुं पृथं न शक्याः ।। ८६

प्लवगक्षणदाचरप्रवीर
प्रहितप्रस्तरशस्त्रजातघातैः ।
उदलासि रजोऽन्धकारितायां
दिवि खद्योतगणैरिव स्फुलिङ्गैः ।। ८७

अहमहमितयेति व्यक्तमारब्धशौर्यं
दृढतरदृषदस्त्राघातदीप्रस्फुलिङ्गम् ।
अपजयजयलक्ष्म्योरन्तरे संस्थितानां
रणमजनि हरीणां राक्षसानां च रौद्रम् ।। ८८

इत्युद्दामवरप्रादकवितासिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयपतेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र पूर्णमगमत् सर्गस्तथाऽष्टादशः ।। ८९

इति रामाभ्युदये अष्टादशः सर्गः ।

एकोनविंशः सर्गः

श्रीमानिवेन्द्रजिद् योद्धुमासदद् विषमाङ्गदम् ।
सज्वराभवमाचष्ट यज्जगद्विषमाङ्गदम् ।। १

अन्तयमकम्

ससारथिं रथं तस्य गांगेयं साङ्गमङ्गदः
बिभेद भीमनिनदो मेरोस्तटमिवाशनिः ।
तातततोतीत तोतीति रोरोरौ रुरुरो ररेः
कुकं कुकं कां कं के को विवेवौ विववाविवि ।। २

स तस्य गदया वज्रशितया युधि ताडितः
पतित्वोदपतद् व्योम काममाधूतकेसरः ।
प्रजङ्घेनोहतोयस्त पत्रिणा सपलाशिना
उद्दण्डशक्तिना रोषशालिना जम्बुमालिना ।। ३

हनूमानभियातोऽभूदन्तकेरहरो यथा
भोगाभोग भुगाभोगा गङ्गभूभङ्गभङ्गभूः ।
भेभृद् भोगाङ्गभृद्भोगी भोगभागाङ्गभागगः
तस्य हस्ततलेनासौ ताडितः स रथोऽपतत् ।। ४

जगत्प्राणात्मना तेन तत्प्राणा समगंस्त
नलं प्रतपनः प्राप लोकानामवधीरणः ।
तथान्तयोश्चावसरलोकानामवधीरणः
चक्षुः प्रतपनस्याशु शरधाराभिवर्षिणः ।। ५

वीरभद्रो भगस्येवं बिभेद स महाहवे
विहाय सामविभवं विकृतो युधि बोधयन् ।
विहाय सामविभवं विघसोरिघसोऽजनि
ऐन्दवेनेव महसामैन्देन मिथिलं तमः ।। ६

वज्रमुष्टिमयं दिक्षु दृष्टिरोधकमष्टसु
तृणोपमं तद्विविदे द्विविदेन स्वजीवितम् ।
रिपौ यदुच्चापेतेन पेतेनगशिलामुचा
क्षिप्ताम्बरावे शिखरं शिखरं द्विविदो गिरेः ।। ७

अशनिप्रभमानीकमानी कपिरपातयत्
दूषितस्तस्य सौवर्णः क्षतजैरुक्षितो रथः ।
सौमेरव इव प्रस्थे सन्ध्यारागेण रूषितः
युध्यमानो निकुम्भेन कुम्भेन इव भावयन् ।। ८

रेजे नीला यशोभासा सशोभाभिर्मनस्विनाम्
सुषेणं स्वरथे भग्ने विद्युन्माली धनुष्यपि ।
अशन्येव घनः शैलं जघान गदयोरसि
गवाक्षो दलितो येन गवाक्षोदकृतास्त्रिणः ।। ९

निरास्थास्त्वं गमस्यासु निरास्थस्त्वन्नयं दिवि
गजेन गर्जता गाढमवगाढमदोद्गिरा ।
चुक्षभे तत्क्षणोत्क्षिप्तशतपत्रारिवाहिनी
चक्रे परीन्द्रपारीन्द्रमूर्ध्वाधःपाटलं घनात् ।। १०

गगनादेन नादेन शरभो रणकाननम्
नखरान्नखरीकृत्य केसरं धूसरं धुवन् ।
केसरीकृतसंरंभो बभञ्ज रिपुकुञ्जरान्
..............बलीचक्रेवलीनभीः ।। ११

नलं कोद्यनलं जीवनलं सत्त्वेन लङ्घितुम्
पनसो मनसोऽप्युच्चैर्दुद्राव द्रुतमाहवे ।
नैर्ऋत्ता नखरास्त्रेण येनापनसतां ययुः
कुमुदेन प्रपद्याजि कुमुदेनसि रक्षसि ।। १२

कुमुदेन यथापेते कुमुदे नगहारिणा
अन्येऽपि च त्रयत्रिंशत्कोटिदेवांशसम्भवाः ।
सपद्योघमितान् शत्रून् प्रजघ्नुर्युधि वानराः
रक्षः शिरांसि चिह्नानि जानकीजानिसायकैः ।। १३

हरीणां राजताब्दाश्चक्रिरे रणकानने
　　अग्निकेतुप्रभृतिभिश्चतुर्भिरिव पावकैः ।
तीव्रहेत्युत्करैस्तेपे रामेण तपनो वने
　　नीतः खगैरग्निकेतुरग्निकेतुरिवोद्धतः ।। १४

यशः सुधारश्मिकेतुरश्मिकेतुरणस्य च
　　रामो ममाथाऽमित्रघ्नो मित्रघ्नं मित्रवत्तपः ।
यथेश्वरं यज्ञकोपं यज्ञकोपमपूरयत्
　　पापो पप्ताः पपूः पाप रुरोररि रुरोररः ।। १५

ममौ माम ममा माम ताती तत्ती तती ततुत् ।

प्रवाल पाटलोदग्रभुजशाखाविशोभिनी
　　सुग्रीवेणानलेनेव चोदिता हरिवाहिनी ।
न तामरारामता न तार भाररभारता
　　मदादपापाददाम रावणा ररणावणा ।। १६

सर्वतोभद्रः

हालाहलानलज्वाला कोलाहलकरौजसाम् ।
वनौकसां शिलाभिन्न वासतेयीचरोरसाम् ।। १७

सारसावहसारापयातामदपामरा ।
मानरा दुरितापेता नापीडा जननी हि वा ।। १८

वाहिनी न जटापीना तापेतारीदुरानमा ।
रामपादमदायापसारा साहवसारसा ।। १९

प्रभूतकुमुदामोदा पूर्णताराधिपो यथा ।
शमितारिणानन्दा शाखामृगवरूथिनी सा ।। २०

राघवहितावासा राकानन्दस्य भूरिसावा ।
घनस्वना ससंभूतवन्दनातिररस्य हि ।। २१

अर्धभ्रमकम्

प्रचण्डहस्तप्रोत्क्षिप्तपादपादन्तघातिनः ।
सिन्धुरा इव नीरन्ध्र धातुरागारुणा इमे ।। २२

वानरा महितायाम मदासाररपीरता ।
रेजिरे वदनाभास सा शङ्का विभवेह ना ।। २३

नाहवे भविकाशंसा सा भानादवरेजिरे ।
तारवीररसादाममायाता हि मरा न वा ।। २४

पतिते च गलन्मृत्यू वानरास्ते च मूर्ध्नि ।
कबन्धः कलयाञ्चक्रे ह .... कृतिं युधि ।। २५

स कालिका कालिका सकालिका ततकालिका ।
रणे रसा सारणेर हरिवैररवैरिह ।। २६

पादानुलोमप्रतिलोमम्

कान्दिशीकाः पुनर्योद्धुं कपिभिः नैर्ऋताः परे
क्षणादं प्रत्यवेक्षन्त दोषान्वेषीव दुर्जनः ।
ससार सरणो रामो पतत्याशरवर्धनः
ससार सरणो रामो पतत्याशरवर्धनः ।। २७

समग्रयमकम्

हतानां रक्षसां युक्तैः संपृक्तमिव पाटलम् ।
वपुः क्षालयितुं रेजे प्रत्यञ्चं सागरं रविः ।। २८

असहाभिरिवागामी समीकमवलोकितुम् ।
सरोजिनीभिरभितो मीलिताभिरभूयत ।। २९

असंयुक्तं भविष्यन्तीं विभाव्येव वनौकसाम् ।
तिर्यञ्चो भीरवः सर्वे प्रययुः स्वं स्वमालयम् ।। ३०

जज्ञे रवेः स्वावलोकेनालोकनाशभीजुषाम् ।
शोणाश्मदीप्राकारेण प्राकारेण दिशाभुजाम् ।। ३१

आशङ्क्याभ्येयुषो भावि रामनागास्त्रबन्धनम् ।
पक्षच्छायेव तार्क्ष्यस्य रेजे रक्तातपच्छटा ।। ३२

सायंसन्ध्या नवोदीर्णा व्यक्तद्युतिमिवाश्रिता ।
क्षयं सन्ध्याहवोत्कीर्णा रक्तस्रुतिरिवाञ्चिता ।। ३३

गोमूत्रिका

स्ववंशजस्य रामस्य विशङ्क्येव वृथा व्यधाम् ।
गभस्तिमानस्तगिरेर्भृगुपातव्रतं व्यधात् ।। ३४

सन्ध्यसन्ध्यातपध्वान्तलेखाखध्वजमण्डली ।
रक्ता रक्ता रणक्षोणी रक्षोणी रक्षोत्तरादुभौ ।। ३५

बलोत्कर्षमिवाशङ्क्य रक्षसां रात्रियोगतः ।
चक्रन्तुः पत्रिणः सर्वे गृध्रराजस्य बन्धवः ।। ३६

ततोऽन्धकारातिशयो जज्ञे सन्ध्यासु मेलितः ।
ततोऽन्धकारातिशयोदर्चिर्धूमोच्चयच्छविः ।। ३७

उदित्वराणि सायाह्ने तिमिराणि चकाशिरे ।
रक्षोमूलबलानीव प्रोद्यतानि रसातलात् ।। ३८

घना वनाली शैवाल श्यामलेव तमश्च्छटा ।
जन्यं जन्यमिव द्रष्टुं माया मायान्तराचिता ।। ३९

रात्रिञ्चरप्लवङ्गानां रणोऽभूद् रोमहर्षणः ।
तमन्योन्यजनात्युक्तिगर्वदुर्वारविक्रमः ।। ४०

नखरास्त्रहतोत्कीर्णा नखराग्निकणच्छटा ।
खद्योतिनी न रेजे तत् खद्योतगणवन्निशि ।। ४१

एकवर्णीकृताशेषभावं ते राक्षसभ्रमात् ।
मुष्टिभिः पट्टयामासुः पिण्डिभिर्ध्वान्तमण्डलम् ।। ४२

हेमपुङ्खाः खमुत्प्लुत्य तरसा तरसाशिनाम् ।
सप्ततारपथश्च्छायारोपणारोपणा बभुः ।। ४३

उभयेषां स्वयं मुक्तानल्पशैलशरोत्करैः ।
कठोरोऽभूद्रणकार्मुकल्पकालभयङ्करः ।। ४४

गूढचतुर्थम्

अथावं दक्षिणाः सिन्धोरक्तस्तटविहारिणः ।
मर्कटा महतो रक्षः कर्कटान् वीक्ष्य कातराः ।। ४५

व्योम्नि रक्षो रथोत्क्षेपो व्यभाव्यत वनौकसाम् ।
घटमानविमानं तद्घण्डाघणघणारवैः ।। ४६

पक्षमारुविक्षेपप्रधावत्पामरामराः ।
निपेतुर्नतपर्वाणः प्लवगेषु शिताः शराः ।। ४७

कम्पयन् भुवमम्भोधीन् क्षोभयन् स्तम्भयन्भयन् ।
दलयन् भूधरधरीरुद्ययौ तद्रणध्वनिः ।। ४८

सन्नाससाहिनां भिन्नकाण्डैः काण्डैः कुलान्धसाम् ।
सारसा रामपृतना भूता भीता दिशोऽभजत् ।। ४९

पुण्डरीकोल्बणा गण्डहरिचक्रसमाकुला ।
तत्र पत्रिगणाः क्रान्ताः प्रसस्रूरसृगापगा ।। ५०

समुल्लसच्चामराली मरालीपरिशोभिता ।
चलत्पलाशनालीकनालीकशुलभश्रियः ।। ५१

कवचोच्चयशैवालाः शिरः शालूकशीपराः ।
प्रस्फुरत्पुष्कराः शीर्णहारमौक्तिकवालुकाः ।। ५२

त्रस्तो रक्षोगणो मृत्यु काकुत्स्थापनमानतः ।
धावन् कपिगणश्चक्रे काकुत्स्थापनमानतः ।। ५३

आवृणोद् वज्रदंष्ट्रा नु दृश्यं रक्षःकुलं शरैः ।
लक्ष्मणः केतकीषण्डमुत्कुड्मलमिवाम्बुदः ।। ५४

तेन तापयता तत्र भेन तापयता तदा ।
दातताम यतो भग्नै क्ष्माततताभयता भयात् ।। ५५

मुरजबन्धम्

कालिम्ना दिशि दुर्लक्षान् राक्षसान् रघुनन्दनः ।
ममाऽथ मर्मभिदुरैर्मार्गणैः शब्दपातिभिः ।। ५६

अत्र सायकसायज्ञे तरसा हितसादना ।
दानसातरसा शस्त्रैर्नखसायकसाशये ।। ५७

निरोष्ठ्यमुरजबन्धम्

निवारयत्यपि रघून् राघवे निशितैः शरैः ।
प्रधावितेषु कपिषु प्रजगर्ज निशाचराः ।। ५८

मुञ्चन्निषूच्छटाधाराधाराधर इवायतः ।
यथात्मासौ गुणा रामो रामो रक्षोभिरावृताः ।। ५९

काञ्चीयमकम्

यमशत्रुं यथानागं यमशत्रुं बिभेदसः ।
वज्रीव शैलमूर्ज्वस्वी वज्रदंष्ट्रामपातयत् ।। ६०

कौकः कुकां कुके काङ्क्ककाकिकाको कर्कि ककी।
कैकां किके ककुं कौकः कुका काक ककीः कुकः ।। ६१

महोदरं महापार्श्वं महापार्श्वं महोदरं ।
रुरोध च महाकायं महाकायं महामनाः ।। ६२

सारणं सारणं सिंहं वरणं वारणं यथा ।
तं शुकं तं शुकं श्येनो साविवासा विवाहरुक् ।। ६३

रूपैरग्निशिखारूपैर्जातरूपैर्जगत्प्रभुः ।
स क्षणादात् पर्यणयत् सहसा दिवसात्मना ।। ६४

धीरधाराधराधारराधारोधधुराधुरः ।
धराधररोरोरोधारोधीरारारुधराधरः ।। ६५

स्फारतच्चापविष्फारपरिपूरितकन्दरः ।
अनुवेलं सुवेलाद्रिराचक्रन्द भयादिव ।। ६६

तमोघनेषु तद्बाणैरन्तरा स शतह्रदा ।
अपतद् दिषतां रक्तैरनन्ता स शतह्रदा ।। ६७

अभूतपूर्वो दुर्वारडमरः समरोऽभवत् ।
अङ्गदेन्द्रजितोरुर्व्यां भङ्गमापादयन्निव ।। ६८

इन्द्रजिद्वालितनुजा तनुजातभवो युधि ।
अन्तर्धिं निर्ममे येन मेघेन नलबन्धवत् ।। ६९

अथ प्रताप्य प्लवगान् जन्ये वह्निमयैः शरैः ।
राघवावुरगास्त्रेण बबन्ध दृढमिन्द्रजित् ।। ७०

अहीन्द्रबन्धादन्वीत सोपरागतमोनुदः ।
सहजेन सहामुह्यात् सोपरागतमोनुदः ।। ७१

अनंघनश्रुतिगिरां कृत्स्नस्य जगतोऽपि यः ।
निर्निमेषेक्षणा सोऽपि निपपात महीतले ।। ७२

चक्रिणश्चक्रिणस्तस्य घोराघोरावणिस्तनौ ।
यमन्यमय.................जन्ये सविक्रमः ।। ७३

विष्फार एव पस्फाये विपारेश्च डुढौकिरे ।
तत्रापि कूटयोऽधीन सुत्रामजिदलक्ष्यत ।। ७४

भीषात् कपीन्द्रा मौनेन तेपेतारावशोधिना ।
तादृशौ............................ धिना ।। ७५

विभीषणोपास्य गिरा कूर्चमुत्सृज्य भास्करिः ।
ररक्ष तौ परीवारै राक्षसेभ्यो रणक्षितौ ।। ७६

सालङ्कारहिता तेन प्रविष्टेन्द्रजिता ततः ।
प्रणतो दृढमालिङ्ग्य पित्रा तत्राभिनन्दितः ।। ७७

जयमुद्घोषयामास जम्भजम्भनजम्भनः ।
पिता नवज्वलद्रक्ततोरणं रवितानवत् ।। ७८

निकेतनैर्विलसितं सघण्टाध्वनिकेतनैः ।
तदात्वेन विभीतेन नटनेन च केतनैः ।। ७९

ममाद्यालोकतामक्ष्णामदनालसमानसः ।
वसुधानन्दना साक्षाद् वसुधोत्पलगन्धिना ।। ८०

अतालु

वक्षः सज्जीभवद् वोढुं मैथिलीस्तनमण्डलम् ।
कैलमात्रं ममामंस्थाः कन्योद्गौरवादपि ।। ८१

लब्धायामद्य तु मया सीतालिङ्गनसम्पदि ।
पालयेयं दयायोगात् तत्सम्बन्धेन मानवान् ।। ८२

अमूर्धन्यम्

इत्युद्यत्पश्यतस्तस्य पुलकप्रियकाङ्कुराः ।
सीतापयोधरालोक स्मरणादपि जज्ञिरे ।। ८३

प्रायेण कृतपापाशा पाशाकृष्टो यमस्य सः ।
आयतोष्म निशश्वास पाशाकृष्टो यमस्य सः ।। ८४

तदुत्कण्ठोपरक्तस्य दशकण्ठस्य देहतः ।
पेतुः प्राणरसस्यन्दसन्दिग्धाः स्वेदबिन्दवः ।। ८५

अङ्गानि वेपमानानि मानानि च न तस्थिरे ।
अमुष्य पातयामास न मासं नलमिवेरितुम् ।। ८६

ततः पुष्पकमारोप्य रक्षिणीभिः ससत्वरः ।
सीतायै दर्शयामास मूर्च्छितौ युधि राघवौ ।। ८७

कुररीवावलोक्यात्त कुररीप्सितदिर्दिशत् ।
चक्रन्द सा रुजत्कीशचक्रं दशरथात्मजम् ।। ८८

आर्यपुत्र! तवावस्था त्वीदृशीयं कृपाम्बुधे ।
एतद् यदि यथार्थं स्यादेकोदकमिदं जगत् ।। ८९

यत्कृते भवता सोऽपि यतो हिमकराशयः ।
तान् न पश्यसि किं मा त्वं यतो हिमकराशयः ।। ९०

आरक्तान्ते दृशौ कान्ते हा हन्त मुकुलीकृते ।
मदीयमेवं फलितं मायामृगकुतूहलम् ।। ९१

मायी न चेत् कथं मुक्तविलासी तरसाशनः ।
जीवेद् विशेत् पुरं भूयो विलासी तरसादनः ।। ९२

एवं विलापिनीं देवीं त्रिजटाश्वासयद् गिरा ।
प्रावृत्प्रथमया वृष्ट्या निदाघार्ता महीमिव ।। ९३

दधती जानकीदेहे ससादाशोकभूमिकाम् ।
सा रक्षिणीभिर्भूयोऽपि तदा साशोकभूमिकाम् ।। ९४

राघवं रक्तदिग्धाङ्गं रविमप्युदयारुणम् ।
उभावुदन्वतस्तीरे पश्यतां पातकं दृशाम् ।। ९५

रुधिरारुणदेहेन विभावसुसमानिते ।
संज्ञा किञ्चिदभूत् तत्र विभावसुसमानिते ।। ९६

दशमुखसुतस्यास्त्रैर्गाढं नियन्त्रित विग्रहोऽ -
प्यथ सहभुवं सत्वावष्टम्भमेत्य रघूद्वहः ।
अनुजमवशं दृष्ट्वा पार्श्वे शुचा परवानसौ
व्यलपदिति को वृत्तः संवर्तकाल इवार्णवः ।। ९७

समरसहितकान्ता काममाश्वासनीया ।
विवशमतिशयाने त्वय्यहीनास्तभाना ।। ९८

सहसाविपिनानुसारिणं त्वा -
मनुगम्यानृणभावमाश्रयिष्ये ।
वितथः समयोऽस्तु वानराज्ये
विमतस्याशुकृतो विभीषणश्चेत् ।। ९९

प्रतियोगिहरीन्द्र भासते
सः यः किं न तवैष पूरितः ।
प्रतियाहि हरीन्द्र! भासते
बलिता ध्वान्तमिव द्विषद्बलम् ।। १००

प्रलयोऽयमाकाण्ड एव मे
प्रभवेत् को नु विलङ्धते विधिम् ।
विरते यदि वत्स! लक्ष्मणो
विलपन् जावति केन राघवः ।। १०१

इत्थं पुनर्विलपतो रघुनाथसूनो -
मूर्च्छा बभूव निहतामरनाथसूनोः ।
तत्रेन्द्रजित्समतनुच्छविभीषणेन
तं वीक्ष्य तादृशमशोचि विभीषणेन ।। १०२

तादृक्षौ परिवार्य तौ कपिबले तत्र स्थिते तत्क्षणात्
दीप्तिः खे निजवैद्युतीव महती निर्घोतनिर्घोषिणी ।
किञ्चोदञ्चितकल्पकालमरुदुत्क्षिप्ता इवाम्भोनिधौ
भूयः सेतुनिबन्धनभ्रमकृतः पेतुः शतं शाखिनः ।। १०३

किमेतदिति वानरैक्षतभया निमेषेक्षणैः
पुनर्दिवि सुधाचलभ्रमचला निमेषेक्षणः ।
स तत्र समरक्षितिक्षुभितचेतनागान्तकः
समुद्धत गुरुध्वनिः समुदियाय नागान्तकः ।। १०४

पक्षीन्द्रः परिकृष्टमेषपटलः क्षित्यां निपत्याम्बरात्
क्षिप्ता राघवनागबन्धममृतोर्द्रेण स्पृशन् पाणिना ।
तावाश्वास्य तथागतं तरुशत प्रोत्क्षेपपक्षानिल -
व्यादीर्णार्णवगर्भनिर्भरभयाविद्धाङ्घ्रिरुद्धावितः ।। १०५

हरिजितोऽरिजितो हि निबन्धनै -
र्न रहितो रहितो रघुनन्दनः ।
सरविणा रविणामुपमां ययौ
समरतोमरतोषकरो द्विषाम् ।। १०६

ध्वनिघुमुघुमूमिशं धन्वधून्वन्तमेनं
पुनरपि युधि दृष्ट्वा दुःखितानन्दतन्त्राः ।
द्विगुणितभुजदूरास्फोटनाम्रेडितानि
व्यधिषत हरिवीरा क्ष्वेडिताम्बराणि ।। १०७

नित्यश्रीः सुकृताशयो भृशतयाशोभी द्विषां मर्दयन्
सक्षेपिप्रकृतिस्यदा रिपुगणेनाभावसङ्कल्पकः ।
सच्चाण्डिम्नि भरे हितो विशद सप्रीतिर्दिशो वेष्टय-
न्यन्ताम्भोनिलयं ससार समरे यो धन्वकम्पाश्रयन् ।। १०८

दलत्कूलगिरिस्खलत्सुरकरित्र्युट्यदद्युसरणि-
स्फुटद्गिरिणि च त्रसद्युसरिदक्रमः समदभूद् ।
रघूद्भवपितुर्धनुर्ध्वनिभरः ....
.... ।। १०९

ससौरिरासार रसो रुरा रसा
रसा स सारीरसिसारसोराः सा ।
सा ससंसारसिराः सरसु सूरः
ससूरस्सरससरसः ससार ।। ११०

सदा धनरसोल्लासो भावभिन्ननगान्तरः ।
महाहीरप्रियो गौरसगो...............बभौ ।। १११

अर्थचतुष्टयम्

चङ्कारायनगुम्भनो नतमहश्रीकण्ठितं दर्शयन्
वृत्तं मायिजसान्तरसुहृत्क्षेमावहो धोरुजत् ।
पद्माय स्वयप्रतिस्फुरदसिं ....
........गायतमोचनेन परमा चण्डांशुवृत्तोदयम् ।। ११२

तदिषु शकलितानां संयतीवोद्गतेन
क्षतजजलभरेण क्षालितध्वान्तपङ्का ।
विरतिमुपगतासी....................
...........मुखसेनासम्मदेन त्रियामा ।। ११३

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयपतेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽयमेकरहितः सर्गोऽगमद् विंशतिः ।। ११४

इति रामाभ्युदये एकोनविंशः सर्गः ।

विंशः सर्गः

अथोद्यति श्रीमति रामनाम्नि
विवस्वति व्यालविपत्तिमुक्ते ।
......................प्रमदं प्रपेदे
वरूथिनी तत्र वलीमुखानाम् ।। १

मदावलेपप्रमशाय तेषा -
मङ्गैश्चतुर्भिः सह राक्षसेन्द्रः ।
धूम्राक्षमायोधनधूमकेतुं
स प्राहिणोदप्रतिमप्रतापः ।। २

प्रहन्यमानः परिपातिताभिः
शिलाभिरस्त्रैश्च परस्परेण ।
प्लवङ्गरक्षप्रवरौ प्रपन्नौ
जयं च भङ्गौ युधिपर्ययेण ।। ३

तनूमता संयति वायुनेव
हनूमता कापि शिलाप्रयुक्ता ।
वेगावतीर्णं रथिनं पुनस्तं
व्यपास्य तस्याशु रथं बभञ्ज ।। ४

अभिद्रुतस्याऽस्य गदाप्रहार -
मचिन्तयन्मूर्ध्नि स सत्त्ववेगात् ।
निपातयामास महीध्रश्रृङ्गं
तमप्यवन्या मरुतस्तनूजः ।। ५

रणस्थितैः शोणितमांसकूटै -
स्तथा निरुद्धा कपिराक्षसानाम् ।
यथा क्षरद्गैरिकनिर्झराणां
समानतां सानुमतां लभेत ।। ६

निशम्य धूम्राक्षवधं नियुक्तो
नेता बलौघैः सह वज्रदंष्ट्रः ।
अवापदध्यासितमङ्गदेन
द्वारं पुरस्यास्यमिवान्तकस्य ।। ७

दन्तैर्नखैर्जानुभिरंसकूटै -
ररत्निभिः संहतलैः शिलाभिः ।
महीरुहैश्चैव महीध्रश्रृङ्गैः
प्रजघ्निरे वैरिषु वानरेन्द्राः ।। ८

परःशतैः पट्टसशूलपाश -
परश्वथप्रासकृपाणबाणैः ।
अन्यैश्च रक्षोभिरपि क्षतास्ते
भयाकुला वालिसुतं प्रपन्नाः ।। ९

प्रयुक्तसालच्छिदुरैः पृषत्कै -
स्तथा क्षतो मर्मणि वालिसूनुः ।
अताडयद् भग्नरथं मनस्वी
महाभृतां मूर्धनि वज्रदंष्ट्रम् ।। १०

निरस्य मूर्च्छाङ्गदयांगदस्य
स राक्षसो वक्षसि सञ्जघान ।
ततः क्रुधा निष्ठुरमुष्टिघातै -
र्नियुद्धमेतौ निरवर्तयेताम् ।। ११

कल्पान्तविश्रान्तघनाघनौघ -
निर्घातघोषं निचकार धीरः ।
गिरीर्दरीणां दलयन्नुदस्थात्
समुद्धतस्तद्भुजयुद्धघोषः ।। १२

परस्परावाप्तजयावभङ्गो
प्रवर्त्यमानेऽप्युभयोर्नियुद्धे ।
निःशङ्कमुत्प्लुत्य कपिप्रवीर -
श्चिच्छेद तस्यैव शिरः कृपाण्या ।। १३

प्रचोदितः पङ्क्तिमुखेन पश्चा -
दकम्पनः कम्पयितामराणाम् ।
विनिर्ययौ तत्र रथी बलौघैः
युगान्तपूरैरिव वारिराशिः ।। १४

उल्काभिरुद्दीपितहस्तदीपाः
शिवाशताम्रेडितसिंहनादाः ।
तमन्वयुर्मन्यजुषः सहोष्ट्रै -
परिस्फुरद् वामदृशः पलाशाः ।। १५

तथा परागः स्थगयाञ्चकार
जगन्ति रक्षःपतिवाहिनीनाम् ।
परावरज्ञानमृते यथैषां
परस्परस्याजनि संप्रहारः ।। १६

शिलास्त्रसंघट्टघणात्क्रियाणां
सिंहध्वनीनां च बलद्वयस्य ।
न शक्तिरासीत् पदमप्यपैतुं
प्रसृत्वरेऽन्धङ्करणे परागे ।। १७

वलीमुखैर्वन्यतरुप्रहारान्
निरस्यमानेषु निशाचरेषु ।
विडम्बिताम्भोदरवं प्रकोपात्
अकम्पनः कार्मुकमाललम्बे ।। १८

अकम्पनप्रेरितबाणविद्धाः
खमुत्प्लुताः काननचारिणस्ते ।
अकाण्डदण्डाभिहतोऽर्थिताना -
मसूत्रयन् भोगभृतामवस्थाम् ।। १९

अस्त्राहतास्तत्र हरिप्रवीराः
प्रधावमानाः परितो दिगन्तान् ।
समीरसूनुं शरणं समीयुः
समीहमानाश्च पुनः समीकम् ।। २०

भुग्नं नगाग्रं भ्रमयन् भुजेन
　　मध्नन्निवाकाशमहाम्बुराशिम् ।
अकम्पनस्याभिमुखं चचाल
　　प्रकम्पनस्य प्रबलस्तनूजः ।। २१

शरौघवर्षैर्विमतस्य तस्मिन्
　　विचूर्णिते तूर्णतरं महीध्रे ।
जहार तस्याङ्घ्रितलप्रहाराद्
　　रथीति वार्तामपि वायुसूनुः ।। २२

आपुङ्खमग्नैरनुलोमकूपं
　　जग्राह तस्येषुभिराञ्जनेयः ।
शल्यस्य लक्ष्मीं शललोत्तरस्य
　　प्ररूढवीरुत्प्रसरस्य वाद्रेः ।। २३

स रक्तदिग्धाङ्गतया दधान
　　स धातुनिष्यन्द गिरीन्द्रशोभाम् ।
ममाथ तं मर्मसु ताडयित्वा
　　महीरुहान् येन मरुत्कुमारः ।। २४

अकम्पनं प्रेक्ष्य हतं हरिद्भ्यः
　　सन्त्रस्यतां राक्षससैनिकानाम् ।
संजज्ञिरे सर्वगणाः समित्यां
　　सर्वोऽपि मोघः शरदीव मेघाः ।। २५

अथोत्थिः प्रेक्ष्य पुरस्य गुप्तिं
　　निरोधनं चारिकृतं दशास्यः ।
प्रचोदयामास रणोद्यमाय
　　त्रिभागसेनाधिपतिं प्रहस्तम् ।। २६

सशङ्खनादैर्भुवनं समस्तं
　　निर्याणनिस्साणरवैर्निरुन्धे ।
स निर्ययौ कुम्भहनु सहायं
　　कृत्वा महानादनरान्तकेन ।। २७

प्रभूतमुत्पादमचिन्तयित्वा
प्रविष्टसंग्रामभुवं प्रहस्तम् ।
विभीषणो वीर्यवतां धुरीणं
प्रदर्शयामास रघूद्वहाय ।। २८

प्लवङ्गरक्षोबलयोः प्रतूर्ण -
मेकार्थवध्वानमिवा दधानः ।
काण्डैः प्रकाण्डैर्नखरैः खरैश्च
मुष्ट्या च मुष्ट्याचरणो बभूव ।। २९

उत्पाट्य श्रृङ्गाणि भुजैर्गिरीणा -
माघूर्णयन्नुन्मणिरक्तचक्रम् ।
ददादिवायोधनदेवतायै
नीराजनं वा नरलोकवीरः ।। ३०

परस्परास्फालनपाटितानां
परम्परालोकमहीरुहाणाम् ।
रक्तप्रवृत्ती रजसः स्वभावः
कृशोदरीणामपि किंवदन्ती ।। ३१

सविस्मयो यत् समरस्थलीनां
रक्तैरपास्तो रजसः प्रभावः ।
रराज सा राक्षसवानरौघैः
संग्रामभूः शोणितदिग्धगात्रैः ।। ३२

वसन्तवेलावनमेदिनीव
कङ्केलिभिः कन्दलितप्रवालैः ।
व्यापादितानेकपवप्ररुद्धा
रक्तातपाश्चामरराजहंसाः ।। ३३

वीराननव्यञ्जितपद्मषण्डाः
सङ्खे वहन्ति स्म समांसपङ्का ।
वीराः शरप्रस्तरविद्धशेषैः
प्रगृह्य हस्तैः फलकोडुपानि ।। ३४

आस्रापगा हस्तिवरान्तरीप
प्रतिस्खलद् वेगवतीः प्रतेरुः ।
कूलङकषस्रोतसि रक्तसिन्धौ
मग्नोत्थिता राक्षसवानरेन्द्राः ।। ३५

संस्मारयन्ति स्म निवापदा........
..............................पुंसः ।
द्रवन्निपेते द्विविदप्रयुक्तं
न भागरुग्णेन नगान्तकेन ।। ३६

हत्वा महानादमपि प्रपेदे
नादो महानृक्षकुलेश्वरेण ।
रणप्रवेशो रविमानरोधी
परिक्षरल्लोहितदिग्धगात्रः ।। ३७

शाखामृगी सद्रुममीरिताभिः
शिलोच्चयोऽभूदपरः शिलाभिः ।
गम्भीरवेदीव करेण नीलः
कुम्भी तरुं भग्न................ ।। ३८

दृष्ट्वा तमग्रे निहतं दिदीपे
प्राणेष्विव स्वेषु हतः प्रहस्तः ।
स धन्वना मण्डलितेन वेगात्
परिभ्रमन् पातितबाणवर्षः ।। ३९

आविश्चकार ध्वनितो गभीर -
मावर्तवृत्तेः समराम्भुराशेः ।
निध्नन्तमग्रे निखिलान् प्लवङ्गान्
निरीक्ष्य नीलः कुपितः प्रहस्तम् ।। ४०

जिघत्स्युरुद्यन् जगतां त्रयाणां
युगान्तकालाग्निरिवोज्जिजृम्भे ।
प्रचोदितस्यन्दनसैन्धवेन
तस्मिन् प्रहस्तेन शराः प्रमुक्ताः ।। ४१

कृत्वापदानं किमपि प्रविष्टा
व्रीलादिवानम्रमुखां धरित्रीम् ।
समूलमुत्पाट्य तरुं महान्तं
सत्ताडितः पावकिना सरोषम् ।। ४२

भुजङ्गभीमान् भुजवीर्यशाली
प्रायुङ्क्त बाणप्रकरान् प्रहस्तः ।
आसारपातानिव तालपेता -
नावर्जयस्तुण्डमखण्डसत्त्वः ।। ४३

समीरसिन्धोस्तनयस्तरस्वी
वृषेव सेहे विनिमीलिताक्षः ।
अताडयद् भग्नरथाश्वधन्वा
फाले सनीलं मुसलेन मूर्खः ।। ४४

सगण्डशैलं परिपात्य मुण्ड -
मखण्डयद् रावणदण्डभर्तुः ।
अत्याहितं दम्भगते विकल्पै -
रपोढनागैर्युधि यातुधानैः ।। ४५

प्रविश्य लङ्कां पृतनाधिपस्य
निशामितोऽभूद् निधनं दशास्यः ।
वरूथिनी नाथवधप्रकोपाद्
देदिप्यमानस्य दशाननस्य ।। ४६

स्ववैरिसेनां स्वयमेव हन्तुं
यियासतोऽताड्यत यानभेरी ।
सन्नाहमह्नाय शशंस तस्य
दिङ्नागकर्णज्वरदानशौण्डः ।। ४७

पर्यायकल्पः फणिलोचनानां
निर्याणनिस्साणभवो निनादः ।
जुघूर्णरर्णांसि महार्णवानां
प्रघूर्णमुद्घूर्णनगं चतुर्णाम् ।। ४८

ददंश दिक्सन्धिषु दारवद्यौ -
दशाननोद्यामबलप्रणादैः ।
हयैरहेषि द्विरदैरबृंहि
रथैः समक्रीडि भटैरभाषि ।। ४९

अगुञ्जि गुञ्जाभिरभञ्जि भाण्डै -
रघट्टि घण्टाभिरनीकिनीनाम् ।
आकालिकानामि कालिकानां
निकारिणीभिर्जयकाहलीभिः ।। ५०

कलाभिराकालि कलालशौर्य -
कलासकेलीरसकारणीभिः ।
अस्त्रादिभिर्जातिभिरायुधानां
विस्तारयन्तो विजयप्रलापान् ।। ५१

क्ष्वेडारवैः क्षोभितराशि.............
क्रीडाकरैस्तत् सुभटा विचेरुः।
शताङ्गमुत्तुङ्गघोष........
तरङ्गिताकाशमथाधिरूढः ।। ५२

वलाहको हाटकश्रृङ्गिणीव
रराज राजा रजनीचराणाम् ।
निष्क्रम्य राजा निजराजधान्या
निशामयामास बलं कपीनाम् ।। ५३

उल्लासमूर्च्छालयुगान्तसिन्धु
कल्लोललीलासकटङ्करीयम् ।
नागध्वजं नागशिरोऽधिरूढं
प्रकम्पनं कम्पनभाजिभाजाम् ।। ५४

आबद्धसिंहध्वजमात्तचापं
रथस्थितं राक्षसराजसूनुम् ।
छाया निकायाधिगतत्रियामा
मायाधिकोऽयं वपुषातिकायम् ।। ५५

महोदरं मत्तगजाधिरूढं
सहोदरं चक्षुषि चण्डभानोः ।
प्रघूर्णितप्रासमुदीर्णभासं
प्रचोदिताश्वं परितः पिशाचिकाम् ।। ५६

वृषाधिरूढं विषमारुणाक्षं
त्रिशूलमुग्रं त्रिशिरस्कमुग्रम् ।
कुम्भं च कुम्भीनसराजकेतुं
स्तम्भं भुजोत्तम्भितचापचक्रम् ।। ५७

निकुम्भमालम्बितहेमघण्टं
प्रघूर्णयन्तं परिघं भुजेन ।
पुरान्तकं नाम गजेन्द्रसत्त्वं
सुतान्तकं स्वामिहिताग्रगण्यम् ।। ५८

अन्यांश्च सैन्यान् समराम्बुराशौ
हलाहलाग्नीव विदीप्यमानान् ।
इक्ष्वाकुवंशाभरणाय जज्ञे
प्रदर्शयन् पङ्क्तिमुखानुजन्मा ।। ५९

कस्यायमूर्ध्वस्वकटाहभेदी
कोलाहलं कोऽपि कपिर्जगाहे ।
क एष पश्योपरि कौणपाना-
मैरावतो मेघ इवाम्बुदानाम् ।। ६०

पृच्छन्तमेनं युधि पत्युरह्नां
कुलोद्वहं तत्र कुतूहलेन ।
आजन्मपौलस्त्यकथामशेषां
विभीषणः प्रक्रमते स्म वक्तुम् ।। ६१

इतस्त्वया राघवदृष्टिपातः
प्रकल्प्यतां पद्मवनाभिराम ।
आकर्णितेष्वेष्ववदानदाना -
दनुग्रहं मय्यवधारयेथाः ।। ६२

पुरा बलोत्कर्षनिदर्शनाय
महोरगेन्द्रो मरुता विवादीत् ।
मेरोरवष्टम्भयति स्म शृङ्ग -
माभोगिनीभिः फणमण्डलाभिः ।। ६३

प्रकाश्य तद्भङ्गकृते प्रतिज्ञ -
प्रचण्डवृत्तिः प्रववौ नभस्वान् ।
आशापतीनां नगरेषु कुर्व -
न्नारूढसन्देहपदामवस्थाम् ।। ६४

मुहुर्महुर्मूर्च्छति मारुतेऽस्मिन्
अकाण्डविश्वक्षयविक्लबानाम् ।
एकां पणामेषणयामराणा-
मुच्चिक्षिपे किञ्चिदिवोरगेन्द्रः ।। ६५

भक्त्ता तदब्धौ मरुतापविद्धं
तदेव लङ्कापुरमत्र पूर्वम् ।
रक्षःकुलं तत्र रसातलस्थं
समाल्यवन्मालिसुमालि तस्थौ ।। ६६

तत्राहवे मालिसुमालिनौ तौ
हत्वा महेन्द्रावरजः कदाचित् ।
रसातलं माल्यवति प्रविष्टे
यक्षेश्वरं राज्यपतिं चकार ।। ६७

अन्या पुनः काचन कैकसीति
ख्याता पितुर्माल्यवतो निदेशात् ।
अभ्यर्थ्य लेभे दया दशास्य -
वीतं सुतं विश्रवणान्महर्षेः ।। ६८

सा कुम्भकर्णं तत एव लेभे
विभीषणं मामपि वीरसिंह! ।
मातामहेनापि वियन्त्रयोऽपि
पातालोके परिपालितास्म ।। ६९

मातामहोक्त्या तपसा प्रसाद्य
पितामहं पूर्वजयोर्ममैकः ।
अवध्यतां प्रापदुपेक्ष्य मर्त्या
निद्रां ततोऽन्यं किल नित्यदटेति ।। ७०

वरप्रदानाद् वनजासनस्य
प्रतापमत्यर्कमनुप्रपन्नः ।
वजित्य वित्तेश्वरमध्यवात्सी -
ल्लङ्कामिमां राक्षसचक्रवर्ती ।। ७१

निर्जित्य दोष्णा युधि निर्जरेन्द्रं
लङ्कापुरं यः करदीचकार ।
छत्रं यशोराशिमिवेन्द्रलक्ष्मी -
वैतण्डिकं यो वरुणाद............. ।। ७२

विमानसेनापि विमानसेन
सख्यापि शम्भोरसहतयः स्मै ।
न ज्यायसापि द्रविणेश्वरेण
कनीयसेऽदीयत पुष्पकं तम् ।। ७३

येनोद्धतो बाहुभिरुद्धतेन
रु.................ण ।
उत्तम्भितः सौध इवोल्ललास
कालायसस्तम्बकदम्बकेन ।। ७४

फणीन्द्रभोगप्रतिमैर्यदीयैः
करैरुदस्तः कलधौतशैलः ।
....
......गङ्गामिव लक्षितोऽभूत् ।। ७५

किञ्चित्पदाङ्गुष्ठनखाग्रवृष्ट्या
क्षित्याचले शूलिनि रक्षणार्थात् ।
हता हता मातरिति प्रलापि
पाताललोकेऽपि पदं न लेभे ।। ७६

सैन्यः सदैन्यः क्षुभिते प्रहस्ते
विश्वेशमाक्रन्दितमेघनादे ।
आतोद्यमासाद्य करं परं यः
शम्भोः प्रियं साम जगे तदानीम् ।। ७७

गीते गिरीन्द्राक्रमगद्गदेऽपि
क्लृप्तादरो यस्य कृतागसोऽपि ।
भूतेन केनाप्युपहूय भूयो
दिदेश देवः खलु चन्द्रहासम् ।। ७८

छिन्नैः शिरोभिः स्वयमेकशेष-
मभ्यर्चितो यस्य हरप्रसादात् ।
दिदेश दिक्पालिकदीर्घमूर्ख -
सार्धं त्रिकोटीश्वरदन्तमायुः ।। ७९

विसर्जितोऽप्येत्य पुनर्ययाचे
विष्णोर्गिरा विप्रतनोः शिवं यः ।
कोट्यर्धवर्षं परमायुषो मे
देहीति देवो न तथान्वगृह्णात् ।। ८०

नारीति गौरीमनभिप्रणम्य
नन्दीशमाक्षिप्य च वानरास्यम् ।
विवेश लङ्कां विधिना स्वयं यो
नार्या प्लवङ्गेन च नाशमेष्यन् ।। ८१

वीतारिसंस्फोटतया विसर्पन्
दोर्दर्पदर्पश्वयथुर्यदीयः ।
मम न किञ्चित् कृतमर्मघातै -
र्दन्तप्रहारैरपि दिग्गजानाम् ।। ८२

यस्यैकवीरस्य यथेन्द्रलोक
बन्दीविलापा बहुलाश्रुपाताः ।
सुखावहास्तुम्बुरुनारदादि
संगीतरागा न तथा श्रुतीनाम् ।। ८३

स एष राजा रजनीचराणां
विधे रवेर्विन्ध्य इवोपरुद्धः ।
अन्तर्ज्ज्वलद्धूमपरीतमूर्तिः
कल्पाग्निरित्यक्षिरुचा न मेघः ।। ८४

इत्येवमिक्ष्वाकुकुलप्रदीपो
विशुद्धभावेन विभीषणेन ।
निवेदितं प्रेक्ष्य निशाचरेन्द्रं
वीराग्रणीर्विस्मयमाससाद ।। ८५

नानाविधैर्नैर्ऋतवीरवर्गै -
रासेवितो मेरुरिवावनीधध्रैः ।
दशाननोऽदृश्यत सागराणां
कल्लोलकूटैरिव कल्पकालैः ।। ८६

निधाय मूलं निजराजधान्यां
त्रासं च चेतः सुवलीमुखानाम् ।
निजाहवोत्कर्षनिरीक्षणार्थ -
मादिश्य चान्यान् रणमाविवेश ।। ८७

क्रोधानुविद्धः कुहनावराहो
वारामुरं प्रागिव वानराणाम् ।
विक्षोभयामास बलं गभीरं
रक्षोऽधिराजो रणडम्बरेण ।। ८८

आलोकमात्रादपविद्धवृक्ष-
मालोक्य सुग्रीवमसावमृष्यन् ।
कल्पानिलस्तूर्णमिव प्रतूर्ण
चिक्षेप केनापि शिलीमुखेन ।। ८९

विच्छिन्नमूलो विटपीव वेगा -
न्नेता कपीनां निपपात भूमौ ।
हर्षस्वनो मांसभुजाममृष्य
मोहेन साकं मुहुरुज्जजृम्भे ।। ९०

पुङ्खानुपुङ्खैरथ बाणपूगै -
दिगन्तराण्यन्तरधाद् दशास्यः ।
शाखास्वदृश्यासु सुरोचितासु
शाखामृगानर्थवतश्चकार ।। ९१

रामादनुज्ञामवगम्य योद्धुं
यावन्न सौमित्रिरवापशत्रुम् ।
ताद्धनूमान् शरजातमस्य
निस्सार्य हेमन्त इवाजगाम ।। ९२

अक्षद्रमध्वंसपरश्वथो मे
हस्तस्तवोरस्यभिहन्तुकामः ।
इतीरितः पाणितले प्रघातात्
स पातयामास च पेटघातम् ।। ९३

तभ्यर्थितां तामभिगम्य भूयो
मुष्ट्याहतिं मुह्यति वायुपुत्रे ।
नीलं च संप्रेक्ष्य निजास्त्रशक्त्या
रुद्रात्मजः क्रौञ्चमिवोद्बिभेद ।। ९४

स्वरेपितं शैलसमो रुरोज
शरेण यस्तीक्ष्णतरेण यस्मिन् ।
निरास नीलः कृतमालताल -
तमालहिन्तालरसालसालान् ।। ९५

सपादपान् ...नवभज्य भल्लैः
कृशानुसूनं क्षणदाचरेन्द्रः ।
रुरोध रुक्माञ्चितरूपरोप
परम्परापञ्जरबन्धनेन ।। ९६

ततो वपुः सूक्ष्ममवाप्य तस्मा -
न्मुक्तः प्रणादैर्मुखरीकृताशः ।
अभ्युच्छ्रितं केतुममुष्य नीलः
सविग्रहं दर्पमिवाधितष्ठौ ।। ९७

किं केतने तस्य किमातपत्रे
किं स्यन्दने किं मकुटाञ्चलेषु ।
अग्रे किमन्वक् किमधः किमूर्ध्वं
किमिप्यलक्ष्यः प्लवते स्म नीलः ।। ९८

आग्नेयमुद्दिष्टमरातिनास्त्रं
प्रभावसिध्यै किल तत्प्रदातुः ।
विमोहमात्रं विदधेऽग्निसूनो -
र्जातस्य हन्ता जनकः किमुर्व्याम् ।। ९९

ततोऽप्यतिक्रम्य दशाननेन
सौमित्रये सप्तशराः प्रयुक्ताः ।
तेनावलूनाः पथि तिर्यगग्रे
वीर्येच भल्ले विफलानि पेतुः ।। १००

परस्परोदीरित वीरवादौ
परः सहस्रोज्झितबाणपूगौ ।
उभो सपर्यायजयप्रभङ्गौ
युद्धं व्यधत्तां रुधिरोक्षिताङ्गौ ।। १०१

शरासनज्या सशरेण नीतः
परं सनीतः परिभूतिकाष्ठाम् ।
ससर्ज तस्योरसि शक्तिमुग्रां
प्रसेदुषा पद्मभुवा प्रदिष्टाम् ।। १०२

विद्धं तया व्याधितसर्वगात्रं
वेगात् स्वमुत्प्लुत्य पतन्तमेनम् ।
उत्सङ्गयन्तीमुरगेश्वराशं
कृतज्ञभावः क्षितिमाललम्बे ।। १०३

स भर्त्सयन् भूतलतो ग्रहीतुं
दोर्भ्यां तमुत्पीड्य भृशं दुरात्मा ।
हरेः प्रभावत् पदमप्यपैतुं
नतः शताङ्गी न शशाक किञ्चित् ।। १०४

तावद्धनूमान् दृधमुष्टिघात -
　　स्तदित्यपप्तद्धृदये तदीये ।
अदभ्रघोषभ्रमदभ्रधोष
　　निरभ्रदम्भोलिनिपातभीमः ।। १०५

विघूर्णिताक्षं विनिपात्य रक्षः
　　शताङ्गसीम्नि श्लथचापहस्तः ।
ववाम रक्तं वदनप्रवालैः
　　सान्द्रं महः सान्ध्यमिव प्रदोषः ।। १०६

पद्माकरः क्षिप्ततमः प्रबन्धं
　　बालातपस्वर्णमरीचिनेव ।
सलक्ष्मणं मारुतिनोपनीत -
　　मासाद्य रामः परमाननन्द ।। १०७

संज्ञाविपर्यासमयात् तमिस्रा
　　विमुच्यमानो विलसत्प्रबोधः ।
विष्णोः स्वमंशं स विभाव्य लेभे
　　पुङ्खानुपुङ्खं पुरतोऽपि तेजः ।। १०८

अपास्तमोहं प्रभुराशराणां
　　उच्चैस्तमस्ते................. ।
प्रभामिवाह्नामधिपस्य गौरीं
　　प्लवङ्गसेनां प्लवगाधिराजः ।। १०९

अमर्षितं राघवमात्तचापं
　　पृष्ठे हनूमान् पृथूलो दधानः ।
तेजोमयैः पङ्क्ति................
　　.........द्विगुणीं बभार ।। ११०

उत्खाय बाणानुरगेन्द्रभीमा -
　　स्तूणीरगर्भास्त्वरया स रामः ।
सन्धाय मौर्व्यामपकृष्य चाप -
　　मालीढमास्थाय दृढं मुमोच ।। १११

सङ्गं रथं तस्य मनोरथेन
    प्रमथ्य गाढं परुषैः शरैस्तैः ।
स भञ्जयामास दशाननस्य
    मानेन साकं मकुटानि रामः ।। ११२

दन्तावभङ्गादिव सिन्धुरेन्द्रः
    पक्षावभेदादिव पर्वतेन्द्रः ।
कियत् प्रपेदे कृपणामवस्थां
    किरीटभङ्गात् क्षणदाचरेन्द्रः ।। ११३

छिन्नानि भूमौ सहसा शिरोभ्यः
    पेतुः किरीटानि दशाननस्य ।
युगावसाने गगनान्तरेभ्यः
    सहस्रधाम्नामिव मण्डलानि ।। ११४

दिवातनं दीपमिव प्रतापं
    केशग्रहक्लिष्टमिवाभिमानम् ।
जयश्रियं ज्यामिव स स्वकीयां
    मेने तदानीं विबुधापराधी ।। ११५

मन्दाक्षनम्राननमण्डलीकं
    मन्दोरीप्राणसखं रणाग्रे ।
वाचं बभाषे वरदो नतानां
    काकुत्स्थवीरः करुणाम्बुराशिः ।। ११६

आरभ्य सूर्योदयमाशरेन्द्र -
    वलीमुखानां वलयानि वीरः ।
करीव मृद्नन् कदलीवनानि
    श्रान्तोऽसि मन्दं व्रज राजधानीम् ।। ११७

अधर्मयोगादवसानमासीत्
    सपुत्रदारस्य तवाप्यकाण्डे ।
जहीहि लज्जां जगदेकवीर-
    श्श्वस्त्नावदायाहि सुखेन भोक्ता ।। ११८

इतीरयित्वा रघुनन्दनेन
कृपालुना तेन कृताभ्यनुज्ञः ।
क्रान्तं पिशाचैरपि शोचनीयं
क्षपाचरेन्द्रो नगरं विवेश ।। ११९

सोढापि त्रिदशासुरास्त्रविपदां गाढानुवेधं रणे
सोढुं तामपदं रघूद्वहशरस्तोमस्य धूमद्युतिः ।
यद्यत् कर्मकृतं निजा विनयतस्तत् तदा चिन्तयन्
निर्लक्ष्मीर्दिनचन्द्रवद् दशमुखो दीनां दशामासदत् ।। १२०

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयपतेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भोवोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गोऽगमद्विंशतिः ।। १२१

इति रामाभ्युदये विंशतिः सर्गः ।

एकविंशः सर्गः

प्रविश्य लङ्कां परमासने स्थितः
स कुम्भकर्णं समुपेक्षितश्रियम् ।
स्वपन्तमुद्बोधयितुं स्वसेवकान्
स भक्ष्यपानप्रचयानचोदयत् ।। १

युगान्तवातोर्मिलतन्मुखानिल
प्रवाहवेगप्रतिविद्धपातिताः ।
प्रविश्य तद्द्वारममी कथञ्चन
प्रबोधनं तस्य विधातुमुद्यताः ।। २

परस्परं ये हननेन पातयां
बभूविरे वानरयामिनीचरैः ।
निशाचरेष्वप्यनिलेषु तेषु तै -
र्निशाचरेन्द्रो न किमप्यबुध्यत ।। ३

नदत्सु नागेषु नदत्सु दुन्दुभि-
ष्वटत्सु मेषेषु पदत्सु शृङ्गिषु ।
सपक्ष्म संश्लेषणतो व्यमोचयद्
दृशौ कथंचिद् दशकन्धरानुजः ।। ४

सह क्षुधोद्बुध्य तदर्पितं घटी
सहस्रमासाद्य सुरान्त्रपूरितम् ।
समांसराशीनपि सानुमन्निभान्
चचार चण्डध्वनिरुच्चचल सः ।। ५

स बिभ्रदभ्रङ्कषामाबभौ........
　　विधूर्णितौ धूर्णविपाटलेक्षणः ।
दरीमुखोद्दर्शितदावपावकः
　　सपक्षविक्षेप इव क्षमाधरः ।। ६

अदभ्रवप्रोपरि...लक्ष्यमाणे
　　बहिस्तमालोक्य बलं वनौकसाम् ।
इतस्ततस्त्यानमिवास्त न क्वचित्
　　समस्तमात्रस्तमुदस्तवालधि ।। ७

सकुम्भकर्णक्षितिमर्णवाम्बरां
　　प्रकम्पयन्नम्बुदनीलविग्रहः ।
पुरस्सरैः पुण्यजनेश्वरो जवा -
　　दवाप धूपाक्षमहोदरादिभिः ।। ८

दिवं नु दग्धुं दिविषत्कुलाकुलां
　　भुवं नु भोक्तुं कुलभूभृतान्विताम् ।
स तारकं तारयितुं किमम्बरं
　　स पन्नगं किं मथितुं रसातलम् ।। ९

विजेतुमिन्द्रं नु विधिं किमा... तुं
　　यमं नियन्तुं किमु तन्न हिंसितुम् ।
त्वयाऽहमाहूत इवास्मि चोदये -
　　त्यपृच्छदिच्छानुगुणं स रावणम् ।। १०

अपूर्वमाकर्ण्य सपूर्वजन्मनः
　　किरीटभङ्गं द्विषतः कृपामपि ।
ज्वलत्क्रुधेव ज्वलनातिरिक्तया
　　वचो बभाषे जितवारिदध्वनिः ।। ११

ततो महेन्द्रादिभिरन्वहं सुरैः
प्रतीक्ष्य सेवावरणस्य पङ्क्तिशः ।
नराद् भयं नाथ! तवापि केन
गुरुव्यथातो क्षुरतोऽपि दन्तिनः ।। १२

स नैन्द्रजाड्ये मयि वानरेरिता
नगा भविष्यन्ति सुखाय संयति ।
रणश्रमे मे रिपुयुक्तचारिणा
परायणस्य प्रशमं प्रयास्यति ।। १३

कबन्धितावुत्करताटबन्धनं
प्रणर्त्यमानौ प्रसभं मया द्विषौ ।
निशम्य तौ व्योम्नि सभानिमेषुदी
विषेदुषी दैविषदी भविष्यति ।। १४

हरिर्हताक्षो न हतो विनोद इ -
त्युपेक्षितं बन्धनमूर्मिमालिनः ।
गुणीकरिष्ये गुणिना भुजेन मे
विपक्षनारीव्यसनाग्रहं तव ।। १५

हरो विरोधीति मयाऽधुनैव हि
प्रवीरलङ्कानगरी प्रसाध्यताम् ।
प्रसीदता वैरिशिरः प्रदर्शिना
(द्विषीतदतात्?)मिथिलेन्द्रकन्यका ।। १६

समूलमुन्मूल्य बलीयसा रणे
मयेरितैरावणदन्तमण्डली ।
पलाययामास वलारिरित्यतो
विचार्य शौर्यं कथमार्य! तेऽनुजः ।। १७

क्षणं क्षपस्व क्षपयेऽहमि -
त्युदीरितो नाथ सधीरमानसः ।
विसर्जितस्तेन सगर्जितध्वनिः
क्रुधा दधा वारिवधाय सायुधः ।। १८

विवर्धितं विष्णुमिवाम्बरान्तरे
विला .....तं विस्मयमान् रघूद्वहः ।
क एष इत्यन्तिकदेशवर्तिनं
विभीषणं प्राह गभीरनिस्वनः ।। १९

प्रसूतिमात्रेऽपि जगद्भयं क्रुधा
पविप्रहारिण्यमरप्रभावपि ।
प्रभञ्जितैरावतदन्तपातनं
प्रपञ्चतापेन विरिञ्चकोपनम् ।। २०

ऋतुद्वयं तं शयनं दिनद्वयं
प्रबुध्य बुद्धिं शमनात् .... ।
अकालबोधादपि तस्य संक्षयं
व्यबोधयद् दाशरथिं विभीषणः ।। २१

मुहुर्महुः पङ्क्तिमुखानुजन्मा
पविप्रवीराकबलीकृता युधि ।
पृथुश्रुति........................
............................।। २२

..............घ्राणबिलान्तरोत्थिताः
विदद्रवुर्व्यात्तमुखार्तनिस्वनाः ।
त्रिशूलमुद्यम्य वमच्छिखावलं
बलानि विन्याथ बलीयसां द्विषाम् ।। २३

ततः समूहं समवेत..........................
विडम्बयन् व्यञ्जिततारकेक्षणः ।
विवर्तिता वालिसुतेन वानराः
विचिक्षिपुर्या विटपान् विरोधिनि ।। २४

विघूर्णता वक्षसि वेगघट्टनात्
प्रपेदिरे च त्र्यसरेणुकल्पताम् ।
उदीरितास्तैरुपलक्ष्य वैरिणं
महीरुहाः पल्लवपुष्पशाखिनः ।। २५

अवापुरंसस्थलपातचूर्णिताः
प्रभूतगन्धां पटवासचूर्णताम् ।
द्रुतं निरस्तो द्विविदेन पर्वत -
स्ततस्तमप्राप्य जघान तच्छिरः ।। २६

प्रयुक्तमद्रिं पवमानसूनुना
प्रमथ्य शूलेन तमप्यताडयत् ।
क्षितौ पतित्वात् क्षतजं वमत्यलं
मरुत्सुते सीदति वह्निसूनुना ।। २७

निपात्यमानं निबिडेन मुष्टिना
जघान शैलं युधि तं च जानुना ।
गवाक्षमाहत्य चपेटघातनात्
प्रहत्यमुष्ट्या शरभं प्रतापवान् ।। २८

स लक्ष्मणेन प्लवगैः प्रचोदितै -
रधिष्ठितः शैल इव द्रुमैरभूत् ।
स्वविग्रहादुद्भ्रमतो विधून्वनाद्
वनग्रहो नाग इवाधिरोहिणः ।। २९

व्यपातयद् व्यग्रतरं वलीमुखान्
सचक्रयन्त्रभ्रमितो रथा यथा ।
कपिष्ववाप्तेषु भयं रघूद्वह
कपीश्वरेण प्रहितं महीधरम् ।। ३०

विघूर्ण्य शूलं च विचिक्षिपेऽमुना
तदन्तरा गन्धवहात्मजोऽरुजत् ।
सकूटमुत्पाट्य पटीरभूभृतः
प्रताड्य तेन प्रसभं विमोहितम् ।। ३१

हतं हतं सर्वमिहेति हर्षितो
हरीन्द्रमावृत्त्य पुनर्न्यवर्तत ।
अयं गृहीतोऽप्यधिगम्य चेतनां
द्विषं प्रतिध्वंसयितुं प्रगल्भते ।। ३२

विमोचनं नोचितमस्य मत्त इ -
त्यवेत्य सेनां हनुमानधारयत् ।
स राजधानीं विततोऽतिशीतलैः
पुरोपचारैः पुनरेत्य चेतनाम् ।। ३३

नखेन कृत्वापि पितृनामनासिकां
ददंश तस्यांशुमदंशसम्भवः ।
प्रसृत्वरध्वान्तभराविलच्छवि -
प्रलूनघोणो रुधिरप्लवोक्षितः ।। ३४

स सान्ध्यरागात् परभागमम्बरं
विडम्बयामास विभीषणाग्रजः ।
न्यसन्धि सन्ध्याभ्रतुबलान्धुना
निकृत्तनासाश्रुतिनिर्गतासृजा ।। ३५

अघोषि घोषादपरैश्च राक्षसै -
रवाप चोत्प्लुत्य विभुं हरीवरः ।
क्रुधा स तादृक् परिभूतिजन्मना
किमप्यजानन् क्षुभितः क्षयाग्निवत् ।। ३६

निसर्गतस्तत्र हरींश्च राक्षसान्
बुभुक्षितो भक्षयति स्म राक्षसः ।
स सप्त सौमित्रिरिपून् नले हते
निरास वेगान्निरवग्रहे द्विषि ।। ३७

स तैर्न किञ्चिच्चलितो हि राघवं
दुधाव दोर्दण्डधृतोऽग्रमुद्गरः ।
स कुम्भकर्णं प्रलयार्णवा.... सः
सवर्णमुद्गूर्णनिगूर्णवानरम् ।। ३८

प्रतूर्णमभ्यर्णमुदीर्णपादपं
विकर्णनासं निरवर्णयद् विभुः ।
स पावकास्त्रं प्रभुणा प्रवेशितं
वपुष्यसृम्भिर्वमति स्म राक्षसः ।। ३९

विनिर्ययुस्तद्गलिताः प्लवङ्गमाः
विलासाः श्रुतिरन्ध्रवर्त्मभिः ।
रघूद्वहं ज्ञापितसत्त्वमग्रतः
स कुम्भकर्णः प्रहसन्नभाषत ।। ४०

प्रदर्शयेथा मयि चापचातुरीं
त्वयि प्रयोक्ष्यामि ततो गदामिति ।
रघुप्रवीरेण करेरितं गिरिं
विपाट्य वर्मापि विमोचितः शरैः ।। ४१

बभौ चलद्विन्ध्य इवापवर्जितः
　　पयोधराणां पटलेन राक्षसः ।
ततः प्रयुक्तेषु शरेषु सह्यतां
　　गतेष्वमित्रस्य भुजं सदक्षिणम् ।। ४२

स मुद्गरं सद्रुममच्छिनन्मरु-
　　न्महामहेन्द्रास्त्र मुखेन राघवः ।
पपात तद्बाहुयुगं परःशतान्
　　प्लवङ्गवीरान् परिमथ्य भूतले ।। ४३

त तेन चन्द्रद्वतयेन तत्पदे
　　विखण्डयामास विराधकण्डनः ।
अपि प्रलूनावयवस्य साहसा-
　　दभिद्रुतस्य ग्रथितुं धनुर्धरः ।। ४४

मरुत्तदस्त्रेण शिरोऽमरद्विषः
　　चकर्त वैकर्तनवंशवर्धनः ।
तदुत्तमाङ्गान्यपतत् तथा दिवः
　　प्रकल्पितभ्रूकुटिभङ्गभीषणाम् ।। ४५

प्रवीप्यमानं पवनेन सागरे
　　यथाञ्जनाद्रेः शिखरं व्यभाव्यत।
प्रभिन्न लङ्कावरणं पतत्क्षितौ
　　वपुः शिरोऽपि द्विषतो न केवलम् ।। ४६

वनालयैः साकमचूर्णयत् क्षणा-
　　न्महीभृतः पक्षभृतोऽपि वारिधौ ।
निरुद्धलङ्कापुरगोपुरस्थलं
　　प्रविष्टमर्धेन पयस्युदन्वतः ।। ४७

मुखेन कीलालभरं मुहुर्वमन्
नदीमुखेनैव ललास नैर्ऋतः ।
श्व एष्यतीति श्रुतिशल्यमाह यः
परस्य तस्याप्रतिकृत्य पत्रिभिः ।। ४८

हरीं हत्वाप्यखिलान् विहाय मां
......ततोऽसिर्गतयेव दक्षिणः ।
प्रहस्तवाक्यानि विभीषणोदिता -
न्यापास्य वाणीमपि·ते विधेर्वशात् ।। ४९

अकल्पयाऽस्मान् मतिरत्ययायते
कुलक्षयोऽप्यस्तु कुतो गतिर्मम ।
क्व कुम्भकर्णः क्व कुम्भकर्ण मां
विहाय यातोऽसि विपत्तिकारणम् ।। ५०

भवत्पदं भ्रातरनुव्रजामि हा
विधिर्ममेति व्यलपद् दशाननः ।
अलं विलप्याप्नुहि तात धीरता -
मपां निधिं नो परिकर्तुमर्हसि ।। ५१

वितीर्णमस्त्रं हि तवैव वेधसा
विनिर्जितं विश्वमिदं तवैव हि ।
क एष काकुत्स्थपशुस्तवाहवे
रिपुं हनिष्याम्यहमेव लीलया ।। ५२

इति त्रिमूर्ध्ना वचसा गरीयसा
ननन्द नक्तञ्चरलोकनायकः ।
ततोऽतिकायं तमपि त्रिमस्तकं
सनन्दनौ देवनरान्तकावपि ।। ५३

युद्धे महापार्श्वमहोदरावुभौ
स भावयित्वा व्यसृजत् सहोदरौ ।
महोदरो मत्तगजेन्द्रमास्थितो
गभस्तिमानस्तगिराविवावुभौ ।। ५४

सितं समारुह्य भयं नरान्तकः
शरद्धनं तत्प्रतिशब्दवद्दिवि ।
क्षतध्वजं क्षिप्तरथं पतद्धयं
द्रवद्भटं पातितवज्रकङ्कणाम् ।। ५५

विहस्तहस्तिप्लवगैर्द्विषद्बलं
व्यधायि शैलद्रुमराशिवर्षिभिः।
सपट्टसप्रासशरासनादिभि -
र्मसृण्टिदण्डाशनिभिण्डिपालभिः ।। ५६

सहोपलैः क्रव्यभुजां गणैः क्षणात्
दधाति शाखामृगराडनीकिनी ।
प्लवङ्गमैर्ये प्रहिता नगाः पुन -
स्त एव शस्त्राण्यभवन् सुरद्विषाम् ।। ५७

अयासितेन व्यमुचन्वनौकसां
महापि तैरेव किलाजिसाधनैः ।
अवाप्य कोपग्रहवेगतोऽन्धतां
प्लवङ्गमास्ते पिशिताशना अपि ।। ५८

पुरः स्थितानेव शिलास्त्रवृष्टिभिः
परस्परं वा नमुचः प्रजहिरे ।
नखक्षतैर्दन्तपरिक्षतक्रमैः
करग्रहैस्तत्र कपोलताडनैः ।। ५९

प्लवङ्गमामीलितपाटलेक्षणा
विपक्षसेनां विवशाममर्दयन् ।
मुहुर्मुहुः क्ष्वेलितमूर्च्छिताम्बरा
झलत्झलत्प्रस्रवदास्रनिर्झराः ।। ६०

समुच्चलच्छस्त्रशिलाखलात्क्रिया
चमत्कृता राक्षसवानरा मिथः ।
नितान्तमुद्वान्तविवृत्ततारकै -
र्विभग्नदन्तैर्व्यपविद्धजानुभिः ।। ६१

प्रदीर्णकाण्डैः प्रतिभग्नवर्मभिः
द्विषद्बलैः साजनि दुर्गमा मही ।
नरान्तकोऽयं नववीथियोजनात्
स पञ्चधारासु जवेन चालयन् ।। ६२

वनौकसः सप्तशतानि शक्तितो
जिघांसस्तन्मनसा पुरोऽप्यहम् ।
द्रुताह्वगत्यो भयतोऽनुवीथिषु
व्यघत्त सोऽष्टादशवाजिराजिकाः ।। ६३

किमन्यमश्वैकमयीमिव व्यधाद्
रणस्थलीं साधितसर्ववानराः ।
ततोमुखाः केचिदितोमुखाः इमे
पुरो न पश्चादितरे नु वाजिनः ।। ६४

न किं त्वमीषां गणनेत्यलं न तत्
तुरङ्गमं लक्षयितुं रयात् परे ।
प्रधावतस्तस्य हयाधिरोहिणो
ननन्दिरे सङ्गररङ्गवीथयः ।। ६५

प्लवङ्गवृक्षैः पतितैर्निपातितै -
विहाय मार्गा इव गन्धहस्तिनः ।
ततोऽङ्गदो वानरराजचोदितो
नरान्तकं प्राप्य जगाद धीरधीः ।। ६६

किमेभिरल्पैः प्लवगैर्महोरसि
प्रयुङ्क्षते प्रासममुं बलादिति ।
रथारिणा तं प्रहितं चमूपतिं
निमग्नमुत्खाय निजे भुजान्तरे ।। ६७

निधाय तत्सैन्धवमूर्ध्नि तं क्षितौ
तलेन सन्ताड्य झटित्यपातयत् ।
नरान्तकः साधितसैन्धवोऽङ्गदं
स्वमुष्टिना मोहयति स्म घट्टयन् ।। ६८

सलब्धसंज्ञश्च चचार तादृशीं
प्रतिक्रियां वैरिणि जीवितावधिम् ।
नरान्तके तत्र हते महोदर -
स्ततोऽभिदुद्राव गजस्थितोऽङ्गजम् ।। ६९

स च प्रचण्डं परिघं प्रचालयन्
स हस्तिमूर्ध्ना कुपितः सुरान्तकः ।
तदीरितं सालगणं त्रयोऽपि ते
निरस्य शस्त्रैस्तमताडयन् द्विषः ।। ७०

सुरान्तकोपात् परिघेन सोऽपत-
द्धतः क्षितौ साल इवानलोत्थितः ।
तमुत्थितं सालतलेऽनिलोत्करैः
त्रिभिर्बिभेद त्रिशिराः शिलामुखैः ।। ७१

ततः समापत्य दृढेन मुष्टिना
सुरान्तको वायुसुतेन सूदितः ।
ततस्त्रिमूर्ध्नस्तनयेन भास्वतः
प्रसृज्य शक्तिं प्रहितां भुजान्तरे ।। ७२

असिं प्रकृष्यास्य शिरांस्यपातयद्
वृषेव वस्त्रेण सुरद्विषोऽमुना ।
गदां प्रयुक्तामृषभो गरीयसीं
प्रगृह्य हस्तेन परं तयैव तम् ।। ७३

विषाणकोट्येव सरित्तटं व्यहन्
स कर्म सद्यः फलदं यदुत्कटम् ।
निरस्तमर्याद इवार्णवान्तिके
वलेऽतिकायेन विवृद्धमन्युना ।। ७४

विजृम्भितं दत्तवरेण वेधसा
प्रमन्युना भ्रातृपितृव्यघातिनः ।
रणैः सहस्रैरिव वाजिते रथे
स कुम्भकर्णस्य पुनः समुद्यमम् ।। ७५

विशङ्कयन् वेजयति स्म वानरान्
विशेषविस्फारितचापमण्डलः ।
रणोद्यता राक्षसराजसूनुना
कृते भयाकर्षिणि केसरिध्वनौ ।। ७६

उदस्तपुच्छं युधि रोमहर्षिभिः
व्यदुद्रुवे वानरराजकुञ्जरैः ।
भयानके भर्ममये परिक्वण -
ज्जयानके जङ्गममेरुसन्निभे ।। ७७

दधत्यसीर्दोदशकायतौ च
　　चतुष्करत्सरौ कल्पितराहुकेतने ।
सहेमपट्टैः सनिषङ्गिराशिभि -
　　स्तडित्प्रभज्यैः सहिते शरासनैः ।। ७८

सहस्ररथ्ये सकलास्त्रपूरिते
　　रथे चतुर्यन्त्रसमीरिते स्थितम् ।
स दुर्जयं वर्मधरं सुरासुरै -
　　रवध्यतां च द्रुहिणादवाप्तवान् ।। ७९

आपाशमाजौ वरुणं करेऽप्यसौ
　　हरिव्यधां धाम्नि करेप्यपस्वरुम् ।
न चार्णवस्याऽस्यभुजेन धारिता
　　न जातु लङ्कानगरी निषीदति ।। ८०

इति न्यवादीदतिकायवैभवं
　　पुरो नियुक्तः प्रभुणा विभीषणः ।
भवान् बली स्यादिति बुध्यता मया
　　न तत्समोऽन्यो जगदीति रक्षता ।। ८१

समीरिते ज्यायसि तत्र लक्ष्मणः
　　समुत्थितश्चक्रितकार्मुकः क्रुधा ।
प्रचण्डदोर्दण्डविकृष्णकार्मुकः
　　प्रकाण्डजन्मास्य रवो दिवोऽन्तरम् ।। ८२

अरुन्ध कल्पान्तनितान्तनिध्वनत्
　　घनाघनारम्भविडम्बलम्पटः ।
अतीव बालो ह्यसुभिर्विमुच्यते
　　रणे प्रतिव्यूहमयेति रक्षसः ।। ८३

निशम्य वाचं निजगाद लक्ष्मणो
बलिद्विषं बालमवेहि मामिति ।
क्रुधातिकायः क्षुभितस्ततोऽमुच -
न्नरेन्द्रसूनौ नतपर्वणः शरान् ।। ८४

शरैश्च ते लूनशिरास्तदीरितैः
निपेतुरुत्कृष्टफणा इवोरगैः ।
परस्परोन्मुक्तनिकृत्तसायकौ
परस्पराश्चर्यकरावहक्रमौ ।। ८५

वितेनतुर्वीररसोल्बणं रणं
नरेन्द्रनक्तञ्चरराजनन्दनौ ।
विशङ्कटे तस्य विशालपट्टके
दृढं च चक्रे दशकण्ठनन्दनः ।। ८६

प्रकम्पमूर्धास्य पराक्रमश्रियां
चमत्क्रियां तत्क्षणमाचरन्निव ।
प्रचोदितः पङ्क्तिमुखस्य सूनुना
ततः सुमित्रातनयस्य वक्षसि ।। ८७

कवोष्णतीक्ष्णं रुधिरं शिलीमुखो
मदङ्गजस्येव मदद्रवं पपौ ।
यदस्त्रमाग्नेयमयुङ्क्तलक्ष्मणो
यदप्यमुञ्चद् युधि सौरमाशरः ।। ८८

परस्परं दीप्तमुखे प्रदह्यते
हराङ्गरागत्वमवाप्य पेततुः ।
ससर्ज याम्यं सकलक्षयावहं
यदस्त्रमै...... कमपि क्षपाचरः ।। ८९

मरुन्महेन्द्रास्त्रनिपातनक्षमां
　　ममाथ ते मानवराजनन्दनः ।
उपान्तकर्णान्तमुपेत्य स स्वयं
　　फणीश्वरांशः पवनेन बोधितः ।। ९०

स चास्त्रजप्तेन भुजात्तकार्मुकः
　　शिरोऽतिकायस्य शरेण चिच्छिदे ।
गुरुं समाश्वास्य वधाय वैरिणां
　　कृतप्रतिज्ञः कृतिनां पुरःसरः ।। ९१

विनिर्ययौ वीर इवात्तविग्रहो
　　वनश्रियास्सैन्यभरेण रावणिः ।
ननाद नादी प्रजुधोष काहली
　　रराास शंखो रणति स्म दुन्दुभिः ।। ९२

ननन्द लङ्का नमति स्म मेदिनी
　　चचाल सेना निर्याय शक्रजित् ।
सहस्रचक्रीवदुपेतमूर्ध्वगं
　　रथं रवेर्गरुधं हिरण्मयम् ।। ९३

अधिष्ठितं शक्रजिदासदच्छ्रियं
　　सितातपत्रं सितचामरान्वितम् ।
सहाहरन् सर्वमिवान्तरं दिशां
　　स वाहिनीनां निनदैः समुत्थितैः ।। ९४

रथस्य रक्षां परिकल्प्य रावणिः
　　......विवेश विधिसाधनोचितम् ।
स तत्र सव्येतरवर्तिनार्चिषं
　　विशस्तबस्ताहुतिभिर्विभावसुम् ।। ९५

प्रताप्य शस्त्राण्यभिमन्त्र्य विद्यया
विधातुरारब्ध विधातुमाहवम् ।
निहन्यमानः कुहनां विना रणे
निपेतुरुर्व्यां निखिला वलीमुखाः ।। ९६

तदुज्झितैः काञ्चनभल्लसञ्चयै -
र्वनान्तवृक्षा इव धर्मवह्निना ।
स सप्तथैन्दे युधि पञ्चतां गजे
नले तु चाष्टादश गन्धमादने ।। ९७

हरीन्द्रनीलद्विविदाङ्गदर्षभे -
ष्वदादिषून् त्रिंशतमृक्षपे दश ।
नितान्तविद्धा युधि तस्य हेतिभिः
निदाघवह्नेरिव काननद्रुमाः ।। ९८

विहस्तहस्ता व्यपगत्वरासवे
वितस्थिरे व्यात्तमुखा वलीमुखाः ।
अधाविता ये पुरि ता गरीयसीं
तथा न शत्रोः शरपीडनां गताः ।। ९९

यथाद्रिसाह्योभ्यधिकेन रंहसा
प्लवङ्गवीराः परिपातिता भुवि ।
ववर्ष लङ्काधिपनन्दनः शरान्
ववर्ष रक्तानि वलीमुखावलिः ।। १००

ववर्ष बाष्पं परिषद् दिवौकसां
ववर्ष बाष्पाणि च दैत्यमण्डली ।
प्रवर्धमानैः प्रबलारिपत्रिभिः
परिक्षरद्रक्तभरैः प्लवङ्गमैः ।। १०१

उपर्युपर्यार्ततमं विना मिथो
न किञ्चिदप्यन्तरमानशे क्षितौ ।
प्रकाशयन् बाणशतानि केवलं
परेषु स प्राप निदर्शनं क्वचित् ।। १०२

शरीरभाजां विविधानि कर्मणां
फलानि संप्रेरयिता रथेश्वरः ।
तथा शरं वर्षति तत्र राक्षसे
निजानुजं प्राह नृपालनन्दनः ।। १०३

विषह्यतामस्त्रमिदं विधेरस -
न्विहन्विसंज्ञाविति नो व्रजेदिति ।
निमग्नशल्यैर्निशितैः शिलीमुखैः
सशल्यतां प्रापयितां रघूद्वहौ ।। १०४

स रम्भसा संहितसिंहनिस्वनो
विवेश लङ्कां विजयी वृषान्तकः ।
हताहकां कर्शितवेगदर्शिनं
गतासु निर्गन्धितगन्धमादनम् ।। १०५

स नीलनीलं विधिलङ्घिताङ्गदं
पतत्सुषेणं परिधर्षितर्षभम् ।
अमन्दमैन्दव्यथमस्तजाम्बव -
द्विजृम्भणं स्तम्भितरम्भडम्बरम् ।। १०६

दुरन्तजातद्विविदातिवेगितं
विभग्नसुग्रीवमभूद्बलं प्रभोः ।
प्लवङ्गमैः पङ्क्तिमुखात्मजाहतै -
रपाति सप्तोत्तरषष्टिकोटिभिः ।। १०७

विवेष्टमानौ युधि तत्र राघवौ
विलोकिषातां हनुमद्विभीषणौ ।
अथोषधीरस्त्ररुजापनोदिनीः
सुतेन हर्त्तुं द्रुहिणस्य चोदितः ।। १०८

तदाश्रयं शैलमवाप मारुतिः
सुवर्णदुर्वर्णनगान्तरे स्थितम् ।
तिरोहितास्वोषधिषु क्षमा भृता
तदीयमुत्पाट्य तदाश्रयं बली ।। १०९

उपानयच्छृङ्गमुदन्वदन्तरे
मरुत्सुमेरोरिव मारुतात्मजः ।
विबुध्य दिव्यौषधिगन्धवेधनाद्
बलैर्बभूवे सकलैः सराघवैः ।। ११०

परास्तशल्यैः प्रतियुक्तसन्धिभिः
समुच्छ्वसद्भिः समवर्णकान्तिभिः ।
पुनस्तदुत्प्लुत्यगतो यथास्थितं
निवेश्य श्रृङ्गं न शिवायुनन्दनः ।। १११

निरस्तवानभ्रनिभोदयान् रुचा
रुचा तमांसि द्युमणेरिवोदयः ।
यदा यदा संयति वानरैर्हताः
तदा तदा स्वापजयापलापिनः ।। ११२

दशाननेन प्रतिकृष्य किङ्करैः
निपातिता नीरनिधौ निशाचराः ।
विरोचने लोकविलोचनाद् गते
तमस्युदञ्चत्युपरुध्य रोदसी ।। ११३

समूह्य लङ्कादहनाय वानरा
नियोजिता नीरजबन्धुसूनुना ।
कृतेन्द्रजिच्छत्रुजयोत्सवां क्षणाद्
विशङ्कमुल्लङ्घ्य रयात् प्लवङ्गमाः ।। ११४

पुरीमलातैरुददीपयन् रिपो -
र्निशामिता रात्रिहितां निनीषवः ।
गृहेषु वज्रेण गिरीन्द्रशोभिषु
गिरीषु सौधे गगनानुसारिणा ।। ११५

सरः स जज्ञे बडबामुखाग्निना
वने दवेनापि च तत्र वह्निना ।
प्रदीप्यमानोन्नतरत्नगोपुर -
प्रभानुवेशात् प्रसभं विभावसोः ।। ११६

महाम्बुधेरम्बुयुगान्तवह्निना
नितान्तमाक्रान्त इव व्यभाव्यत ।
प्रधूपितस्य ज्वलनस्य धूम्यया
परीयमाणाः पिशिताशयोषितः ।। ११७

निबध्यमाना निजवल्लभैः समं
कृतान्तपाशैरिव तत्र रेजिरे ।
कचेषु कल्हारमयीव मालिका
कुचेषु चर्चारहितेव कुङ्कुमैः ।। ११८

कटीषु कौसुम्भपटीव पावक -
प्रभा बभासे सुरवैरिसुभ्रुवाम् ।
स्फुरन्मणिभ्रम्यदिभं रटद्भटं
भ्रमद्वधूटीकुटमुच्चगोपुरम् ।। ११९

चटच्चटत्प्रध्वनदग्निताडितः
द्विषत्पुरं तत् त्रिपुरद्युतिं दधौ ।। १२०

हरिरिव मत्तवारणघटमिव पाटयिता गज इव सालमण्डलविखण्डनचण्डतर
जिनसमयीव सर्वनिगमान्तनिरासपरो जलधिरिव व्यधादधिकपोतगतिज्वलनः ।

मणिसौधमहीधररोधकृतिः
कृतरत्ननिधानरसग्रहणः ।
चरति स्म सभस्मितवैरिपुरं
कूटभूरिव तत्र कृपीटभवः ।। १२१

दम्भोलिभ्यो दर्शितघोषा जनि घोषं
मुञ्चन्मूर्ध्नि ज्योतिरुदग्रेण करेण ।
स्तंभं भित्वा क्षिप्तहिरण्यक्षयवृत्ति -
वाग्भिश्चक्रे वञ्चितपञ्चाननलीलाम् ।। १२२

परिचरितशिखाजटाकलापं
परिहितधूममयेन्द्रद्विपेन्द्रचर्मा ।
हर इव सुलभाट्टहासलक्ष्मीः
शमितपुरः प्रणनर्त चित्रभानुः ।। १२३

उद्दीप्यैवं दशमुखपुरीं रुन्धति द्वारमस्याः
तस्यां रात्रौ रविसुतगिरा सर्वतोवानरौघाः ।
वैरिञ्चास्त्रव्यसनरहितो वर्धितोत्साहलक्ष्मी -
स्तत्स्थौ रामः प्रणमितधनुः सानुजः सावधानः ।। १२४

इत्युद्दामवरप्रसादकवितासिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयपतेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽयमेकसहितः सर्गोऽगमद्विंशतिः ।। १२५

द्वाविंशः सर्गः

निशि पङ्क्तिमुखो निकुम्भकुम्भौ
कुपितः शत्रुषु कुम्भकर्णपुत्रौ ।
प्रजिघाय सकम्पनं प्रजङ्घं
सुलभश्रीरपि धूपशोणिताक्षौ ।। १

समरे हरियामिनीचराणां
प्रलयाम्भोधिभयङ्करे प्रवृत्ते ।
कपिराजसुतेन कम्पनोऽभूत्
गिरिश्रृङ्गेण हतो गदाप्रहारी ।। २

अभिवृष्टशरोऽथ शोणिताक्षः
सहसा वालिसुतेन रुग्णचापः ।
प्रहरन्नसिना स तेन पश्चात्
फलशीतं च हठेन हारितोऽभूत् ।। ३

असिनांसतटे स शोणिताक्षं
विपुले मङ्क्षु विभिद्य वालिसूनुः ।
समरे रजनीचरानशेषा -
नभिदुद्राव कृतोऽग्रसिंहनादः ।। ४

गिरिसारमयीं गदां प्रगृह्णत्
अभिदुद्राव तमाशु शोणिताक्षः ।
अपि योद्धुमहं युरात्तशत्रुः
सहधूपाक्ष उपागतः स जङ्घः।। ५

प्रजहार भुजान्तरेऽस्य मुष्ट्या
पतितोत्थेन हतः सचाङ्गदः ।
द्विविदः कुपिते हते पितृव्ये
युधि धूपाक्षमुदारधीरगृह्णात् ।। ६

सहजग्रहणक्रुधा तदङ्गं
गतयागत्य जघान शोणिताक्षः ।
द्विविदो जगृहे गदां तदीयां
द्रुमशैलान् प्रववर्ष तत्र मैन्दः ।। ७

उदधी इव हेतिना च ताभ्यां
युयुधाते सह धूपशोणिताक्षौ ।
द्विविदेन च निर्दयं ममर्दे
द्विरदः केसरिणेव शोणिताक्षः ।। ८

निबिडं पशुवन्निपीड्य दोर्भ्यां
युधि धूपाक्षमपाचकार मैन्दः ।
स्वबलं युधि सादितप्रकारं
क्षुभितं धैर्यनिधिः प्रसार्य कुम्भम् ।। ९

वलयीकृतकार्मुकः शराणां
व्यलयव्यालकुलाकुलं ववर्ष ।
धनुरुद्धुवतो ध्वनिप्रशीर्यत्
कुलभूभृद्दरिकुम्भकर्णसूनौ ।। १०

अभितः स्थगयांबभवु राजौ -
द्विविदं सायकवर्षदुर्दिनानि ।
पतिते रिपुपत्रिणा हतेऽस्मिन्
सहजे सत्त्वरमभ्युपेत्य मैन्दः ।। ११

अमुचन्महतीं शिलामथैनां
बिभिदेऽस्यापि शिलान्तरेण वक्षः ।
मथितौ युधि मातुलौ स दृष्ट्वा
रभसादापतितं हरीन्द्रसूनुम् ।। १२

बिभिदे विपुले भुजान्तराले
कनकालङ्कृतिशालिना शरेण।
क्षतकच्चगलन्नवास्रधारा
पिहिताक्षं प्लवगाधिराजपुत्रम् ।। १३

दलितैरवपादपं पृषत्कै -
र्दृढमाविध्य स मोहयाञ्चकार।
श्रुतवालि सुतावसादनेन
प्रभुणाऽथ प्रहितं प्लवङ्सैन्यम् ।। १४

सशरैः कबलीचकार कुम्भः
कुपितः प्रागिव कुम्भभूः समुद्रम् ।
प्लवगान् युधि जाम्बवत्प्रधानान्
विवशान् वालिसुतं च वीक्ष्य खिन्नः ।। १५

प्रलयानिलवत् प्रभूतमस्मिन्
प्लवगेन्द्रस्तरुमण्डलं ववर्ष ।
स विषह्य शराभिवर्षमन्तः
प्रविशन् धन्व बभञ्ज कौम्भकर्णः ।। १६

सुतवान् भवता पिताऽद्य धन्वी -
त्वहतेऽन्यो भुवि नेति तं शशंस ।
कपिराडपि तत्र कौम्भकर्णिः
कलितोत्पातनिपातनौ मिथस्थौ ।। १७

दृढमुष्टिनिपातधोषभीमौ
दलितास्थिप्रकरौद्यतावस्फुलिङ्गौ ।
पटुनिश्वसितप्रकीर्णधूमौ
पतघातावदलं महीप्रदेशौ ।। १८

क्षुभितोत्थितसिन्धुदर्शनीयौ
युयुधाते रुधिरार्द्रवारुणाङ्गौ ।
करपीडितकण्ठपादमुच्चैः
कपिराट् कुम्भमुदक्षिपन्नभोऽन्ते ।। १९

फणरत्नघणात्कृतानि चक्रे
फणिभर्तुः स पतन् पयोधिमध्ये ।
सममारविमार्गमम्बुराशेः
सहसा वीचिभिरुत्थितेन तेन ।। २०

दृढयाग्निकणाभिवर्षिमुष्ट्या
दलितं वानरनेतुरर्थिकूटम् ।
प्रलयातिलपिण्डसन्निवेशे
प्लवगेन्द्रस्य पतत्यरत्निघाते ।। २१

भिदुराहतशैलश्रृङ्गकल्पं
बिभिदे कुम्भवपुः प्रकम्पमानम् ।
भ्रमयन् परिघं भृशं निकुम्भो
विजिजृम्भे निहतं विलोक्य कुम्भम् ।। २२

नवरत्नलसत्सुवर्णपट्टं
सहसा चूर्णित सग्रहान्तरिक्षम् ।
प्लवगेषु भयद्रुतेषु तत्स्थौ
प्रकटीकृत्य भुजान्तरं हनूमान् ।। २३

परिघः परिपातितश्च तस्मिन्
द्विषता सोऽपि ततः प्रयुज्य मुष्टिम् ।
हनुमानतिदूरमुत्थितः सन्
उरसि स्थेयसि सन्निपात्य शत्रोः ।। २४

परिवर्त्य शिरोधरां कराभ्यां
शिर उत्पाट्य ननाद सिंहनादम् ।
मकराक्षमयुङ्क्त राक्षसेन्द्रः
स विशालाक्षमयोमुखस्य सूनुम् ।। २५

रघुवीरवधे कृतप्रतिज्ञो
रथमारुह्य ययौ स वाहिनीभिः ।
विशिखैः परिताप्यकीशवीरान्
युयुधे वीरमुपाश्रितस्तदासौ ।। २६

पितृघातिनि तत्र दीप्यमानः
प्रशमं मन्युभरो यथा भजेत ।
मनुजाधिपनन्दनेन चक्रे
मकराक्षेण यथाभियोग............ ।। २७

अपि तज्जनकस्य किञ्चिदासी -
न्न तथा दण्डकसङ्गरस्थली ।
मथितेऽपि रथे हतेऽपि शूले
महतीं भीतिमुदस्य हन्तुमग्रे ।। २८

द्रुतमापतितं द्विषं निमेषा -
ज्ज्वलनास्त्रेण स भस्मसाच्चकार ।
स निशम्य शरासनेन शत्रोः
खरपुत्रं कबलीकृतं दशास्यः ।। २९

कृतदारहठात्क्रियः प्रकुप्यन्
समरायेन्द्रजितं समादिदेश ।
परिताप्य स रावणिं हुताशं
पिहिताङ्गो गगने रथी पृषत्कैः ।। ३०

परिमर्दयति स्म वानराणां
पृतना न्यक्कृतपादपायुधानां ।
इषुवृष्टिरितोमुखं पतन्ती
दिवि मुक्ता दशकण्ठनन्दनेन ।। ३१

परिकल्पितमर्मपीडनाभ्यां
न विषेषेहे नरपालनन्दनाभ्याम् ।
कतिचित् कतिचिच् ककुत्स्थवीराः
प्रहिताः काञ्चनपिञ्जराः पृषत्काः ।। ३२

दिवमुत्पतिता निपेतुरुर्व्यां
द्विषतामास्त्रपरिप्लुता द्विषो वा ।
अवसादमसावसादनीयं
प्लवगानां परिमथ्य रामभद्रः ।। ३३

रिपुरेष यतो गतस्ततोऽस्त्रं
चकमे मोक्तुमयं च चापचक्रम् ।
सरयेन नभश्चरेण तूर्णं
विचरन् दृग्विषयव्यतीतमूर्तिः ।। ३४

परितः परिपूरितावकाशं
विदधे व्योमतुषारधूमजालैः ।
निपुणस्त्वमुपेक्षितुं निगूढं
पुरुषे पुष्करलोचने प्रवृत्ते ।। ३५

चकितः स पुरीं प्रविश्य तस्याः
　　प्रतिहारं निगदाद् रथी व्रती च ।
अखिलासु दिशासु धावमानां
　　ननु कर्षन् हरिवाहिनीं हनूनाम् ।। ३६

पवमान इवाम्बुवाहमालां
　　प्रचलः प्रादुरभूत् पुरःसरोऽरेः ।
मघवज्जयिना तथैव माया -
　　विहिता राघवहेतिनीव युद्धे ।। ३७

निरचाय्य चिरावलोकिता सा
　　निखिलेनापि यथा हनूमतापि ।
अथ कूजति राम राम रक्षे -
　　त्यधिकाक्रन्दकरीं प्रगृह्य सीताम् ।। ३८

अभिपश्यत एव वायुसूनो -
　　रसियष्ट्या कुहनामयीमलावीत् ।
स तमश्रुमुखोऽवद्धनूमान्
　　हत रक्षस्तव हन्त निर्दयत्वम् ।। ३९

प्रबलं न परं परत्र सद्यः
　　परमं स्त्रीवधपातकं तवेति ।
पतति स्म हनूमता न यावत्
　　प्रहितं पर्वतश्रृङ्गमेव तावत् ।। ४०

अनयद् रथमन्यतः स यन्ता
　　नियतो होतुमगान्निकुम्भिलायाम् ।
व्यसनं पुनरीदृशं यदित्थं
　　विहितं सा किल मैथिली हताऽभूत् ।। ४१

तदलं समितेति वायुसूनुः
        निजसेनां स निवर्तयां बभूव ।
इह मारुतिना स्थिते क एष
        ध्वनिरुद्दाम इति प्रपद्य शङ्काम् ।। ४२

दिननाथसुतोऽथ जाम्बवन्तं
        चरयामास मरुत्सुतस्य बाह्ये ।
अथ जृम्भितमच्छभल्लसैन्यं
        प्रतिवार्याभिमुखं निवर्तितेन ।। ४३

सममेत्य रघूद्वहं हनूमान्
        प्रथयामास स जानकीप्रवृत्तिम् ।
प्रशमय्य ततो नरेन्द्रकन्यां
        निधनं तत्र नितान्ततत्पबाष्पम् ।। ४४

न्यपतद् विटपीव रुग्णमूलो
        नृपसूनुस्तदुपासतेऽग्रजन्मा ।
परिरभ्ररसचाग्रजं बभाषे
        प्रबलः स्यात् परमार्थतो न धर्मः ।। ४५

बलवन्तमवैमि नन्वधर्मं
        यदियं तेऽपि धिगीदृशी प्रवृत्ता ।
गुरुवागनुपालनाय राज्यं
        गमयित्वा गगनान्तरं गतस्य ।। ४६

जगतामभयप्रदस्य किन्ते
        जयहानिः स कथं जयी दशास्यः ।
व्यतिलङ्घ्यगुरोगिरं त्वया चेत्
        प्रतिपन्नं पितृराज्यमार्यपूर्वम् ।। ४७

सकलाः सुखिताः प्रजा भवेयुः
समवेतं व्यसनं भवेत् किमेवम् ।
अनुशोचितमेवमग्रजन्मा
जनितात्यन्तशुचा जघन्यजेन ।। ४८

विललाप विमुक्तधैर्यबन्धो
विकिरद् बाष्पजलं विलोचनाभ्याम् ।
सुमुखि! त्वदवाप्तये कृतानां
फलमेवं किमिदं परिश्रमाणाम् ।। ४९

स हतो यदि किं समेष्यसि त्वं
मृदिता येन तरक्षुणा मृगीव ।
निमिराजकुले प्रसूय साक्षात्
पुनरासाद्य वधूपदं रघूणाम् ।। ५०

विनिपातमसाधनीयमेव
प्रतिपन्नासि ममैव तावकेन ।
विलपन्निति निर्भरं बभाषे
विभुराश्वासयता विभीषणेन ।। ५१

कुहनेवमविघ्नहोमहेतोः
हरिणा वञ्चयता हरीन् कृताऽभूत् ।
परिशोषणमापगापतीनां
परिपातं नभसः सतामसत्यम् ।। ५२

सुकृतं कृतघातिनां च सीता
विनिपातं च विचारयन् विमूढः ।
सह कामचरैर्दिदेश यस्मै
स हरिब्रह्मशिरोऽस्त्रमब्जजन्मा ।। ५३

स पुनर्यदि होमसायकः स्यात्
तपनोष्माऽस्य परन्तपप्रकर्षः ।
सदसौ समुपेत्य तं प्रहन्यां
तव धानुष्कधुरन्धरोऽब्जजन्मा ।। ५४

इति तस्य विभीषणस्य वाचा प्रतिबोधं गमितो रघुप्रवीरः ।

अथ रघुपतेराज्ञमादाय सलक्ष्मणो
अनिलसुतमुखैः सर्वैः समं सविभीषणैः ।
अधिगुणधनुर्दण्डो व्यकीर्णहनाध्वजां
दशमुखसुताक्रान्तां धीरो जगाम निकुम्भिलाम् ।। ५५

कृत्वा तत्र स्निग्धगाम्भीर्यशार्ङ्गं
ज्यानिर्घोषं जृम्भिताम्भोधिलक्ष्मा ।
शत्रोर्होतुस्त्रणसर्जं प्रपेदे
रक्षोऽनीकं राघवस्यानुजन्मा ।। ५६

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयपतेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदये न्यगाद् युगयुतः सर्गस्तथा विंशतिः ।। ५७

इति रामाभ्युदये द्वाविंशः सर्गः ।

त्रयोविंशः सर्गः

निकुम्भिलायां पटमण्डपे ततो
निरस्य होमं प्रकृतं स रावणिः ।
प्रवृद्धमन्युः प्रलयार्णवोपमां
प्लवङ्गसेनां महतीमवेक्षत ।। १

रथाधिरूढो रजयत्यभङ्गुरं
कलम्बवर्षं दशकन्धरात्मजे ।
हनूमतः पृष्ठमथाऽधिरूढवान्
पुरोऽवतस्थे रघुपुङ्गवानुजः ।। २

गजानिवालोक्य हरीन् गुहान्तरा -
न्मृगाधिपो विघ्नितमन्त्रसाधनः ।
निकुम्भिलां तां निजगाद निर्गतो
गदाधरं तत्र पितृव्यमिन्द्रजित् ।। ३

अपास्य बन्धूनकृतांसनः कदा-
व्यपेक्ष्य लभ्यं युवराज प्रभोः ।
किमप्यवाप्यः कृपणं कृपालस -
ज्जटाधरं कञ्चन जन्ममानुषम् ।। ४

पदं हितं केवलमन्वमंस्त ते
पदान्तरं किं नृपशुः प्रदुष्यसे ।
वधेन ते वस्तुमिहास्य वाञ्छितं
किमस्तराज्यं भरतः प्रशास्ति यत् ।। ५

उपायजन्यान्युपदिश्य नः पुनः
कथावनं वीरयसे न वानरम् ।
त्वमेव तूष्णीमधि चेदमुष्य किं
पराक्रमस्यापि पराक्रमो भवेत् ।। ६

नरेषु मायाक्रमसूचनेन ते
विधेर्वशाच्चेन्मनुजो विशिष्यते ।
जयस्तु भर्तुर्जय एव केवलं
भवेत् तव भ्रातृवधेन किं यशः ।। ७

गदा त्वया हन्तुमियं समुद्यता
कथं त्रपा का पुरुषस्य चेतसि ।
अमी न जानन्ति हि वानरौकसः
त्वमेव हि भ्रातृवधस्य चर्यवित् ।। ८

फणीन्द्रबन्धेन पुरा हतः पुन-
र्विरिञ्चजास्त्रेण विनिर्जितो न किम् ।
उपेक्षितश्चेत् कृपया मया पुन -
र्न लज्जते योजयितुं नराधमम् ।। ९

गुरुर्महाराजदशाननोऽपि यत्
शशास तत्रैव निवस्तुमिच्छसि ।
मृगाधिपावासगुहाभिलाषिणो
गजस्य साधो गतिमेव यास्यति ।। १०

विरुद्धजाति...........पालनव्रतं
विमुञ्च रात्रीञ्चरनायकानुजः ।
स्वजीवनैर्वर्धयितारमर्णवं
स्वयं युगान्तः खलु हन्ति बान्धवः ।। ११

परो गुणाढ्योऽपि न सेवितुं वरं
गुणोज्झितोऽपि स्वजनो निषेव्यताम् ।
स्वपादलग्नं कुमुदं कदर्थयन्
निदर्शनं तत्र निदाघदीधितिः ।। १२

विधिस्तवेदृग् विनिवेद्यते कथं
विवेकमूढस्य किमन्यदात्मनः ।
कुलक्षयोऽभूदिति कोपमास्थितं
तमभ्यधादिन्द्रजितं विभीषणः ।। १३

अधर्ममत्युत्कटमात्मना कृतं
विपत्तिमुद्रां विनिहन्तुमक्षमम् ।
गदामिवाङ्के गमितव्यधान्विना
सहोद्भवन् सौम्यमधिश्रयेज्जनः ।। १४

पदं दुरन्तं परदारहारिणां
दयामुचां दैवतपीडनाकृताम् ।
इहापवादान्मरणं परं वरं
परत्र काचिन्न गतिः प्रसज्यते ।। १५

शिवालयोत्क्षेपकृतां क्रतुच्छिदां
न मायिनामीश्वरभक्तनन्दिनाम् ।
जयोदयो ज्येष्ठधनापहारिणां
स्नुषार्थिनामन्यवधूहृतामपि ।। १६

कपिः कुतः कौणपनायकः कुतो
क्व तस्य लङ्कानगरी क्व पावकः ।
क्व सागरः क्वाऽस्य निबन्धनक्रिया
भवत्यधर्मस्य फलं किमीदृशम् ।। १७

महेन्द्रसूनोर्नयनेऽपि वारिधे -
निर्बन्धनेऽप्यत्र निवारणेऽपि यत् ।
प्रभुत्वमस्यागणितं विमोहितं
फलं तदप्यस्य पितुस्तवापि सः ।। १८

स एव साक्षात् सरसीरुहेक्षणो
मदान्धवैरोचनिबन्धनावहः ।
भजस्व तातेन सहैनमानतो
यदि स्पृहा राक्षसराज्यसम्पदि ।। १९

इतीरितः कोपपरीतमानसो
विभीषणेनाहवकर्मभीषणः ।
स तत्क्षणं लक्ष्मणमेव हिंसितुं
ववर्ष बाणान् वलवैरिशासनः ।। २०

विभीषणस्यानुचरा विशङ्कटान्
विकृष्य चापान् विमतेषु वर्षुलाः ।
बबाधिरे बान्धवलोकमञ्जसा
परं हि मित्रं सुकृतं शरीरिणाम् ।। २१

अजस्रमाकर्णविकृष्टकार्मुक
प्रवर्तितोद्‌धामशराभिवर्षिणौ ।
परस्परं कृत्तविकृत्तदंसिनौ
प्रचेरतः पङ्क्तिरथास्यजन्मनौ (नन्दनौ?) ।। २२

हते ततो यन्तरि तत्क्रियां धनु-
र्प्रकर्षणं च प्रतिपादयन् सकृत् ।
स रावणिः सायकवर्षमुल्बणं
विमुच्य विस्मापयति स्म वानरान् ।। २३

द्विषत्तमो ध्वंसय तान् द्विजैर्द्विजै -
निर्जंर्मयूखैरिव ऋक्षनायकः ।
हनूमता राक्षसराहुपीडना -
दमोचि पर्वावधिनेव तत्क्षणात् ।। २४

ततः प्रमाथी शरभोऽस्य मादनः
स गन्धपूर्वः पनसोऽपि राक्षसः ।
शिरः सुवेगेनवहित्रवाजिनो
निपातनिर्घातनिभाव्य भञ्जयन् ।। २५

गभस्तिमप्यस्तमिते गरीयसि
प्रवर्तमाने प्रबले तमोभरे ।
बली शताङ्गादवरुह्य पत्रिणो
विसृज्य विन्याऽथ विपक्षसैनिकान् ।। २६

निजास्पदे न्यस्य पुनर्निशाचरान्
स वञ्चयित्वा स विभीषणान् कपीन् ।
प्रविश्य लङ्कां रथमध्यमास्थितः
पुनः प्रपेदे पुरुहूतजिद् रणम् ।। २७

स तादृशं साध्वसविस्मयाकुलैः
निरीक्ष्यमाणो निखिलैः प्लवङ्गमैः ।
रघूद्वहस्योपरि हेमरञ्जितान्
शिलीमुखानुत्सृजति स्म शीफरान् ।। २८

स लक्ष्मणः प्राह हसन् किमप्यमुं
कृतं दुरात्मन् क्रकचैर्विचेष्टितैः ।
तिरोहितश्चोर इवास्थि शिष्यते
क्षणं पुरो मे यदि वीर्यवानिति ।। २९

त्रिभिः शरैर्धन्व रिपो विचिच्छिदे
गृहीतमन्यच्च गभीरनिस्वनम् ।
विभिन्नसन्नाहमुरो विशङ्कटं
विपाटयन् वक्षसि पाटवेधनात् ।। ३०

महेन्द्रजिल्लक्ष्मणमार्गणाहतो
मुमूर्च्छ संज्ञां प्रतिपद्य तत्क्षणात् ।
स सप्तभिस्तं दशाभिर्मरुत्सुतं
शरेण विव्याथ शरैर्विभीषणम् ।। ३१

निकृत्तसूते निशितान् शरान् क्षिपन्
रथी स्वयं रथ्यकृतोचितक्रमः ।
कृतक्रुधा तानपि हारितो गदा-
प्रहारिणा तत्र विभीषणेन सः ।। ३२

विभिद्य शक्तिं विभिदा विभीषणो
दशास्यसूनोर्दशधा शरैरसौ ।
श्शंस्तदीये स पुनर्विचिक्षिपे
भुजान्तरे पञ्चभुजङ्गसन्निभान् ।। ३३

यमात्तमस्त्रं रिपुणाऽमुनालुनात्
स यक्षराट् दत्तमिषुं समादिशत् ।
ततः स रौद्रेण बिभेद दारुणं
जहार सौरेण च जातवेदसम् ।। ३४

अरातिना प्रेरितमस्त्रमासुरं
महेश्वरास्त्रेण निवार्य लक्ष्मणः ।
पुनः पृषत्कं समधत्त कार्मुके
पुरन्दरास्त्रेण कृताभिमन्त्रणम् ।। ३५

स सत्यसन्धो यदि राघवो जयी
　　जहि द्विषं जम्भभिदन्तकं शरः ।
इतीरितस्तेन विरोधिनः शरः
　　शिरो गिरेः श्रृङ्गमिव न्यपातयत् ।। ३६

दिनत्रयात् सूदितदाशकन्धरिः
　　स पूर्वजाय प्रणतोऽभिनन्दितः ।
सुषेणनीतौषधिगन्धवेधनात्
स सत्त्वमुच्छल्य धनुः समासदत् ।। ३७

हते कुमारे हरिगर्वशासने
　　विधेर्विपाकाद् व्यथितो दशाननः ।
हहा हहा हाहह हाहहेति गां
　　मुखैरशेषैर्मुमुचे मुमोह च ।। ३८

प्रपद्य संज्ञामथ पङ्क्तिकन्धरः
　　कथञ्चिदुन्मील्य दृशो जलाविलाः ।
तथा स चक्रन्द यथास्य जीवितं
　　तदैव कण्ठैर्गलितैरिवागलत् ।। ३९

विजित्य वृत्रारिमपि प्रजान्तकं
　　विहन्तुमप्याजिषु वीर्यमास्थितः ।
कथञ्चमे तस्य निरस्य निघ्नतां
　　हतोऽथवा केन विलङ्घ्यते विधिः ।। ४०

त्वयि प्रयाते सुरमण्डली पुन -
　　र्भजेत निद्रासुखमद्य निर्भया ।
सुताय पित्रा कथमौर्ध्वदेहिकं
　　विधेयमेवं विलपद्दशाननः ।। ४१

निसर्गरौद्रेण निरूढमन्युना
निशाचराणामधिपेन जज्वले ।
युगान्तयोगादिव बाडबाग्निना
कृतान्तकोपादिव कृत्तिवाससा ।। ४२

विमत्थ्यमानार्णववीचिमालिका
विषाग्निधूमालिरिवास लम्पटा ।
ललाटपट्टे रजनीचरप्रभो -
र्जृजृम्भमाणा भ्रुकुटी व्यभाव्यत ।। ४३

निसर्गरक्ता अपि रञ्जिता रुषा
दिनान्तवह्नेर्दधिरे श्रियं दृशः ।
पतच्छिलानादसमारदावलेः
कटु जजृम्भे दशतः कटात्क्रिया ।। ४४

स तैलबिन्दूनिव दीप ऊष्मलान्
विषद्रवान् दृष्टिविषो यथोरगः ।
निपातयामास दृशा प्रदीप्तया
प्रकोपशोकप्रभवान् पयःकणान् ।। ४५

चिरवादिषु मृत्युमिवाऽखिलं जगत्
विजृम्भमाणोद्वान्त सधूमपावकम् ।
अमुष्य चक्षुः पतनात्तमूर्तयः
पलाशनाः पर्यहरन्त पार्श्वकाः ।। ४६

हते हि वत्सेऽद्य कृतं ममासुभिः
किमन्यदेतानि जगन्ति संप्रति ।
विभिद्य सप्तापि च पाथसां निधीन्
प्रकाममेकोदकयन्त मद्भुजाः ।। ४७

नरो न लक्षं मम नाक एव तं
        बिभेद एतं विजयोत्सुकामरम् ।
विरिञ्चदत्तं सशरं शरासनं
        विनिष्ठता पञ्च विभञ्जये क्षणात् ।। ४८

विधुष्यते नेति विदेहजां......
        जिघांसुनाऽशोकवनं विगाह्यत ।
सुखेन किं मे सुतघातिनः प्रिया -
        ममूं वधिष्याम्यसिनेति राक्षसः ।। ४९

ततः स पार्श्वेन निवारितोऽभवद्
        विलापिनीं हन्तुमना विदेहजाम् ।
प्रतस्थिवान् कृष्णचतुर्दशी तिथौ
        प्रमथ्य रामं भज मैथिलीमिति ।। ५०

प्रसाधिताः प्राञ्जलिना बलाधिपाः
        प्रतस्थिरे सागरमुद्यतायुधाः ।
कपीश्वरांस्तान् नियतान् रघूद्वहो
        विलोक्य बाणान्.........विचिचिक्षिपे ।। ५१

प्रयुज्य गान्धर्वमथाऽस्त्रमन्त्रवित्
        संमोहयामास तदा तमीचरान् ।
अमीभिरेकोऽपि कथा सहस्रधा
        विलक्षितः संयति चापकोटिभिः ।। ५२

तथा रथानामयुतं तथाहवे
        स हस्तिनामष्टसहस्रसंयुतम् ।
चतुः सहस्रोत्तरमच्छिनच्छरैः
        दिनाष्टमांशे प्रयुतं च वाजिनाम् ।। ५३

ततो महापार्श्वविरूपलोचनौ
महोदरश्च प्रहितो मरुद्द्विषा ।
रुरोध तच्छस्त्रभरं कपीश्वरो
घनान्तवह्नीनिव वार्षिको घनः ।। ५४

रथं विहायाऽथ गजं कपीश्वरो
विरूपनेत्रं विकटेन शाखिना ।
विभग्ननागं भुवि चेभयायिनं
सखेटखड्गं सहसाश्मनाभिनत् ।। ५५

अरिष्ठघाती प्रतलप्रहारिणा
हतः क्षणाच्छङ्खतलेऽर्कसूनुना ।
विवृत्तनेत्रो रुधिरं वमेन्मुखो -
द्विरूपनेत्रत्वमवाप सार्थकम् ।। ५६

महोदरं क्षोभितवानरं रणे
गता हताशुद्रववर्षगर्विणाम् ।
विभग्नरथ्यं पतितं महातले
प्रगृह्य कञ्चित् परिघं पतङ्गजः ।। ५७

द्विषद्गतास्ते परिघं तथाविधं
करे गृहीत्वा तमथ क्षमागतम् ।
महोदरे प्रक्षिपति स्म सोदरौ
गतामुभौ तत्र बभञ्जतुर्मिथः ।। ५८

ततो नियुद्धं चतुरं वितेनतुः
सखेट निस्त्रिंशकरौ प्रजह्रतः ।
करच्युतासेरसिना शिरो रिपो-
र्विचिच्छिदे विश्वविलोकनात्मनः ।। ५९

पचेलिमानीव फलानि भूरुहां
निपातयन्तं कपिवीरमस्तकाः ।
अहं महापार्श्वमहंयुमाहवे
प्लवङ्गभर्तुः परिघेन नन्दनः ।। ६०

रथं च रथ्यांश्च बभञ्ज जाम्बवा -
स्तदन्तरे तस्य महीयसाश्मना ।
अमूर्च्छदस्तेपुमसावशाद्धनुः
........शरास्त्रशून्यमङ्गदः ।। ६१

सकर्णमूलेऽभिहतः सकुण्डले
तलेन भूयः प्रहरन् परश्वथी ।
स्तनान्तरे वालिसुतेन मुष्टिना
दृढेन विद्धो दलति स्म राक्षसः ।। ६२

ततो दशास्यो रघुवीरमासदत्
प्रचोदिदाश्वः प्रसभं रणाङ्कणे ।
स तामसास्त्रेण ददाह वानराः
दिशः पलायन्त च ते समन्ततः ।। ६३

शरान् सुमित्रातनयेन पातितान्
निवार्य रामं समरे समैक्षत।
अभङ्गुरालीढमवाप्तकार्मुकं
जये पुराणामिव जृम्भिताम्बरम् ।। ६४

रघूद्वहाख्यं रजनीचरेश्वरं
पुमांसमालोक्य पुरातनं पुरः ।
अवाकिरत् कालभवासितोपल -
च्छदाभिरामच्छविभिः शरोत्करैः ।। ६५

अपि क्ष्माभृद्दलनेप्यभङ्गुराः
　　प्रदीप्तदम्भोलिपरम्परा रुचः ।
अभेद्यवर्मण्यधिपे पलाशिना -
　　नरामयाणां व्यसनं न चक्रिरे ।। ६६

दधार रौद्रेष्वसनोत्थिताः शरा
　　ललाटमग्ना रघुवंशजन्मनः ।
परस्य पुंसः कदनं च चक्रिरे
　　कृपाप्रकर्षात् कुशचन्द्रधारिणः ।। ६७

शरा विसृष्टाः परमास्त्रमन्त्रिताः
　　रघूद्वहेन प्रति राक्षसेश्वरम् ।
प्रदीप्यमानाग्निशिखावतंसिताः
　　प्रविन्यथुः कृष्णफणाधरा इव ।। ६८

निवार्यतानासुरमस्त्रमाददे
　　निशाचरेन्द्रो नितरां प्रकोपितः ।
ततः समुत्पेतुरसह्यरंहसो
　　मृगान्तकव्यालमुखाः शिलीमुखाः ।। ६९

स पावकास्त्रेण निरास तत्पुन -
　　स्तटित्गृहोल्कास्य शराभिवर्षिणः ।
अथो यमस्यास्त्रममोचि रक्षसा
　　मुसृण्डिवज्रास्यमुखायुधावहम् ।। ७०

शरेषु गान्धर्वमथास्त्रमर्पयन्
　　मयास्त्रमन्त्रं मनुवंशवर्धनः ।
अभञ्जयत् काञ्चनचाणपञ्जरैः
　　शरेण शक्रास्त्रमपि प्रचोदितः ।। ७१

तदन्तरे लक्ष्मण एत्य सप्तभिः
शरैर्ध्वजं पञ्चभिरच्छिनद् धनुः ।
रुरोध रथ्यां रुधिराशिनां प्रभोः
गजेन्द्रनीलान् गदया विभीषणः ।। ७२

अरातिनां कामपि शक्तिमुज्झितां
विभीषणस्योपरि वीक्ष्य लक्ष्मणः ।
त्रिभिर्बिभेद त्रिशिराद्रिगह्वर
प्रसृत्वरार्चिप्रकरैः पतत्रिभिः ।। ७३

अवार्यवीर्या रणदष्टघण्टिकां
यमस्य शक्तिं परमां मरुद्विषि ।
प्रयुञ्जत व्यञ्जितभीर्विभीषणः
स्वरक्षणायाश्रयति स्म लक्ष्मणम् ।। ७४

विभीषणत्राणकृतो विशङ्कटे
निपत्य रामावरजस्य वक्षसि ।
निमज्य सा निर्गलिताऽवनीतले
पपात तच्छोणितपानपाटला ।। ७५

विरुग्णमूलो विटपीव लक्ष्मणः
पपात भूमौ परिघूर्णितेक्षणः ।
शुशोच दृष्ट्वावरजं तथा भवद्
हृदीव भिन्नः पविना रघूद्वहः ।। ७६

न दुःखकालोऽयऽमरेश्चिरेप्सितो
रणो ममासीदत एव लक्ष्मणः ।
भवद्भिराजौ परिपाल्यतामिति
प्रभुः शशास प्लवगान् स राघवः ।। ७७

द्विपं परिद्राव्य शरैर्द्रुतेरितैः
कनिष्ठमुच्छल्ययति स्म राघवः ।
सुषेण वाक्चोदितमारुताङ्गभू -
सश्रृङ्गनीतौषधिगन्धसङ्क्रमात् ।। ७८

रथान्तरारोहिणि रावणे रणे
रघुप्रवीराय रथं पदातये ।
विशङ्कटं श्यामहयं सकार्मुकं
सशक्तिमस्मै प्रजिघाय वासवः ।। ७९

हरिद्भिरज्ञातमहीतलाकरैः
पतद्भिराकाशपथे तुरङ्गमैः ।
संयुक्तमारुह्य रथं समावुभौ
स तार्क्ष्यमारूढ इवाम्बुजेक्षणः ।। ८०

गुणेन कर्णान्तगतेन भूषितं
प्रशस्तवंशप्रभवं समुन्नतम् ।
स राघवः सायकमापदत्यये
शरासनं मित्रसमं समाददे ।। ८१

पदेन पृथ्वीमवपादयन्नघः
स्वपाणिना द्यामवनामयन्निव।
धनुः समारोप्य गुणं निषङ्गतो
विलादिवाहीन् शरमुच्चखान सः ।। ८२

दिगन्तसन्ध्यानिव दारयन् दृढं
विपाटयन्नण्डकटाहमुत्तमम् ।
स चापमौर्व्याश्चलयन् वसुन्धरां
महानुदस्थान् मरुद्ध्वनिध्वनिः ।। ८३

दिशावुभे दक्षिण उत्तरे नयन्
　　समायतीं संहितधौतसायकः ।
अधिष्ठितालीढपदः समुष्टिना
　　चकर्ष कोदण्डमखण्डविक्रमम् ।। ८४

मणिप्रभाकार्मुकमण्डलान्तरे
　　स तत्स्थिवान् लक्ष्मणपूर्वसम्भवः ।
समुल्लसन्नादशिलीमुखोन्मुखे
　　पुमानिवाद्यः प्रणवान्तरे स्थितः ।। ८५

शरः किलैषो धनुषोऽस्य निर्गतः
　　शरानिवासूत सहस्रकोटिशः ।
प्रसाधिताः प्राञ्जलिना बलाधिपाः
　　प्रतस्थिरे सागरमुद्यता......... ।। ८६

....
　　................. सूतसहस्रकोटिशः ।
न सन्धिसङ्कर्षणमोक्षणक्रमो
　　व्यभाव्यताप्यक्षयबाणतूणता ।। ८७

सुवर्णपुङ्खद्युतिभिर्नभःस्थले
　　विनिर्ममाणे इव विद्युदावलिम् ।
रघुप्रवीरस्य रणेन भूयसा
　　शिलीमुखाः पेतुरराति बाहुपु ।। ८८

निपीय रक्षोरुधिरासवं..
　　विदार्य तद्द्वीपमहीतलान्तरम् ।
शराः प्रविष्टाः सलिलाकरान्तरे
　　विधातुकामा इव तेऽधमर्षणम् ।। ८९

स दैवगन्धर्वमुखास्त्रमोक्षण -
प्रतिक्षणव्याप्ततयोः परस्परम् ।
पराजयं वा विजयो न पश्यतो -
रभूद्रणं राक्षसराघवेन्द्रयोः ।। ९०

अरुन्तुदारास्त्ररसाभिवर्षिणः
स वारयिष्यन् रघुवीरसायकान् ।
जगत्रयीदाहमिवाभिलाषुको
जजाप मन्त्रं युधि जातवेदसम् ।। ९१

वियत्स्वरूपस्य विरूपचक्षुषो
रराट लालाटतटादिवोत्थितः ।
हरिल्लतापल्लवसल्लवच्छिखा
कदम्बकोट्यः कलुषा मदध्वजः ।। ९२

निपीनिःशेषजलान् वलाहकान्
विभावसुर्भस्मभरानिवोत्किरन् ।
जुघूर्णसौवर्णविमानमण्डली
न खण्डमुद्रावधि तां दिवौकसाम् ।। ९३

पयांसि भूयांसि .... मरुध्वने
विमालमैनाककुलाकुलेऽनलः ।
प्रकाशमाकाशपयोनिधौ परं
ललामलालामिव वह्निसन्निभः ।। ९४

विलापयामास वलारिवासभू -
तरङ्गिता हारकपङ्कजाटवी ।
नभः सदां त्रासतरङ्गिताङ्गना
स्वयं यथाश्लेषसुखावहः शिखी ।। ९५

प्रशान्तये तस्य निशान्तमुद्यतो
युगान्तसन्तापमिवापवृण्वतः ।
स रामनामा सकलाशरेशयः
ससर्ज पर्जन्यकृदस्त्रमन्त्रवित् ।। ९६

प्रचण्डकोदण्डरटत्तडिद्गुण-
प्रकर्षणोत्कर्षणकाण्डवर्षिणाम् ।
स भर्जितस्फूर्जयुगर्जिताम्बरा
घनाघनानञ्जघनाघनाघटा ।। ९७

कृताट्टहासस्तनितं कृपीडजं
हठेन हालाहलरूपमाहरन् ।
नभोर्णवे नर्तयिता तटिज्जटा
कदम्बमम्भोधरकालभैरवः ।। ९८

उपागतेऽपि स्वयमाशुशुक्षणा-
दुदन्वदन्तं हितचञ्चला छलात् ।
शिखावतः शीर्णतरा शिखा क्रुधा
चचर्व वार्वाहघटा हठादिव ।। ९९

समग्रलग्नानलसन्ध्ययाम्बुभृ -
त्तमिस्रयोत्सारितहंसचक्रया ।
नभःश्रिया नर्तितनीलकण्ठया
दशाननस्यास्तमयाचितं दृढम् ।। १००

पयोभिरापन्ननिपातिभिर्दिवः
पुरोऽपि कोपादुददीपि पावकः ।
विगाह्यते किं पुरतो विरोधिनो
मलीमसानां पुरतो मनस्विभिः ।। १०१

सधूममुत्पादयति स्म तादृशं
पयोधराणां परिधूतये ध्रुवम् ।
अमीच चामीकररोचिषोऽमुच -
न्नुदर्चिषो बोधयितुं क्षणार्चिषः ।। १०२

अपः पताकिन्यवपातिताशनि-
र्ववर्ष धारालतरं तथाम्बुदः ।
निपीडितस्तत्र यथा निशाचरो
विदेहकन्यामपि हातुमैहत ।। १०३

विपत्तिमुत्सार्य विशीर्णविद्रुमा
रमासहायस्य रघूद्वहस्य च ।
युगान्तबन्धोरुपचक्रुरर्णवा -
र्न वारिता नर्तितविद्युतो दिवि ।। १०४

कारालकालाञ्जनकालिकामुषां
पयोधराणां पयसा गरीयसा ।
कृपीडयोनिक्षयमभ्युपागमत्
कथं न कार्यस्य ययोर्हि कारणे ।। १०५

प्रभूतवेगं परिभूय पावकं
करालया कालिकयाप्यगम्यत ।
ततः परं सर्वत एव पावकः
प्रशाममाशङ्क्य रघुप्रभोरिव ।। १०६

व्यपास्य वैयाहववायमात्मनो
व्यपेतवत्यम्बुमुचां कदम्बके ।
अनन्तरं गन्धवहान्धसां निधिं
समन्त्रमामन्त्रयति स्म रावणः ।। १०७

विपक्वगुञ्जाभविषोल्वणे क्षणा-
ग्निजस्फोटां भोगनिवारितातपाः ।
कृतान्त हस्तान्तरपातशोभिनी
ससर्प सर्पावलिरभ्रमण्डले ।। १०८

विलोलजिह्वोभयलीढसृक्वणा -
विषानलज्वालकणाभिवर्षिणाम् ।
प्रभूतफूत्कारभृतां फणाभृतां
विलोकनं प्राणहरं विधेरपि ।। १०९

वपुष्यशेषेऽपि दृढं फणाधरै -
र्वलीमुखाः संयमियां बभूविरे ।
निजाश्रयाणां नियतं महीरुहां
रणात्ममुन्मीलयतः समन्युभिः ।। ११०

सरीसृपैरञ्जनपट्टसन्निभैः
प्लवङ्गमाः कुड्कुमपड्कपिङ्गलाः ।
चकाशिरे यन्त्रितसर्वविग्रहाः
सुमेरुकूटा इव मेघसंवृताः ।। १११

पदे कटौष्णि.....भुजान्तरे गले
श्रुतौ शिरस्यप्यवलम्बमानया ।
फणीन्द्रपड्क्त्या प्लवगैः प्रसाधितै -
रभावि रुद्रैरपरैरिवारुणैः ।। ११२

वनालयानां मुखमण्डपेषु ते
दिनान्तसन्ध्यातपदीप्रकान्तिषु ।
चकाशिरे चण्डमरीचिमण्डले
गृहाभिलुब्धा इव राहुबन्धवः ।। ११३

फणाधराणां प्रतिरुद्धदिङ्मुखं
　　प्लवङ्गसेनाभिमुखं प्रधावताम् ।
विनाशहेतोः कुलभूर्विवस्वतः
　　सुपर्णकेतुः ससुपर्णमस्मरत् ।। ११४

अथाविरासन्नधिपाः पतत्रिणां
　　महेन्द्रवज्रव्रणमात्रमण्डनाः ।
स्वपक्षविक्षेपसमीररंहसा
　　समूलमुन्मीलितपार्श्वपादपाः ।। ११५

समीक्ष्य ताक्ष्यान् ससहासमण्डलं
　　परस्परस्योपरि पातिनो भयात् ।
परासकाकुत्स्थवलात् फणाधरः
　　कुतः प्रवेष्टुं कुहराण्यलप्सत ।। ११६

द्विधा नभः कर्तुमिवावपातिनां
　　पतत्रिणां पक्षबलेन तादृशः ।
निरस्यमानात्मनि बर्हणानहीन्
　　मरुद्ध्रुवं मत्सरशुद्धिमभ्यगात् ।। ११७

नवातपाभे नवसङ्गमव्रजे
　　समीपतत्याशु समीररंहसि ।
तमः समैः कञ्चुकिभिः समं ततो
　　विमुच्यमानं गगनं विदिद्युते ।। ११८

क्वचिद् भुजङ्गैरसितैः करम्बितं
　　क्वचिद् गरुद्मद्गणरागरूषितम् ।
स्वपार्श्वयुग्माश्रितरात्रिवासरा
　　सुमेरुशैलश्रियमासदन्नभः ।। ११९

प्रसादिताः पातित पक्षमारुतैः
　　विपाटिताम्भोनिधिवीचिराजयः ।
विभङ्गमैन्द्रातिचरन्ध्रसातल-
　　भुजङ्गराजाभ्युरणोद्यता इव ।। १२०

उदस्य तुण्डैरुरगानवाङ्गुखं
　　प्रलम्बयन्ती विलसत्फणामणीन् ।
प्रभोः पुरस्तात् पततां परम्परा
　　चकार नीराजनचातुरीमिव ।। १२१

स तीरपर्यस्तनभस्तरङ्गिणी
　　सुवर्णपद्माकरसोदरश्रियम् ।
गणेषु तन्वत्सु सतां गरुद्मता -
　　मभावि भङ्गै............... ।। १२२

स्वभावपिङ्गास्वपि विपक्षमन्युना
　　विपा...लाङ्गा विहगा जगाहिरे ।
प्रकाशमाकाशहुताशभीषिकां
　　तरङ्गितां तान्तपनीयश्रृङ्गिणाम् ।। १२३

प्रगृह्यमाणे मलिने फणिव्रजे
　　परम्पराभिर्गगनं पतत्रिणाम् ।
चलाचलोदञ्चितचुञ्चुचातकै -
　　रचायि मेघाचिररोचिरञ्चितम् ।। १२४

प्रसाधितुं पत्रसुवर्णपट्टिका -
　　निजाकषन्तो निकषाश्मनीमुखे ।
विरेजिरे व्योम्नि तदीय कालिका -
　　विरासवद् व्यालगणाः सितेतराः ।। १२५

पुरागताहौ पुरुषं पुरातनं
प्रदक्षिणीकृत्य गते पतद्गणे ।
निशातमप्रापणमापदागमे
दशाननः स्वापनमस्त्रमानयत् ।। १२६

दिशामिवैक्यं दिशतां कदम्बकां
न्यधः समावर्जयतामिवाम्बरम् ।
तमालभासां तमसां गरीयसा
जगत्रयान्धङ्करणानि जज्ञिरे ।। १२७

विहस्तहस्तश्लथवृक्षपर्वताः
सुखं न यावत् सुषुवुः प्लवङ्गमाः ।
स तावदस्त्रं प्रजिघाय राघवः
तमोपनुत्यै तपनोदयावहम् ।। १२८

तमांसि भूयांसि निरस्य तत्क्षणा-
त्पुनः प्रकाशः स्फुरति स्म भास्वतः ।
अनादि संमोहनिबन्धनं जनं
व्यक्तां स्वयं ज्योतिरिवात्मवेदिनः ।। १२९

इत्येवमस्त्रं रजनीचरेण यत्
प्रयुक्तमस्त्रं रघुवंशकेतनः ।
तत् तन्निरास्थ प्रतिहेति पातितैः
सिन्धुं युगापाय इवौर्ववह्निः ।। १३०

अस्त्रेष्वपास्तेष्वरिणा प्रकुप्यन्
प्रत्यस्त्रशक्त्या प्रभुराशराणाम् ।
रथाधिरूढं रथरक्षमैन्द्र -
माच्छादयामास पृषत्कवृष्ट्या ।। १३१

रथं निजं रुन्धति राक्षसेन्द्रे
　　शरान्धकारे सकलं समन्तात् ।
न तस्य जज्ञे न तु चापयष्टे -
　　राकर्षहेतोरवकाशलेशः ।। १३२

केतौ निर्दलितेषु तेषु तुरगेष्वस्ते मरुत्सवामिनो
यन्तर्यन्तरिते शरैस्त्रिभुवने गर्जत्यलं रावणे ।
लक्ष्मीः प्राणसमे रघोः कुलभवे क्रोधोद्यमच्चुक्षुभे -
....र्वत्तयुद्दलितौर्ववह्निरुधिरः पूर्वानुभूतं स्मरन् ।। १३३

श्रीरामाभ्युदयेऽत्र काव्यतिलके सर्गस्त्रयोविंशतिः ।

इति रामाभ्युदये त्रयोविंशः सर्गः ।

चतुर्विंशः सर्गः

यच्छ्रीमतस्तस्य रघूद्वहस्य
ललास कोपभ्रुकुटी ललाटे ।
हन्तुं तमो रावणमाविरासीत्
कालस्य साक्षात्करशूलमेव ।। १

आलोक्य दौर्मध्यमनुप्रविष्टु -
मपादुकं दाशरथिं निमेषात् ।
शक्त्या तदैन्द्र्याया शकलीचकार
विवेकशक्त्यैव यमी विमोहम् ।। २

तत्राश्मभिर्गाढहतं प्लवङ्गैः
शरैश्च तेनैक धनुर्धरेण ।
रक्षःपतिं वीक्ष्य विघूर्णिताक्षं
यन्ता रथं क्वापि ततो विनिन्ये ।। ३

नीतोऽस्मि युद्धात् किमिह त्वयन्ति
कोपोन्मुखं यन्तृकुलं क्रमोक्त्या ।
यन्ता दशास्यं चतुरो नु निन्ये
दिदेश हस्ताभरणं स तस्मै ।। ४

आकृष्टकल्पानिलवेगपूर्व -
मग्रे रिपोः सारथिचोदिताश्वः ।
आकर्णमाकृष्य शरासनानि
भूयो रणस्थानमुपाससाद ।। ५

महेन्द्रयन्ता मनुजेन्द्रसूनोः
सञ्छादयामास तथा शताङ्गम् ।
यथा स्वयं राक्षसराजयन्ता
लज्जेत भर्तुः कटकप्रसादात् ।। ६

संवर्तयातैरिव सानुमन्तौ
वात्याविशेषैरिव रथ्यवाहौ ।
आकृष्यमाणौ हरिभिः स वेगं
सञ्चेरतुः कूबरिणौ तदीयौ ।। ७

निर्दारयन्तौ निजनेमिपातै
कुद्दालपातैरिव भूतधात्रीम् ।
प्रेङ्खोलपट्टांशुककेतुलक्षात्
करौ सखं गाविव कम्पयन्तौ ।। ८

पश्चात् पुराकर्षणचोदनाभ्यां
प्रत्यर्थिनीवोत्पतितुं प्रवृत्तौ ।
कणक्वणत्काञ्चनहेमघण्टा -
व्याजादिव व्यञ्जितवीरवादौ ।। ९

चकासतौ चामरसन्निवेशैः
दर्पाट्टहासच्छविदर्शनीयैः ।
निमग्नशल्यैर्निकरैः शराणां
सरोमहर्षाविव सञ्चरन्तौ ।। १०

सञ्जातपक्षाविव सानुमन्तौ
वंशाविवाद्यस्य च सूकरस्य ।
आलोकश्रृङ्गभ्रमदभ्रलक्ष्म्या -
दासूत्रयन्ताव सितातपत्रे ।। ११

उत्थापितं सान्द्रतरं परागैः
द्यावापृथिव्योः परिवर्तयन्तौ ।
चक्रस्वनैः संहृतयो रघूणां
दम्भोलिपातानिव दर्शयन्तौ ।। १२

पश्यत्सु सैन्ये परस्परस्य
मध्यस्थभावाज्जडभङ्गवृत्योः ।
अन्योन्यसन्दष्टतयानुबन्ध -
मायोधनं राघवरावणाभ्याम् ।। १३

विसृज्यमानेषु शरेषु ताभ्यां
व्योम्नो विमानं.....मतां व्यतीयुः ।
पक्षप्रणादप्रसरैस्तदीयैः
पर्यस्फुटन् पर्वतकन्दराणि ।। १४

तिलान्तरेणापि विनाशनौघै -
स्तिरोहितेषु त्रिषु विष्टपेषु ।
वाक्सायकैर्वाचि फलैः स धन्वी
निर्भर्त्सयामास निशाचरेन्द्रम् ।। १५

रक्षोऽधम! त्वज्जननं त्रिलोक्या
विक्षोभणं रावणशब्दमात्रात् ।
शून्योऽसि किं शूरवने तदानीं
चोरोऽपहृत्य स्वयमेव पत्नीम् ।। १६

मत्सन्निधौ मैथिलराजकन्यां
हर्तुं व्यवस्यन् यदि साहसेन ।
रक्षःकुलस्य क्षय एव न स्यात्
त्वमेक एव त्वरितं निहन्याम् ।। १७

मायामृगं मद्गतिरन्यतस्त्वं
　　काषायिवेषेण कथाप्रसङ्गम् ।
आकाशयानं पतगोपनार्थ -
　　मापाद्य वीरोऽसि कथं विलक्षः ।। १८

शिरांस्यशेषाणि शिलीमुखैस्ते
　　छिन्द्याज्जगत्याः सममेव भीत्या ।
हा कष्टगर्ह्याण्यमराङ्गनानां
　　प्रमार्जयिष्ये परिदेवितानि ।। १९

मौर्व्या निबद्धस्य तवार्जुनेन
　　वैरोचनस्त्रीजननर्तकस्य ।
दोर्मूलभाजा पुरुहूतसूनो -
　　र्दुरात्मनः स्यात् क इवाभिमानः ।। २०

शरैर्मदीयैस्तव मस्तकानि
　　निपात्यमानानि निमेषमात्रात् ।
करेपु कृत्वा समरे करोतु
कालि स्वयं कन्दुकखेलनानि ।। २१

इतीरितं काञ्चनपुङ्खलक्ष्मी
　　तडित्प्रकाशस्तबकैः पृषत्कैः ।
स तस्य गात्रं स्थगयाञ्चकार
नगा इव व्योमनवाम्बुवाहैः ।। २२

ततः प्रयुक्तेन शरोत्करेण
　　विद्रावयामास विभुर्विपक्षम् ।
तुषारशैलज्वलनोष्मलेन
　　शुचाविवांशुप्रकरेण सूर्यः ।। २३

कादम्वसूर्यः ककुभो बभूवुः
कोदण्डघोषैकमयं नभोऽभूत् ।
संजज्ञिरे रक्तमयाः समुद्राः
तत्राजनि त्रासमयी त्रिलोकी ।। २४

व्योमेव माना विपरीतवृत्या
चिक्षेप वेगादिति नात्र चित्रम् ।
उत्पाटयामास गिरीन् यदुच्चैः
पक्षानिलस्तच्छरमण्डलानाम् ।। २५

अत्यादरेणाकुलितान्तरात्मा
न प्रीतिमाबध्यत नारदोऽपि।
काकुत्स्थरक्षः कलहावलोकात्
कालाग्निरुद्रोऽपि च विस्मयेन ।। २६

विष्फारघोषैर्विशिखासनानां
पुस्फोट.................... ।
तत्रासभूर्मारुतताडिताब्ज
पत्रागताम्भः कणिकाप्रकारन् ।। २७

मनस्यकुर्वन् महतोद्यमेन
रणे कृते राघवरावणाभ्याम् ।
दशाननः स्याद् विजयीति दैत्याः
रघूद्वहः स्याद् विजयीति देवाः ।। २८

परस्पराऽस्त्रानलपातभीमे
तयोः प्रवृत्ते समरे समाने।
पतिः प्रजानां प्रलयावतार-
माब्रह्मकीडस्पृशमाशशङ्के ।। २९

मन्देहशत्रोरगमन्मयूखाः
सन्देहकाष्ठामिति तन्न वाच्यम् ।
रामाभिवृष्टैरिषुसन्निपातै -
र्नाम्नापिशून्यं नभसो यदासीत् ।। ३०

तयोर्मिथः शस्त्रसहस्रघातात्
समुज्जिहानैर्ज्वलनैः समन्तात् ।
चत्वाथ पूर्णश्चतुरर्णवाम्भः
सुत्रामवापीति शुशोष किं तत् ।। ३१

अस्त्रानलेभ्यश्चकितानलोऽपि
पक्षानिलेभ्यः पवनोऽपि तेषाम् ।
संरम्भमालक्ष्य तयोश्च साक्षात्
देवी चकम्पे रणदेवतापि ।। ३२

भित्वा द्विषं भूमिमपि प्रविष्टान्
काकुत्स्थबाणान् कतिचित् फणीन्द्राः ।
सुवर्णपुङ्खानवलोक्य दूरात्
सुपर्णपातभ्रममध्यगच्छत् ।। ३३

वेधाः स्वयं तच्छरवेधभीत्या
नालीकपीठं मुकुलीचकार ।
स भार्गवैः सङ्घटयाम्बभूवुः
स्वर्गे सुवर्णस्य कवाटपट्टान् ।। ३४

रक्षःपतेस्तस्य च राघवस्य
शस्त्रास्त्रचातुर्यमदृष्टपूर्वम् ।
विलोक्य विस्मेरमनास्तदानीं
स्वामिन्यभूत् सुम्भनिसुम्भहन्त्री ।। ३५

निपातिभिर्दिक्षु तदीयबाणै -
निर्भिन्नकुम्भा हरिदन्तनागाः ।
प्रशस्यमानैः क्षतजप्रभावैः
श्रृङ्गाररागश्रियमध्यगच्छन् ।। ३६

पर्यायशश्चुछिन्नगणानि हित्वा
धनूंषि गृह्णन् धनुरन्तराणि ।
आसारपातेन सुसायकाना-
मद्वैतधानुष्कमरिं प्रजानाम् ।। ३७

अन्योन्यमाबद्धशराभिवर्षौ
रघूद्वहः सोऽपि च राक्षसेन्द्रः ।
वितेनतुर्वेदितविश्वचक्र -
मायोधनं सप्तदिनान्यभङ्गम् ।। ३८

अहङ्क्रियावीररसातिरेक -
क्रोधान्तवेलाक्षुभितान्तरात्मा ।
स तं रणे सत्त्वरमभ्यधाव -
न्मूर्खो गदाभिर्मुसलैश्च हन्तुम् ।। ३९

शिरांसि तस्यैकशतप्रहार -
च्छिन्नानि काकुत्स्थशरैर्निमेषात् ।
पुनः पुनः सङ्घटितो न्यभूव
हर्षैर्विषादैः सह खेचराणाम् ।। ४०

अथोपदिष्टं गगनागतेन
महर्षिणाचान्तमहार्णवेन ।
वीरो विवस्वद्धृदयं स जप्त्वा
व्याकृष्टधन्वा विशिखान् ववर्ष ।। ४१

चलत्सु भूतेषु दलत्सु शैले -
ष्वाघूर्णमानेषु महार्णवेषु ।
आसीत् सुदेवेषु च वैरिरक्षां
स्थिरां विधातुं चकमे स रामः ।। ४२

प्राणोरगं पङ्क्तिमुखस्य सीता -
सन्तापनिर्वापणकालमेघः ।
ससन्दधे धन्व निबद्धमस्त्रं
पैतामहं पङ्क्तिरथात्मजन्मा ।। ४३

देदीप्यमानं दशधा तमस्त्रं
द्यावापृथिव्योः स्थगितावकाशम् ।
आविध्य लङ्केश्वरबाहुमध्य -
मानागलोकं भुवमाविवेश ।। ४४

क्षिप्तान्यतीते दिवसे किरीटा-
न्यरातिनान्वेष्टुमिवाकुलानि ।
पेतुः पृथिव्यां पिशिताशनस्य
वक्त्राणि वल्भन्मणिकुण्डलानि ।। ४५

प्राणस्थितौ देहभरो लघुः स्यात्
प्राणावसाने हि गुरुः प्रतीतः ।
जीवे गुरुर्जाग्रति रावणस्य
गते नु भूमेर्गत एव भारः ।। ४६

पर्यस्तहस्तं पतिते धरण्यां
कबन्धतामेयुषि कौणपेन्द्रे ।
अपि प्रभोरादिमकूर्मपृष्ठे
पेते घणात्कारिमणिस्फुटाभिः ।। ४७

श्वासे प्रशान्ते दशकन्धरस्य
　　वपुः सुखं गन्धवहा जगत्याम् ।
वक्त्रेषु वैवर्ण्यमुपागतेषु
　　तस्य प्रसेदुः सकला दिशोऽपि ।। ४८

नगैरुपेतः पतितैर्नदीनां
　　मस्त्रं मयीनामवतारपूर्णः ।
रेजे निरुद्धः खगमण्डलेन
　　नृत्यत्कबन्धं समराम्बुराशिः ।। ४९

रथेषु रुग्णेष्वखिलेषु रक्षः
　　प्राणासवास्वादपरायणस्य ।
रथः कृतान्तस्य वरं रणान्तः
　　सचक्रचीत्काररवं चकार ।। ५०

न कुम्भकर्णस्य यथा गतेऽह्नि
　　नाहारयित्वा मम राघवेण ।
च्छिन्नं शिरोऽभूदिति चिन्तयित्वा
　　प्रायः कबन्धः प्रमदां ननर्त ।। ५१

प्रकल्प्य भोज्यो युधि पत्रजातो
　　परस्य पुंसीव भजत्यनर्हम् ।
आस्वादयामास तदात्ततृष्णं
　　मन्यः पुनः पत्रगणः सजीवः ।। ५२

नृत्यत्सु भूतेषु निरस्तरेणु -
　　र्नितान्तमुत्फेननिनादनादी ।
प्रकीर्य वृक्षप्रभवाः समन्ता -
　　दानर्तभूश्चाभवदन्वितार्था ।। ५३

कूटाहवान् क्षुण्णजटायुषोऽस्य
रक्षःपतेर्वक्षसि रक्तपानात् ।
मात्सर्यनिर्यातनमध्यगच्छन्
कालाद् बहोर्गृध्रकदम्बकानि ।। ५४

क्षिप्तैः करैः केवलमाशराणां
महोदधेर्मा समयीकृतस्य ।
वेलातिलङ्घि क्षतजं तदीयं
वेतण्डकर्णद्वयसं बभूव ।। ५५

पयोधिमार्गात् पतितैर्हतानां
पातालोके रुधिरप्रवाहैः ।
आरञ्जिताः कञ्चुकिनोऽध्यगच्छन्
शेषादधस्तात् क्षतदेहलक्ष्मीम् ।। ५६

रथाङ्गताटङ्कधराः पिशाच्यो
हतान्त्रमालारशनाकलापाः ।
चक्रुः पतीनां युधि साट्टहास
स्वयङ्गृहं शोणितपानमत्ताः ।। ५७

अभ्रंलिहा मांसभराद्रिकूटा
दायन्नदीनां रुधिरह्रदेषु ।
संजज्ञिरे तत्र पिशाचयूनां
समज्जनोन्मज्जनसाहसानि ।। ५८

महोदरं मे मम मेघनादं
ममातिकायं मम कुम्भकर्णम् ।
दशाननं मां समिदं नु मह्यं
दत्तेति तत्रागदि डाकिनीभिः ।। ५९

मांसाचलानां महतां शिरस्तो
निपातितानां शोणितनिर्झराणाम् ।
आकर्णघोषं करिणोऽन्वभूवं
नानन्दनिद्रामिव दीर्धमुद्राम् ।। ६०

आकृष्य सन्दानमिभस्य पद्भ्यां
हस्तेन चोत्क्षिप्य हतस्य गात्रम् ।
उत्कृत्यकृत्तं युधि रक्तभावं
कश्चित् पिशाचः कलयाञ्चकार ।। ६१

प्रेतं नखैरुस्रसृतं पिशाची
हिरण्यबुध्या हृदये विदार्य ।
आन्त्रस्रजस्तामरकेसराढ्या -
स्तत्रान्वकुर्वन्नरसिंहलीलाम् ।। ६२

सहस्ररक्तहृदभाजि संखे
सभा सजातीयुधिजं द्युकानाम् ।
त्रिः सप्तकृत्वोऽपि वधादरीणां
रक्तहृदान् पञ्च पुपोषयस्तम् ।। ६३

अनाहतानां सुरदुन्दुभीना -
माविर्बभूव ध्वनिरन्तरिक्षे ।
नानारसोल्लासितभावबन्धं
नाकाङ्गनाभिर्नृनृते तदानीम् ।। ६४

पौलस्त्यशत्रोः शिरसि प्रसूना -
न्यन्वीयमाना..............।
मुमोच मूर्च्छा नवसौरभाणि
सुधारसार्द्राणि सुपर्वलोकः ।। ६५

सलक्ष्मणं राक्षसराट् कवी (पी?) न्द्राः
सुग्रीवपूर्वाः सुलभप्रहासाः ।
पौलस्त्यशत्रुं परिवव्रुराजौ
वीरं गणेशा इव वीरभद्रम् ।। ६६

संयोज्य कण्ठेषु पुनः शिरांसि
दन्तोपधानं दशभिर्निषङ्गैः ।
आलिङ्ग्य गाढं वपुरग्रजस्य
विभीषणः सार्धमिव व्यनंसीत् ।। ६७

आर्य प्रसीदामल चिन्तितस्ते
प्राणापराधो न मया कदापि ।
मय्यप्यतीते मतिमेत्य जह्यात्
सीता कदापीत्यमुचं पुनस्त्वाम् ।। ६८

एवं विधोऽभूद् विधिरीश्वरं त्वा
मनुव्रजिष्याम्यनले पतित्वा ।
इत्यादि रामो विलपन्तमेन -
माश्वासयामास दयाम्बुराशिः ।। ६९

श्रुत्वा पदं भर्तुरवाप्य मोहं
लब्ध्वा च संज्ञां करुणं रटन्ती ।
अन्तःपुरस्त्रीभिरथाजगाम
मन्दोदरी पङ्क्तिमुखस्य देवी ।। ७०

वक्षोजशैलस्त्वनलोद्गतेन
बाष्पाम्बुना किं न तमालपत्रा ।
आपार्ष्णि पर्याकुलमावहन्ती
कल्हारकीर्णं कबरीकलापम् ।। ७१

अन्तर्गतं वल्लभमप्यहासीत्
　　पत्नीव गाढं परिताटयन्ती ।
पर्यायतः खण्डितपारिहार्या
　　पर्याकुलाभ्यां हृदयङ्कराभ्याम् ।। ७२

निपात्य तस्योरसि रावणस्य
　　व्याकीर्णमाल्यावलिकेशभारा ।
आलिङ्ग्य गाढं रुधिरप्रवाहै -
　　रालेपनं कुङ्कुममाक्षिपन्ती ।। ७३

अन्तः क्वथन्ती लहरीव सिन्धोः
　　कल्पानलज्वालकलापवेगात् ।
उत्थाय रक्तारुणधूसराङ्गी
　　वीक्ष्य प्रियं सा विललाप देवी ।। ७४

नाथः स्थितः कीदृगियं त्वदीयां
　　नालोकयस्यापतितां प्रियान्ते ।
आमीलितान्यत्र दिनेऽपि कस्मा -
　　दामोदनान्यक्षिसरोरुहाणि ।। ७५

कथं निषङ्गः कनकोपधानं
　　नाराचजातं नवरत्नशय्या ।
हा हन्त वक्षस्यसृजां प्रवाहः
　　कूलङ्कषं कुङ्कुमचर्चनं ते ।। ७६

निद्रासि चेन्नाथ! रणश्रमेण
　　निश्वासलेशोऽपि कथं न जातः ।
निष्पन्दवृत्तिर्नियतं ममाद्य
　　परीक्षसे किं परिदेवितानि ।। ७७

विधातुमेवं विपदं क्षमेत
नराधमः किं मम नैर्ऋतेन्द्र !।
नालं जगत्यां नलिनासनो वा
नारायणो वा नयनायुधो वा ।। ७८

संवर्धिताया जनुजाधिपेन
पाणौ कृताया भविता ममापि ।
वत्सेन जेत्रा वलशासनस्य
पीतस्तनायाः क्व गतः प्रभावः ।। ७९

यत्क्लेशहेतुर्हृदयं किलासीत्
तत्रैव विद्धैस्य शरेण शत्रोः ।
किं भ्रातृशोकः क्षयमाससाद
पूर्णं किलासीत् तव पुत्रशोकः ।। ८०

मायामयीं कामपि मैथिलीति
पाञ्चालिकां पञ्चशरी प्रकाश्य ।
विवेकिनस्ते विविधो.......
व्यामोह एवं फलमाजहार ।। ८१

अन्याङ्गनायामनुरागकाष्ठा -
मासेदुषः केवलमार्यपुत्रः ।
प्रवाहपीडा तव किं प्रशान्ता
मर्माविधा मन्मथमार्गणानाम् ।। ८२

यत्र क्षणे यत्नभृतैः प्लवङ्गैः
शिलोच्चयैः सेतुरचाय सिन्धुम् ।
आरभ्य तस्मादपि भङ्गुरोऽभू -
दैश्वर्यसिन्धोरपि सेतुबन्धः ।। ८३

नीता यदाऽभून्नृपशोः पुरन्ध्री
सीताभिधाना श्लथशोकबन्धा ।
तदा प्रभृत्येव मनो द्वितीयं
प्राविक्षदग्निः प्रथमं नगर्याः ।। ८४

आक्षिप्तलङ्कापुरमेकपिङ्गा-
दासेवितद्वारममर्त्य कोकैः ।
अनर्घ्यदैत्याधिपयौधकाढ्य -
मैश्वर्यमेवं भवितुं किमासीत् ।। ८५

कामोपचारेषु कलान्तरेषु
रूपेषु वेदेषु च लोभनीयाः ।
नान्तःपुरे किं तव सन्ति नार्यो
मतिभ्रमः किं मनुजप्रियायाम् ।। ८६

पुमान् परस्त्रीव्यसनी यदि स्याद्
योषा च यस्मिन् परपूरुषोत्का ।
निर्मूलतां तत्कुलमेष्यतीति
निदर्शनं शूर्पणखा भवांश्च ।। ८७

अस्माकमासीदनरण्यवाणी
नन्दीशराज्ञा नरजात्यनास्था ।
विभीषणः शूर्पणखा स्वयं च
विपत्तिमूलं विधिरेव यद्वा ।। ८८

पतिव्रता नेत्रपयोऽभिवृद्धः
कामैकमूलं कलहप्रवालः ।
पुत्रादिबन्धुक्षयपुष्पदर्शी
पापद्रुमस्ते फलितोऽद्य मन्ये ।। ८९

इत्येव दीर्घं रुदतीं नियम्य
प्रजावतीं तत्र सहीतराभिः ।
विभीषणः संविदधे चिताग्नौ
भ्रातुर्यथावत् पितृमेघकृत्यम् ।। ९०

विभीषणस्यावितथप्रतिज्ञो
राज्याभिषेकं विरचय्य रामः ।
उत्थापयामास हतान् प्लवङ्गान्
रघूत्तमो वज्रधर प्रसादात् ।। ९१

तौ राघवौ तातमवाप्य साक्षात्
स्वर्गावतीर्णं गिरिश प्रसादात् ।
दत्ताशिपौ तेन महेन्द्रपूर्वै -
र्देवैश्च हर्षैकमायावभूताम् ।। ९२

पुरं स रामः पुनरग्निशुद्धं
प्रभामिवार्कः परिगृह्य सीताम् ।
विमानमारोप्य रिपोः ससैन्यः
हरीशलङ्केशसखः प्रतस्थे ।। ९३

तथा व्रजन् व्योम्नि विमानगत्या
लङ्कास्थलं रत्ननिधिं च देव्यै ।
सन्दर्शयन् सेतुपथेऽवतीर्णः
शम्भोः प्रतिष्ठां चकमे प्रसादात् ।। ९४

प्रेत्यापि शक्रं तमनुप्रयान्त -
मुत्खड्गमुत्सारयितुं स रामः ।
पुंसां महापापहरं पुरारे -
र्लिङ्गं प्रतिष्ठापयति स्म तत्र ।। ९५

पुनी व्रजन् पूजितसिद्धलिङ्गः
　　किष्किन्धया कीर्ति धनः समेत्य ।
ताराधिकास्तत्र वधूः कपीनां
　　विमानमारोप्य विभुर्जगाम ।। ९६

स ऋश्यमूकोऽयमियं हि पम्पा -
　　सन्दर्शनस्थानमिदं शबर्याः ।
कबन्धनिर्गन्धनभूमिरेषा
　　खरातिरक्षः कलहस्थलीयम् ।। ९७

गोदावरी नाम महानदीयं
　　वातापिशत्रोर्वसतिः किलैषा ।
न पर्णशाला नलिनाक्षि सैषा
　　मायामृगस्यैष वधप्रदेशः ।। ९८

विराधविध्वंसनभूरियं सा
　　सचित्रकूटोऽयमयं प्रयागः ।
इत्यादि रामः कथयन् प्रियायै
　　रङ्गं भरद्वाजमुनेः प्रपेदे ।। ९९

विश्राम्य तस्मिन् पवनस्य सूनुं
　　विसृज्यवार्तां भरताय वक्तुम् ।
सञ्जग्मिवान् वाग्मि तथैव रामः
　　पुरीमयोध्यां पुरतो ददर्श ।। १००

अनिलतनयाद् वार्तामाकर्ण्य हर्षुलमानस -
स्तदनु भरतो नन्दिग्रामाज्जटी धृतवल्कलः ।
स च पुनरलंकृत्वाऽयोध्यां समन्त्रिकदम्बको
रथगजानीकैः प्रत्युद्ययौ रघुनायकम् ।। १०१

साकेतोपवने...........रामेण दोर्भ्यां दृढं
शत्रुघ्नो भरतश्च पादपतितौ सस्नेहमालिङ्गतौ ।
सुग्रीवं च बिभीषणं च वचसा तस्यापि वन्द्यक्रमा
नत्वा लक्ष्मणमभ्युभौ नवनवामानन्दकाष्ठां गतौ ।। १०२

प्रणम्य जननीजनं प्रशमितव्यथस्य प्रभोः
पुरोपवनमण्डपे वपुषि वाद्यघोषोदये ।
सुवर्णकलशोदकैः सपदि सर्वतीर्थाहृतैः
सुरर्षिनिवहैः कृतो रघुपट्टाभिषेकक्रमः ।। १०३

प्रविष्टनगरं बुधास्तमधिरूढ भद्रासनं
क्षपाचरवनौकसां कृतयथार्हसंमाननम् ।
समं जनकजन्यया सदसि सेवितं भ्रातृभिः
समग्रगुणमस्तुवन् सकलराज्यलक्ष्मीश्वरम् ।। १०४

इत्युद्दामवरप्रसादकविता सिंहासनाऽध्यासिनः
क्षोणीमीसरगण्डगुण्डयपतेः क्ष्माकण्ठकोत्खण्डिनः ।
विष्णोः श्रीनरसिंहविग्रहभृतो भावोर्मिसेतौ कृतौ
श्रीरामाभ्युदयेऽत्र पूर्तिमगमत् सर्गश्चतुर्विंशतिः ।। १०५

इति श्रीरामाभ्युदये चतुर्विंशतिः सर्गः ।

समाप्तश्चायं ग्रन्थः।

शुभम्

Rāmābhyudayam is a kāvya based on Rāmāyaṇa story. The work is modelled as a Mahākāvya. The author of this work is Sāluva king Narasimha. The work as a whole exhibits commendable mastery of language. Beautiful poetic imagination and exemplary comparisons found in this work are highly commendable. This work is important from the historical point of view also since it provides valubale information on the Sāluva dynasty.